# 3. Research, Innovations and Extension
## 3.1 Promotion of Research and Facilities
### 3.1.6 University has the following –

- **Scheme for preparation of critical edition of unpublished manuscripts for Research projects and research degrees.**
- **Sanskrit as the compulsory medium of writing thesis/ dissertation/ Project Report etc.**
- **Provision for the translation of Sanskrit/Shastric texts as part of formal Research degree.**
- **Incentive to write Sanskrit-Teeka-s/ commentaries on Sanskrit texts.**
- **Scheme for production of Study materials in Sanskrit.**

- **Link of Unpublished Manuscripts**

  **https://ksu.ac.in/wp-content/uploads/2023/04/3.1.6-unpublishedManuscripts.pdf**

- **Link for thesis/ dissertation/ Project Report etc done in sanskrit**

  **https://ksu.ac.in/wp-content/uploads/2023/04/3.1.6-ThesisinSKT.pdf**

# गजशास्त्रग्रन्थानां तौलनिकमध्ययनम्

विद्यावारिधि उपाधिप्राप्त्यर्थं समर्प्यमाणः शोधप्रबन्धः


संशोधनच्छात्रः
एम्.सि.नागराजः
संस्कृताध्यापकः
श्री.कुमारन्स् महाविद्यालयः
बेङ्गलूरु

मार्गदर्शकः
प्रो.वि.गिरीश्चन्द्रः
भाषानिकायाध्यक्षः ,
कर्नाटकसंस्कृतविश्वविद्यालयः
बेङ्गलूरु



कर्नाटकसंस्कृतविश्वविद्यालयः
बेङ्गलूरु
२०१८

# गजशास्त्रग्रन्थानां तौलनिकमध्ययनम्

विद्यावारिधि उपाधिप्राप्त्यर्थं समर्प्यमाणः शोधप्रबन्धः

संशोधनच्छात्रः
एम्.सि.नागराजः
संस्कृताध्यापकः
श्री.कुमारन्स् महाविद्यालयः
बेङ्गलूरु

मार्गदर्शकः
प्रो.वि.गिरीश्चन्द्रः
भाषानिकायाध्यक्षः ,
कर्नाटकसंस्कृतविश्वविद्यालयः
बेङ्गलूरु

कर्नाटकसंस्कृतविश्वविद्यालयः
बेङ्गलूरु
२०१८

# प्रतिज्ञापत्रम्

गजशास्त्रग्रन्थानां तौलनिकमध्ययनम् इति शीर्षकाङ्कितोऽयं शोधप्रबन्धः नागराजः एम्. सि. नामकेन मया महता स्वप्रयासेन मार्गनिर्देशकस्य प्रो वि.गिरीश्चन्द्रमहोदयस्य निर्देशानुसारञ्च संरचितः ।

कर्नाटकसंस्कृतविश्वविद्यालस्य विद्यावारिधिः (P.hD) इत्युपाधये समर्प्यते इत्यहं प्रतिजाने । शोधप्रबन्धोऽयम् इतः पूर्वं अन्यस्मै विश्वविद्यालयाय कस्मैचिदपि उपाधये न समर्पित इत्यपि प्रतिजाने ।

दिनाङ्कः - इत्थम्,

स्थानम् - बेङ्गलूरु

एम्.सि.नागराजः
अनुसन्धाता

# प्रमाणपत्रम्

अहमिदं प्रमाणीकरोमि यत् मदीये मार्गदर्शने श्रीमान् नागराजः एम्.सि नामकेन अनुसन्धात्रा भृशं परिश्रमेण सम्बद्धानि अध्ययनवस्तूनि सङ्कलय्य, "गजशास्त्रीयग्रन्थानां तौलनिकमध्ययनम्" इति शीर्षाङ्कितः शोधप्रबन्धः कर्नाटकसंस्कृतविश्वविद्यालयस्य विद्यावारिधिः (P.hD) इत्युपाधये समर्प्यते इति । शोधप्रविधिशास्त्रमनुसृत्य, विश्वविद्यालयानुदानायोगस्य च नियमानुसारं रचितोऽयं शोधप्रबन्धः सर्वथा समर्पणयोग्यः इति एतं शोधप्रबन्धं परीक्षाय अग्रे सम्प्रेषये ।

दिनाङ्कः -                                                इत्थम्,

स्थानम् - बेङ्गलूरु

प्रो. वि.गिरीश्चन्द्रः

मार्गदर्शकः

धन्यवादसमर्पणम्

आदौ माता-पित्रोः चरणं नमामि यौ मज्जीवितार्थं कारणीभूतौ ।

मम मार्गदर्शकः प्रो.वि.गिरीशचन्द्रः ममोत्साहवर्धकः । तस्य दिग्दर्शनमत्र मामानयति । तस्य कृते ममानन्तधन्यवादाः ।

विश्वविद्यालयस्य कुलपतिः प्रो.श्रीमति पद्माशेखर् सदा संशोधनमभिनन्दति । ताभ्यः मम हृत्पूर्वकधन्यवादाः ।

विश्वविद्यालयस्य कुलसचिवस्थानमलङ्करोति श्रीमती शिल्पा, (के.ए.एस्) महोदया, या नितरां शोधकार्यार्थं प्रोत्साहं ददाति । ताभ्यः धन्यवादाः ।

संशोधनस्य मूलप्रेरकशक्तिरूपेण तिष्ठति कविरत्नकालिदाससंस्कृत-विश्वविद्यालयस्य कुलपतयः डा.श्री.श्रीनिवास वरखेडि महाभागाः । तेभ्यः सादरं धन्यवादाः ।

कर्नाटकसंस्कृतविश्वाविद्यालयस्य अपरदिग्गजः इव विराजते डा.श्री.वीरनारायण पाण्डुरङ्गि महोदयः। सः महाभागः कार्यमिदं दृष्ट्वा स्वानुभाववचनैः सदा मह्यं प्रोत्साहं दत्तवानस्तीति तस्मायपि धन्यवादान् समर्पयामि ।

कर्णाटकसंस्कृतविश्वविद्यालयः धन्यवादार्थं भाजनोऽत्र योहि मत्कृते संशोधनायानुमतिमददात् । अत्र विद्यमानाः सर्वेऽपि प्राध्यापकाः काले काले मार्गं दर्शयन्तः नमस्कारायार्हाः । तेभ्यः सर्वेऽपि मम धन्यवादाः ।

संशोधनार्थं बहवः ग्रन्थालयाः मह्यमावश्यकानां ग्रन्थानां प्राप्तिद्वारा धन्यवादायार्हाः, विशेषतः मैसूरु ओ.आर्.ऐ. यस्मात् हस्त्यायुर्वेदग्रन्थः सम्प्राप्तः । पुण्यपत्तने स्थित बि.ओ.आर्.ऐ अपि अत्र स्मर्तुमर्हः पुस्तकप्रापयितार्थम् । टि.एस्.एस्.एम्, तञ्जावूरु, गजशास्त्रस्य ग्रन्थदानेन ऋणीकरोति माम् यस्मिन् ग्रन्थालये अनेके हस्तलिपिग्रन्थाः सन्ति गजशास्त्रसम्बन्धिनः । तत्र डा.वीरराघवन् नामक संस्कृतविद्वान् स्वामूल्यं समयं प्रदाय मार्गदर्शनमकरोत् । तस्मै मम प्रणामवचनानि ।

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य ग्रन्थालयः, बेङ्गलूरुनगरस्थौ मिथिक् सोसैटि, गोखले विचारसंस्था च स्वग्रन्थैः मामाकृष्टवन्तः चोदितवन्तश्च संशोधनार्थं स्वज्ञानभाण्डारैः । तत्र साहाय्यं कृतवद्भ्यः सर्वेभ्यः धन्यवादाः ।

मैसूरु ओ.आर्.ऐ तः पुस्तकप्राप्त्यर्थं श्री.हेच्.एन्.मञ्चुनाथवर्यः, पूनातः पुस्तकप्राप्त्यर्थं श्री.हेमन्त काशीकरवर्यः साहाय्यं कृतवन्तौ । एताभ्यां पुनः पुनः नमनानि ।

अस्माकं कुमारन्स् विद्यालयस्य प्रधानास्ति श्रीमति.दीपाश्रीधरभगिनी । तस्याः कृतेऽपि धन्यवादाः । अस्माकं विद्यालयस्य प्रांशुपालः श्री.रविराज भट्टः मम प्रबन्धकार्ये सदा प्रोत्साहं ददाति स्म । मम विद्यालयस्य सखाः, शिक्षिकाभगिन्यः, मद्विभागस्य विद्वान् श्री.राघवेन्द्र ऐतालः एवं सर्वेऽपि साहाय्यं दत्तवन्तः, तेभ्यः सर्वेभ्योऽपि धन्यवादाः ।

जगद्विख्यातः विद्वत्कोविदः शतावधानी डा.रा.गणेशवर्याः अस्मिन् विषये संशोधनं कर्तुं मूलप्रेरकः । अतः तस्य चरणयोः साष्टाङ्गं प्रणामाः । अस्मिन् कार्ये मम पथदर्शकाः अभूवन् (स्व.)डा.बि.एस्.वेङ्कटरामः, मद्गुरवः डा.टि.ए.बालकृष्णः, विद्वान् डा. मञ्जुनाथ भट्टः, डा.नारायण भट्टः इत्यादयः । एतेभ्यः मम धन्यवादान् व्याहरामि ।

बेलूरुपत्तनस्थः डा.श्रीवत्स वटी यो हि इतिहासज्ञः, गजविषये ऐतिहासिकज्ञानप्रदानेन मम धन्यवादायार्हतां भजते । डा.एम्.एस्.चैत्रः यो हि मम उत्थानाधःपतनेषु सम्यग् उन्नीय चोदितवान् एतत्कर्मणि धन्यवादायार्हः । श्री.कार्तिकः अनेकगजशास्त्र-सम्बन्धित-ई-ग्रन्थ-सौलभ्यप्रदानेन साहाय्यं दत्तवानस्ति । तस्मायपि धन्यवादाः ।

डा.नटेशवर्यः, विद्वत्सखा श्री.टि.नरेन्द्रन् मम दोषज्ञौ, दोषघ्नौ भूत्वा माम् उपकृतवन्तौ । एतयोरपि धन्यवादाः समर्पिताः ।

गजसम्बन्धितप्रश्नावल्याः उत्तराणि दत्तवन्तः त्रयः - डा.रम्याभट्, श्री.राजेश् पद्मार् तथा श्री.सुब्बराव् सर्वेऽपि स्वज्ञानं मयि निवेद्य एतस्मिन् कार्ये मम कृते साहाय्यं दत्तवन्तः । एतेभ्यः सर्वेभ्यः अपि मम धन्यवादान् अर्पयामि ।

मम महान् छात्रगणः सर्वे मां काले काले चोदितवन्तः साधयितुम्, अत्र विशेषतः श्री.श्रेयस्, श्री.शशिकिरणादयः, इतोऽपि ज्ञानमादातुं माम् सदा प्रेरयन्ति अद्यापि । अतः तेभ्यस्सर्वेभ्योऽपि मम धन्यतावादाः ।

मम सर्वे सङ्घज्येष्ठाः, प्रियसखाः, सङ्घबन्धुवर्गश्च धन्यवादायार्हाः ।

# - विषयसूची -

प्रथमोऽध्यायः - गजशास्त्रपरिचयः लोके साहित्ये च

१.१ - आधुनिकलोके प्राचीनगजशास्त्रस्य परिचयः

१.२ - संस्कृते गजशास्त्रस्य व्याप्तिः, ग्रन्थानां परिचयः च ।

१.३ - किमर्थं गजशास्त्रम्

द्वितीयोऽध्यायः - संस्कृतकाव्यसाहित्ये गजाः

(अत्र प्रमुखतया रामायण-महाभारत-केभ्यश्चिद्गद्य-पद्य-चम्पू-नाटकग्रन्थेषु कृताः गजविचाराः उक्ताः )

तृतीयोऽध्यायः - शास्त्रोक्ताः (प्राचीनाधुनिकाः) गजविषयकाः अंशाः

३.१ - गजः नाम किम् ?

३.२ - गजोत्पत्तिः

३.२ - गजानां वर्गीकरणम् - (जात्यंशदेशवर्णच्छायागन्धबलसत्त्वगुणगत्यावर्तेद्यादीनामाधारेण)

३.३.- गजदोषाः

चतुर्थोऽध्यायः - गजविषयकाः अंशाः

४.१ - गजवनानि

४.२ - गजग्रहणम्

४.३ - हस्तिशाला, हस्तिपाश्च

पञ्चमोऽध्यायः - गजानां पालनम्

५.१ - कोऽयं पालकाप्यो नाम ?

५.२ - हस्तिशिक्षा

५.३ - दिनचर्या- ऋतुचर्या च

षष्टोऽध्यायः - (उक्तानुक्तविषयाः)
६.१ गजायुर्विचारः
६.२ छायागजलक्षणम्
६.३ गजसत्त्वपरीक्षा
६.४ गजस्वरलक्षणम्
६.५ गजासनलक्षणम्
६.६ गजदन्ताः
६.७ गजमूल्यम्
६.८ गजनेत्रवर्णलक्षणम्
६.९ गजमदः
६.१० गजानां रोगाः
६.११ गजशरीरस्याङ्गानि
६.१२ गजावयवदेवताः
६.१३ नवगृहीतगजोपचारः
सप्तमोऽध्यायः - उपसंहारः

## कोष्टकानां विवरणम्


| क्रमसङ्ख्या | पृष्टसङ्ख्या | उक्तविचारः |
|---|---|---|
| कोष्टकः - १ | १५ | गजशास्त्रसम्बन्धिताकराः |
| कोष्टकः - २ | ४६ | बालकाण्डे गजविचाराः |
| कोष्टकः - ३ | ४८ | अयोध्याकाण्डे गजविचाराः |
| कोष्टकः - ४ | ४९ | अक्षौहिणीसेनाविभागः |
| कोष्टकः - ५ | ५५ | हर्षचरिते गचविचाराः |
| कोष्टकः - ६ | ६०,६१ | किरातार्जुनीये गजविचाराः |
| कोष्टकः - ७ | ७५ | ऐरावतादीनां गुणरूपादयः |
| कोष्टकः - ८ | ७९ | रामायणे गजजात्युल्लेखाः |
| कोष्टकः - ९ | ७९ | गजजातीनां मानप्रमाणः मातङ्गलीलानुसारम् |
| कोष्टकः - १० | ८० | गजमानप्रमाणः गजशास्त्रानुसारम् |
| कोष्टकः - ११ | ८० | उत्तममध्यमाधमगजानां प्रमाणः |
| कोष्टकः - १२ | ८१ | शुभ-मध्य-कनिष्ठगजानां प्रमाणः |
| कोष्टकः - १३ | ८२ | मानसोल्लासे मानविचारः |
| कोष्टकः - १४ | ८२ | शिवतत्त्वरत्नाकरे मानविचारः |
| कोष्टकः - १५ | ८४ | बृहत्संहितायां मानविचारः |
| कोष्टकः - १६ | ८५ | भद्रगजलक्षणानि |
| कोष्टकः - १७ | ८६ | मिश्रगजलक्षणानि |
| कोष्टकः - २० | ८९ | गजसत्त्वपरीक्षणविचारः |
| कोष्टकः - २१ | ९१ | सात्त्विक-राजस-तामसगजलक्षणानि गजशास्त्रयोः |
| कोष्टकः - २२ | १०१ | अन्वयानुसारं वर्गीकरणम् मानसोल्लास-शिवतत्त्वरत्नाकरयोः |
| कोष्टकः - २३ | १०१,१०२ | गजवर्णलक्षणम् |
| कोष्टकः - २४ | १०५ | गजच्छायालक्षणम् |
| कोष्टकः - २५ | १०७ | गजगतिविवरणम् |
| कोष्टकः - २६ | ११५ | रामायणे गजावसथस्थानानि |
| कोष्टकः - २७ | ११७ | गजशास्त्रोक्तगजवनव्याप्तिः |
| कोष्टकः - २८ | ११८ | गजोपवनविचारः |
| कोष्टकः - २९ | १२१ | उत्तमकुलजगजानां देशाः |
| कोष्टकः - ३० | १२१ | मध्यमकुलजगजानां देशाः |
| कोष्टकः - ३१ | १२१ | अधमकुलजगजानां देशाः |
| कोष्टकः - ३२ | १२१ | सङ्करकुलजगजानां देशाः |
| कोष्टकः - ३३ | १२४ | रामायणे गजग्रहणविचारः |
| कोष्टकः - ३४ | १३७ | रामायणे गजशिक्षणम् |

| | | |
|---|---|---|
| कोष्टकः - ३५ | १४० | कौटिलीयार्थशास्त्रे गजशिक्षाविधानम् |
| कोष्टकः - ३६ | १४३ | मातङ्गलीलायां पादचालनेन गजशिक्षणम् |
| कोष्टकः - ३७ | १४४ | मातङ्गलीलायामङ्कुशचालनविधानाम् |
| कोष्टकः - ३८ | १४५ | गजशास्त्रानुसारं गजशिक्षणम् |
| कोष्टकः - ३९ | १५९ | हस्तिशालाविस्तीर्णः हस्त्यायुर्वेदोक्तम् |
| कोष्टकः - ४० | १७१ | गजानां शापानुग्रहकथनम् |
| कोष्टकः - ४१ | १७५ | मातङ्गलीलानुसारं हस्तिपविधाः |
| कोष्टकः - ४२ | १९५ | मातङ्गलीलायां गजायुर्विचारः |
| कोष्टकः - ४३ | १९६ | गजशास्त्रयोः गजायुर्विचारः |
| कोष्टकः - ४४ | १९८ | गजशास्त्रयोः प्रथमतः दशवर्षपर्यन्तं गजवृद्धिः |
| कोष्टकः - ४५ | १९९ | गजशास्त्रयोः दशकशः गजवृद्धिः |
| कोष्टकः - ४६ | २०१ | गजशास्त्रयोः मातङ्गलीलायाञ्च विद्यमानानां श्लोकानां साम्यता |
| कोष्टकः - ४७ | २०४ | गजशिक्षायां गजायुर्वृद्धिविचारः |
| कोष्टकः - ४८ | २०९ | रामायणे गजदन्तविचारः |
| कोष्टकः - ४९ | २११ | दन्तवर्धन-कर्तन-प्रमाणविचारः |
| कोष्टकः - ५० | २१२ | गजदन्तकर्तनगन्धः फलञ्च |
| कोष्टकः - ५१ | २१३ | गजदन्तकर्तिताकारफलानि च |
| कोष्टकः - ५२ | २१४ | शिवतत्त्वरत्नाकरे दन्तकर्तनाकारफलानि |
| कोष्टकः - ५३ | २१९ | गजमदः दृष्टविकाराश्च |
| कोष्टकः - ५४ | २२० | सप्तशोभाः |
| कोष्टकः - ५५ | २२१ | गजशास्त्रोक्तमदावस्थाविचारः |
| कोष्टकः - ५६ | २२१ | मदजलवर्णः कालश्च |
| कोष्टकः - ५७ | २२२ | मदावस्थावर्णनम् |
| कोष्टकः - ५८ | २२९ | गजावयवविचारः गजशास्त्रे-शिवतत्त्वरत्नाकरे च |

# योजितानि चित्राणि

१. हम्पी देवालयानां भित्तिशिलागजमूर्तयः

२. बेलूरु-हलेबीडु-जावगल्-बेलवाडितः चित्राणि

३. भारतीयगजः - पुरतः - १

४. आफ्रिकागजः - पुरतः - १

५. भारतीयगजः - पार्श्वतः - १

६. आफ्रिकागजः - पार्श्वतः - १

७. गजग्रहणविधानम् - ४

८. गजशिक्षाविधानानि देवागारभित्तिषु - ३

९. हस्तिशालाः - हम्पीनगरस्य, गुरुवायूरुपत्तनस्य च ।

## प्रथमोऽध्यायः

# गजशास्त्रपरिचयः लोके साहित्ये च

### आधुनिकलोके प्राचीनगजशास्त्रस्य परिचयः

भारतमस्माकं जन्मभूमिः । अस्यादिः कः इति न कोऽपि जानाति । अस्य प्राचीनतां मापयितुमद्यापि जगति न कापि ज्ञानशाखा जनिं प्राप्तवत्यस्ति । बहुसहस्रजनाः अस्याध्ययनं कृत्वाद्यापि सफलतां प्राप्तुं प्रयत्नं कुर्वन्तस्सन्ति प्रायः । आधुनिकाः इति धिया, सर्वज्ञानसम्पन्नाः इति गर्वेण कार्यारम्भकर्तॄणामिदमद्यापि अप्राप्तमेव । अत्र जनाः केवलमजीवन्निति न । परं विविधक्षेत्रेषु कृतभूरिपरिश्रमाः, इदंप्रथमतयेति जगते बहून् विचारान् परिचायितवन्तः । जनजीवनद्वारेण मनुष्यजीवनस्य प्रत्येकस्मिन्नपि क्षेत्रे अत्यसाधारणसाधनां कृत्वा तूष्णीकाः तत्सर्वं जगते प्रदाय स्वयं नेपथ्यमगच्छन् ।

अन्धगजन्यायवत् भारतस्याध्ययनं कुर्वन्तः अनेके महान्तः विद्यासपन्नविद्वांसः स्वं स्वमपिभ्रायं यद्यपि प्राचीकटन्, तथापि तत्सर्वं परिपूर्णतां न यातं तैरिति तु अङ्गीकार्यमेव । सुमहान् विचारोऽयं यदेते प्राचीनाः न केवलमन्वेषणं साधनां वाकुर्वन् परं तत्सर्वमपि कृतिरूपेण ग्रथित्वा आगामिन्यः सन्ततयः एतासां ज्ञानशाखानां संवर्धनाय यथा प्रयतेरन् तथा व्यवस्थामप्यकल्पयन् । प्रायः ताः सर्वाः ज्ञानशाखाः संस्कृतभाषायां ग्रन्थरूपेण विलिख्य अस्माकं पूर्वजाः अस्मभ्यं बहूपकृतवन्तः । वेदादरभ्याधुनिककालपर्यन्तं भारतीयस्य, संस्कृतस्य च ज्ञानशाखाः नियतरूपेणाभिवृद्धिं पश्यन्तस्सन्ति । आङ्गलभाषायां यथा सामान्यतया कथयन्ति You name it, we have it इति, तथैव तेषु तेषु कालेषु विवृद्धाः अपि ज्ञानशाखाः भारते संस्कृते वा मूलं परिपश्यन्ति प्रायः ।

बहूनि शास्त्राण्यत्राभिवृद्धिं नीतानि । आजगत् यदान्धकारेऽऽसीत्तथाप्ययं सुमहान् देशः ज्ञानज्योत्या भ्राजते स्म । जगति यदाधुनिकज्ञानसुगन्धः, ग्रन्थसुरभिः

प्रसारयितुम् आरम्भः कृतः विदेशीयैः तस्मिन् काले प्रायः भारतं दास्यदूषितमभूत् स्वज्ञानसंवर्धनं कर्तुमशक्तम् । यस्मिन् देशे, यस्यां भाषायां वेद-उपवेद-वेदाङ्ग-रामायण-महाभारत-अष्टादशपुराणानि, गद्यपद्यचम्पूकथाकोषैतिहासिकसूक्ति-रूपकोपरूपकानि-भेदोपभेदैस्साकं विविधदर्शनानि चतुषष्टि-कलाप्रकारा-विशिष्टविस्मयकर-विचार-व्याख्याः ग्रन्थरूपेण सन्ति, न सः देशः भाषा च समृद्धेः चिह्नम् । इत्थं भारते-संस्कृते विद्यमानेष्वनेकेषु वैशिष्ट्येषु गजशास्त्रमप्यन्यतमम् ।

भारतीयसंस्कृतौ गजानां स्थानं विशिष्टम् । गजाः न नूतनाः अस्माकं जनानाम् । आधुनिककाले किञ्चिदिवाज्ञास्सन्ति गजविषये । परं प्राचीनकालादारभ्याधुनिक-कालेऽपि दैवस्य रूपे, दैवस्थाने, शिल्पभित्तिषु, दसरा इत्याद्युत्सवेषु, बालानां पाञ्चालिकास्वपि, दैनन्दिनवृत्त-पत्रेष्वित्यादिषु च गजानाञ्चित्रं सामान्यमेव । विशेषो नाम सैन्येषूपयुक्ताः साहित्येष्वपि गजाः वर्णिताः । लक्षोपलक्षसङ्ख्याका गजाः पालिताः, वर्धिताः मानुषपरिसरेषु आरण्यकेषु च । गजग्रहणं प्रायः भारतस्यैव योगदत्ता कला जगते । तदुद्दिश्य शास्त्रग्रथनमपि कृतम् । विविधकालसन्दर्भेषु, विविधभाषासु, विविधान्यविषयैस्सह, विविधदेशीयाः गजमुद्दिश्य ग्रन्थान् ग्रथितवन्तः । प्रायोगिकोऽयं विचारः साहित्यस्तरेऽपि विरचितः । तेषां कृते प्रदीयमानं शिक्षणमपि परम्परानुक्रमेण ज्ञानविषयत्वेनादृतः । एवमाधुनिककाले सामान्यानां गजस्य विचारः वृत्तपत्रिकाभ्यः, दूरदर्शनादिमाध्यमैः केवलम् । परमयं संस्कृतशास्त्रशेवधौ गजानामपि किञ्चनस्थानमिति दर्शयितुमयं शोधप्रबन्धः किञ्चित् साहाय्यकः भवेत् ।

### १.२ - संस्कृते गजशास्त्रस्य व्याप्तिः, गजविषयकग्रन्थानां परिचयश्च

साहित्यान्वेषणम् -

भारतीयज्ञाने विज्ञानमप्यन्तर्भवतीति सर्वे जानन्ति । संस्कृतं भारतस्य प्राचीनज्ञानभाण्डारः एवास्ति । अस्मिन् मनुष्योपयोगिनः अनेके विचाराः सुविस्ताररूपेण चर्चिताः । विज्ञानमप्यस्मिनन्तर्भवति । संस्कृत-विज्ञानयोः सम्बन्धः

अतिविशिष्टं वर्तते एव । गजशास्त्रं संस्कृते विद्यमानं किञ्चन वैज्ञानिकशास्त्रम् । अत्र गजशास्त्रशब्दत्वेन स्वीकृतं यत्तु गजानां शास्त्रमित्येव बोधयेत् न ग्रन्थविशेषेण ।आदौ (अध्ययनारम्भे) चिन्तितं यदयं सुलभः विषयः इति । परमन्तःप्रवेशेन ज्ञायते यदत्र बृहदस्ति साहित्यराशिरिति । विशेषो नामात्र पूर्णतया गजसम्बन्धिताः शास्त्रग्रन्थाः अपि सन्ति, गजोल्लेखैर्युक्ताः अन्यशास्त्रीयग्रन्थाः तथा क्वाचित्केन अन्येष्वपि ग्रन्थेष्वेवम् उल्लेखाः गजसम्बन्धिनः सन्तीति ।

एवमेषां निर्देशः कदाचिच्छक्यते -

गजसम्बन्धिताः ग्रन्थाः अनेके सन्ति । अतः गजसम्बन्धिताः ग्रन्थाः संस्कृतभाषायाम्, अन्यभाषायामिति विभागः प्रथमम् । कन्नडभाषायां संस्कृतसम्बन्धी ग्रन्थः कश्चन सङ्कलितः यस्य नाम गजशास्त्रपदकोशः इति । एवमेव मराठी-भाषायामपि लिखितः कश्चन पूर्वकालीनग्रन्थः यस्य नाम गजशास्त्रसार इति । संस्कृतभाषायाम् पुनः विभागत्रयं शक्यते । यथा गजसम्बन्धिताः शास्त्रग्रन्थाः, गजविषयसम्बन्धिताः अन्यकोषाधारिताः ग्रन्थाः यत्र गजाः शास्त्रत्वेन उल्लिखिताः तथा काव्यसाहित्यं यत्र गजानां वर्णनं, अन्यशास्त्रसम्बन्धिकथनं च बहुषु अन्येषु ग्रन्थेषु भवति । अत्राधुनिकविज्ञानस्य गजविषयकप्राणिशास्रानुगुणाध्ययनं न कृतं यतो हि आधुनिकानां पाश्चात्यानां भारतीयानां गजविषयकग्रन्थेषु प्राचीनभारतस्य शास्त्रत्वेन गजानामध्ययनं न दृश्यते इति मन्मतिः । सामान्यतः द्वे पुस्तके आधुनिकलोके प्रसिद्धे । (i) ‘Elephants majestic creatures of the wild’ Jeheskel Shoshani, Consulting Editor. (ii) Encyclopedia of elephants - edited by S.L.Elhingham & B.David Hard.

एते तु आधुनिकगजाध्ययनस्य प्रमाणपुस्तके इव स्तः ।

एतयोः यद्यपि भारतीयगजानामुल्लेखः कृतः भारतस्य संस्कृतस्य वा दृष्ट्या गजशास्त्रत्वेन च न कृतोऽस्ति । अत्र भारतीयगजानामुल्लेखः केवलं काव्यग्रन्थेषु, रामायण-महाभारतादिषु, शिल्पकलादिष्वेव च दृष्टाः न तु शास्त्रस्योल्लेखेन ।

अत्रैवमुच्यते चेत् नास्ति कोऽपि दोषः इति भावः यत् एतेषामस्यां मण्डल्यां विद्यमानानां भारतीयविदुषां वा गजशास्त्रम् इति शब्दस्य परिचयोऽपि नासीदिति ज्ञायते । यतो हि भारतीयत्वं, भारतीयं नाम केवलं हस्तीति नाम विहाय, भारतीयकाव्य-शिल्पादिषु गजोल्लेखः इति केवलमुक्तम् । न केवलं तावत् परं गजानां विविधनामान्यपि न ज्ञातमासीदिति स्पष्टम् । तानि नामानि गजानां गुणानुगुणं इत्यप्यजानन् गजविषयकानन्यान् विचारानपि न चिन्तितं स्यादिति भासते । यदा गजशास्त्रस्यैव स्पर्शनं नास्ति कुतो वा हस्त्यायुर्वेदादिमहाग्रन्थानां परिचितिः । गजशास्त्रविषयमुद्दिश्य आङ्ग्लभाषायां विविधकर्तॄणां प्रबन्धानां सङ्ग्रहणं क्रियते तत्र । परं नास्ति तत्र गजशास्त्रस्य उल्लेखः भारतीयानां संस्कृतस्य वा भारतीयैरेव रचितेषु प्रबन्धेष्वपि । अत्र पुनः आधुनिकानां चिन्तनेष्वपि अस्य गजज्ञानस्य परिचयः नास्तीति जानीमो वयम् ।

एताभ्यां साकं अन्यः कश्चन ग्रन्थः कन्नडभाषायां प्रकटितोऽस्ति यस्य नाम 'गजसंहिता' इति । अस्य नाम यद्यपि प्राचीनमिव दृश्यते एषः ग्रन्थः अत्याधुनिकविचारानेव बोधयति । एतस्मिन् ग्रन्थे आधुनिककाले गजानां पालनाय के क्रमाः अनुसरणीयाः इति निर्दिष्टाः । आधुनिक-आङ्ग्लभाषायाम् एलिफाण्टालजीति यदुक्तं तदनुगुणेनायं ग्रन्थः ग्रथितः । प्रबन्धोऽयमाधुनिकगज-शास्त्रीयांशान्न योजयतीति कारणेन एषां स्पर्शः न कृतः ।

अतः प्रबन्धस्यास्य रचनायावलोकितानाम् ग्रन्थानां परिचयः एवं वर्तते -

| गजसम्बन्धिनां विचाराणां ग्रन्थाः | | | |
|---|---|---|---|
| संस्कृतभाषायाम् | | | अन्यभाषासु |
| शास्त्रग्रन्थाः | प्रासङ्गिकरूपेण शास्त्रसम्बन्धि-विषयाः उक्ताः | साहित्येषु यत्र गजोल्लेखः/ वर्णनं वा कृतम् * | केवलं शास्त्रग्रन्थाः |
| हस्त्यायुर्वेदः (पालकाप्यस्य) | नामलिङ्गानुशासनम् (अमरसिंहस्य) | रामायणम् (वाल्मीकिकवेः) | १. कन्नडभाषायाम् गजशास्त्रपदकोशः |
| गजशास्त्रम् | मानसोल्लासः | महाभारतम् | २. मराठीभाषायाम् |

| | | | |
|---|---|---|---|
| (पालकाप्यस्य) | (सोमेश्वरस्य) | (वेदव्यासस्य) ** | - गजशास्त्रसारः |
| गजशास्त्रम् (पालकाप्यस्य) | शिवतत्त्वरत्नाकरः (बसवभूपालस्य) | रघुवंशम्, कुमार-संभवम्, (कालिदासस्य) | ३. मराठीभाषायाम् - गजशास्त्रम् |
| मातङ्गलीला (नीलकण्ठस्य) | मृगपक्षिशास्त्रम् (हंसदेवस्य) | किरातार्जुनीयम् (भारवेः) | Elephant the lord of the jungle |
| कल्पनारत्नम् (शिवमारस्य) | अर्थशास्त्रम् (कौटिल्यस्य) | प्रतिज्ञायौगन्धरायणम्, स्वप्नवासवदत्तम् (भासस्य) | Elephant – majestic creatures of the wild |
| गजशिक्षा (नारदमुनेः) | बृहत्संहिता (वराहमिहिरस्य) | अभिज्ञानशाकुन्तलम् (कालिदासस्य) | The illustrated encyclopaedia of elephants |
| गजग्रहण प्रकरणम् (नारायण-दीक्षितस्य) | अग्निपुराणम् (वेदव्यासस्य) | मेघदूतम्, ऋतुसंहारः (कालिदासस्य) . . . . | |

* - अत्र स्पष्टं कृतं यदन्येषु बहुषु काव्येषु/कृतिषु गजोल्लेखः दृश्यते चेदपि अत्राध्ययनाय एतान्येव स्वीकृतानि।

** - अत्र पुनः महाभारतस्य अगाधतायाः कारणात् केचनैव विषयाः स्वीकृताः ।

कोष्टकः - १

अतः प्रथमो भागः गजसम्बन्धिशास्त्रग्रन्थानामेव परिचयः भवति । ग्रन्थानामेतेषामन्तरङ्गे विद्यमानानंशानिदानीं ज्ञातुं प्रयतामहे ।

१. गजशास्त्रम् (पालकाप्यविरचितम्)

अस्य रचयिता पालकाप्यः । अत्र व्यासविलिखितगजशास्त्रस्यापि कश्चनोल्लेखः दृश्यते । अस्य अनन्तकृष्णभट्टारकेन कृता भावसन्दर्शिनी नाम्नि काचिद्व्याख्याप्युपलब्धा । अस्मिन् गजानां विविधानां विषये एकोनविंशत्यध्यायाः सन्ति । एतेषामध्यायानां नामान्येव तत्रान्तर्गतान् विषयान् बोधयन्ति यथा -

१. पालकाप्योत्पत्तिक्रमकथनम्
२. दिग्गजोत्पत्तिकथनम्
३. दिग्गजशापानुग्रहकथनम्
४. गजवननिरूपणम्

५. कालीयगजलक्षणनिरूपणम्	६. देशभेदगजलक्षणनिरूपणम्

७. गजग्रहणप्रकारकथनम्	८. गजजातिलक्षणनिरूपणम्

९.अंशगजलक्षणनिरूपणम्	१०. वर्णगजलक्षणम्

११.छायानिरूपणप्रकरणम्	१२. गन्धलक्षणप्रकरणम्

१३. गजबलसत्त्वनिरूपणम्	१४. सात्त्विकगुणनिरूपणप्रकरणम्

१५.गजगतिलक्षणनिरूपणम्	१६. आवर्तलक्षणप्रकरणं

१७. गजमहादोषनिरूपणम्	१८. परिमाणकथनप्रकरणम्

१९. आसनलक्षणप्रकरणम्

२. गजशास्त्रं गजशास्त्रानुबन्धः च (पालकाप्यविरचितम्)

अत्र ग्रन्थद्वयोः योगः दृश्यते । उभयोरपि कर्ता पालकाप्यः एव । आदौ गजशास्त्रम् वर्तते उत्तरे गजशास्त्रानुबन्धः इति भागः दृश्यते । प्रथमग्रन्थः गजानां सामान्यानंशान् ब्रवीति परं द्वितीयो भागः गजानां दिनचर्या, गर्भिणीलक्षणं, गजानां विविधाः रोगाः, परिहाराश्च चिन्तयति । अस्मिन् भागे न कोऽपि विशेषाध्यायक्रमेण भागाः दृश्यन्ते । केवलं विषयाः भिन्नभिन्ननाम्ना उपस्थापिताः । एतेऽंशाः ९८ पृष्टेषु वर्णितास्सन्ति ।

प्रथमे भागे प्रकरणनामकं विभागकरणं दृश्यते यत्र प्रत्येकस्मिन्नपि प्रकरणे पूर्णतया एकः एव विषयः चर्चितो वर्तते । १२८ पृष्टेषु रचितेऽस्मिन् भागे आहत्य दश विभागाः सन्ति । प्रत्येकोऽपि विभागः प्रकरणमिति निर्दिष्टं वर्तते । वैशिष्ट्यं नामास्य ग्रन्थस्यात्र सचित्रोल्लेखः बहुत्र दृश्यते ।

प्रथमप्रकरणे आदौ मङ्गलाचरणमस्ति । तदुत्तरं रोमपादसकाशं गौतमाद्यागमन-विभागतः पालकाप्येन सङ्ग्रहेण गजारोग्यादिकथनं नाम विभागपर्यन्तं विवरणं दृश्यते ।

द्वितीयप्रकरणे गजोत्पत्तिरिति विभागतः गजावयवदेवतालक्षणपर्यन्तं विवरणं दृश्यते ।

तृतीये प्रकरणे गजानां विविधैः कारणैः प्राप्ताः शापाः, अनुग्रहाः भृशं वर्णिताः ।

चतुर्थे तु गजावासस्थानकविषये सङ्कथनमस्ति ।

गजानां वयोविचारः पञ्चमस्य प्रकरणस्य चर्चितांशः ।

गजग्रहणं षष्टस्याध्यायस्य सारः ।

सप्तमप्रकरणं तु भद्र-मन्द-मृगजातीयकगजानां लक्षणं, तेषु विद्यमानमिश्रत्त्व-लक्षणादिकविषयं दैर्घ्येण वर्णयति ।

गजेषु विद्यमानाः अंश-बल-गुण-सत्त्व-देवतेत्यादीनां गुणानामाधारेण विभागः अष्टमेऽध्याये प्रकथितम् ।

नवमप्रकरणस्य गजानांगत्यावर्तफलाफलौन्नत्याद्यनेकधाः ।

दशमे प्रकरणे बहुविधविषयाः उक्ताः ।

एवमस्मिन्नपि शास्त्रग्रन्थे गजानां जगत् पूर्णतया विवृतमस्ति ।

एतेन साकं विद्यमाना कृतिः गजशास्त्रानुबन्धः इति । अत्र गजारोग्य-स्वास्थ्ययोः विषयविशदीकरणं दृश्यते । अस्मिन् ग्रन्थे ग्रन्थविभागाः दृश्यन्ते । एते अध्यायाः इति न कथिताः परमवगमनाय विभागाः कृताः । ते विभागाः तत्रोक्तविषयाणां नामान्येवं सन्ति (आवरणस्थसङ्ख्या तस्मिन्नध्याये विद्यमानानां श्लोकानां सङ्ख्या) - गजबलप्रशंसा (१०), गजग्रहणयोग्यायोग्यकालः (५), ग्राह्यगजलक्षणम् (६), गजवयोनिर्णयलक्षणम् (२१), हस्तिनीलक्षणम्, करिणीदोषाः, गर्भिणीग्रहणनिषेधः (१३), गर्भिणीलक्षणम् (२८), गन्धहस्तिलक्षणम् (८), नवगृहीतगजोपचारः (२१), हस्तिवर्धनप्रकारः (१४), गजशिक्षणम् (६), गजारोहणलक्षणम् (१९), आसनलक्षणम् (६), मदाद्युत्पादनौषधप्रयोगः (३५), समदगजारोहणकालः (४), मदचिकित्साविधिः (१२), गजक्षेत्रलक्षणम् (६), गजमूल्यनिर्णयः (१४), दन्तच्छेदभेषजम् (६), गजव्याधिचिकित्सा (३७),

बालपोषणविधिः (१४), मन्दादिगजोत्पत्तिकालः (८), गजचिकित्सार्थकसंज्ञा-परिभाषादिविधिः (३४), गजाहारोपयुक्तपदार्थगुणप्रमाणविधिः (८१), भक्षपेयादिपदार्थगुण-दोषविधिः (१५४), बस्तिविधिः (गजबस्तिक्रियाविधिः) (३०), नस्यविधिः (१०), पोतादीनां भेषजविधिः (६२), गजशालानिर्माणविधिः (३३) इति पालकाप्ये महापाठे वृद्धोपदेशीये सङ्गृहीता विशेषास्समाप्ताः इति अन्तेऽत्र स्वारस्यकरः कश्चनांशः दृश्यते । एवं गजशास्त्रानुबन्धस्यास्य ग्रन्थस्यावलोकनेन ज्ञायते यत् अस्मिन्नपि ग्रन्थे गजसम्बन्धिताः भृशं वर्णिताः शास्त्रत्वेनेति ।

गजशास्त्रग्रन्थयोः महती समानता दृश्यते । परं नवदेहलीतः प्रकाशिते गजशास्त्रे व्यासोक्तभाष्यमप्याविष्टमिति विशिष्यते । व्यासोक्तेन युक्तस्य गजशास्त्रस्य बहवोऽंशाः तञ्जावूरुतः प्राप्तात् ग्रन्थादेवाकृष्टाः इति कथनं निर्विवादं प्रायः । अत्र ज्ञातव्यः यदयं ग्रन्थः मध्ये क्वचित् स्थगितः भवति । केचनाध्यायाः यत् पालकाप्यगजशास्त्रे विद्यते (यस्य पा.ग.शा, पालकाप्यगजशास्त्रं (त) इति नाम दत्तम्) तत्तु व्याख्यासहिते पालकाप्यगजशास्त्रे नास्ति (एतस्य नाम (व्यास) गजशास्त्रमिति नाम कृतं यत्र व्यास शब्दस्य अर्थः व्याख्यासहितः इति) ।

३. गजशिक्षा

इयं कृतिः नारदमुनिविरचिताऽस्ति । इयं खलु नारद-देवेन्द्रयोः सम्भाषणद्वारेण हस्तिविषयं चिन्तयति । सुधर्मायां देवेन्द्रः नारदमुनिं गजविषयकशास्त्रं वक्तुं प्रेरयति । तदा नारदः अस्यां कृतौ विद्यमानानंशान् प्रत्येकमपि तत्रासीनान् ऋषीन् इन्द्रञ्चोद्दिश्य वर्णयतीति कृतेरारम्भः । अस्याः कृतेः प्रकाशकाः श्रीवेङ्कटेश्वरविश्वविद्यालयस्य प्राच्यसंशोधनाकेन्द्रं, तिरुपतिः । अस्याः सङ्कलनकारः श्री.शङ्करनारायणर्यः । विभागक्रमः पटलः इति शब्देन कृतोऽत्र । इयं कृतिः पूर्णतया न लब्धेत्यादावेवास्य सङ्कलनकारः निवेदयति । आहत्य नवपटलाः प्राप्ताः । तेषु चर्चिताः अंशाः एवं सन्ति - प्रथमपटले गजानां व्युत्पत्तिरुक्ता । द्वितीयपटलः २८ विधाः गजाः तेषां गुणस्वभावाः, १६ विधाः उत्तमगजाः ये देव-गन्धर्व-

मनुष्यगुणप्रसूताः, तेषामुत्तमौन्नत्यं, गजवासस्थानानि, ८ विध सामान्यगजाः, ४ विधावरगजाश्च वर्णयति । तृतीयः पटलः, चतुर्थः पटलः, पञ्चमः पटलः त्रयोऽप्यध्यायाः गजग्रहणं वर्णयन्ति । तत्र पुनः उत्तमजातीयगजाः, वने तेषां सञ्चारः, सुलभगजग्रहणाय शुभलक्षणानि, दुर्गबन्धः, वारिबन्धः, करिणीबन्धः गर्तबन्धश्चेति चतुर्विधगजबन्धनक्रमाः अप्युक्ताः । षष्टः पटलः गजपालनं, राज्ञे गजानयनं, हस्तिपेष्वपेक्षिताः सुगुणाः अत्र चर्चिताः । सप्तमः पटलः नवगृहीतानां गजानां कृते निर्मास्यमानानां गजशालानां विषये चिन्तयति । अष्टमः पटलः गजानां लघुवयसि तेषां संवर्धनं तथा तेषां प्रणयादिकविषये ज्ञानं ददाति । नवमः पटलः - अस्मिन् पटले द्वितीयवर्षतः दशवर्षपर्यन्तं गजानां संवर्धनं, स्वभावाः च वर्णिताः । अग्रे गजानां कृते दीयमानं सप्तविधशिक्षणं सुष्ठूक्तं । एषा कृतिः अत्र समाप्ता भवति । अग्रे किमासीदित्यपि न ज्ञायते । अतः इयं कृतिः अपूर्णा वर्तते ।

४. मातङ्गलीला (नीलकण्ठविरचिता)

कृतिरसौ गजानां विषयमेव चर्चयत्सु पूर्णग्रन्थेषु अन्यतमा । अस्यां २५० श्लोकाः द्वादशाध्यायेषु निबद्धाः । अत्र अधिकारः इति नाम्ना विभागः कथितः । अधिकारे विद्यमानाः विषयाः तेषां अधिकारस्य नाम्ना एव ज्ञाताः भवन्ति यथा -

१. नागोत्पत्त्यधिकारः २. शुभलक्षणाधिकारः ३. अशुभलक्षणाधिकारः

४. अयुर्लक्षणाधिकारः ५. वयोलक्षणाधिकारः ६. माननिर्णयाधिकारः

७. मूल्यविशेषाधिकारः ८. सत्त्वलक्षणाधिकारः ९. मदभेदाधिकारः

१०. गजग्रहाधिकारः ११. गजरक्षणादिनर्तुचर्याधिकारः

१२. आधोरणगुणाद्यधिकारः (हस्तिपानां लक्षणान्यत्र कथितानि)

५. हस्त्यायुर्वेदः - (पालकाप्यविरचितः)

अयं कश्चनायुर्वेदग्रन्थः । अस्य प्रकाशनं पुणे नगरे विद्यमाने आनन्दाश्रम मुद्रणालयद्वारा कृतम् । अयं श्री.शिवदत्तशर्मणा संशोधितः । महादेव चिमणाजी आपटे महोदयेन द्वारा प्रकाशितः ।

ग्रन्थे चत्वारः भागाः सन्ति । प्रत्येकोऽपि भागः 'स्थान' इति शब्देन निर्दिष्टः । प्रत्येकस्मिन्नपि स्थाने अनेके अध्यायास्सन्ति । ग्रन्थेऽस्मिन् आहत्य १६२ अध्यायास्सन्ति । अत्र गजानामारोग्यसम्बन्धिताः अंशाः विशदतया निरूपिताः । एतेषां स्थानानां नामान्येवं सन्ति यथा - महारोगस्थानम्, क्षुद्ररोगस्थानम्, शल्यस्थानं उत्तरस्थानमिति । प्रथमे महारोगस्थाने विंशत्यध्यायास्सन्ति । आदिमाः सप्ताध्यायाः गजानां वनचरणं, तेषामाहारादिक्रमाः, तेषां सात्म्यं, तेषां रक्षणोपायाः इत्याद्यनेकान्नुद्दिश्य कथयन्ति । गजानां विविधाः ज्वर-पाण्डु-आनाह-मूर्च्छा-शिरोरोग-शोफ-नेत्ररोगाः एवं विविधशरीरभागेषु सम्पत्स्यमानानां विविधरोगाणां लक्षणानि, तेषां विधाः यथा वात-पित्त-कफ-सन्निपातकारणेन जातानां रोगाणां चिकित्साहेत्वौषधोपचाराः भृशं वर्णिताः अवशिष्टेषु त्रयोदशाध्यायेषु ।

क्षुद्ररोगस्थानं नाम द्वितीये, गजानां क्षुद्ररोगाणां वर्णनं दृश्यते । अस्मिन् ७२ अध्यायास्सन्ति । अस्मिन्नाहत्य ७२ अध्यायाः सन्ति यत्र एषां वारणानां अतिसार-विषभक्षण-सर्पदष्ट-हृदयदोष-गलग्रह-भूत-उन्माद-अपस्मारपीडितरोगाः, इत्यादीनां रोगाणां विवरणं, रोगकारणं, रोगलक्षणं, रोगोपचारः इत्याद्यंशाः स्पष्टीकृताः ।

तृतीयन्तु अतिविशिष्टं दृश्यते यत्र ३४ अध्यायेषु तेषां क्रियमाणाः शल्यचिकित्साविचाराः वर्णिताः । गर्भसम्भवः, गर्भस्यावक्रान्तिः, भग्नचिकित्सा, दन्तोद्धरणं, मूढगर्भापनयनम् इत्याद्याध्यायेषु अधिकतया गजानां शस्त्रचिकित्सा विशेषतया वर्णिताः ।

अत्र २९ तमः अध्यायः विशिष्यते यस्य नाम प्रदेशज्ञानाध्यायः । अस्मिन् गजशरीरे विद्यमानानां शरीरावयवज्ञानं प्रदत्तम् । चतुर्थे उत्तरस्थाने ३६ अध्यायाः विद्यन्ते यत्र तु गजानां आयुषः संवर्धनार्थं विविधाः औषधोपचाराः उक्ताः ।

एषामध्यायानां नामान्येव गजारोग्यवर्धनाय कार्यप्रयत्नान् कथयन्ति । अत्र प्राचीनभारतीयानां अस्मिन् विषये विद्यमानगजज्ञानं ज्ञापितं भवति । यद्यपि यत्रकुत्राप्यस्मिन् ग्रन्थे गजानाम् आन्तरिकचयापचयक्रियाणां विवरणसम्बन्धिताः अंशाः न उक्ताः तथापि तेषां रोगस्य ज्ञानाय, तत्चिकित्सार्थमेतज्ज्ञानमवश्यमेव वर्तते ।

६. कल्पनारत्नम्

इयं काचिल्लघुकृतिः । अस्याः रचयिता शिवमारः इति कश्चन भूपालः यो हि कर्णाटकस्य केषुचित्भागेषु राज्यं शशास ८-९ शतकयोः (७८८-८१२) । अस्यां कृतौ १५८ श्लोकाः वर्तन्ते । विभागः परिच्छेदः इत्युक्तः । पञ्च परिच्छेदाः दृश्यन्तेऽत्र । एतस्याः प्रकाशकः बेङ्गलूरुनगरे विद्यमानं पूर्णप्रज्ञासंशोधनमन्दिरम् । अस्याः सम्पादकः विद्वान् हेच्.वि.नागराज राव् योहि मैसूरुनगरस्थे प्राच्यविद्यासंशोधनालये संशोधकः अवर्तत । अस्यां गजदन्तानां कृन्तनाय पालनीयाः क्रमाः भृशं वर्णिताः । अस्यां गजलक्षणानि, गजानां जातयः विधाः, कर्त्यमानस्य दन्तस्य उपचारः, नवविधकल्पनाः, दन्तवृद्धिकालः, गजदन्तस्य गुणाः, पक्षपत्रं, दन्तकोशः इत्याद्यनेकेऽंशाः चर्चिताः ।

७. गजग्रहणप्रकारः -

अस्य रचनकारः कश्चन नारायणदीक्षितः । एतस्य परिष्कारः इ.आर्.श्रीकृष्ण शर्मा वर्येण कृतः । अस्य प्रकाशकः तिरुपतौ स्थितस्य श्रीवेङ्कटेश्वरविश्वविद्यालयस्य प्राच्यसंशोधनामन्दिरम् । अस्य ग्रन्थस्य पीठिकाभागे अस्य ग्रन्थस्य केचन ज्ञातव्याः दत्ताः यथा - अस्मिन् आहत्य ८८१ श्लोकाः सन्ति ये पञ्चधा विभक्तः । विभागः आश्वासः इत्याकारितः । एषु पञ्चाश्वासेषु गजप्रशंसा, तेषां ग्रहणोपायाः, गजोपलब्धिस्थानानि, गृहीतगजानां शिक्षणं, गजमौल्यनिर्णयः, तैस्साकं क्रीडा चेत्यादिकाः उक्ताः ।

एवं पूर्णतया गजविषयकाः उपलब्धाः (कर्त्रे) ७ ग्रन्थाः अत्रोल्लिखिताः । इदानीं प्रासङ्गिकरूपेण शास्त्रसम्बन्धिविषयाः उक्तान् ग्रन्थान् परिशीलयामः ।

प्रासङ्गिकरूपेण शास्त्रसम्बन्धिविषयाः उक्ताः केचन ग्रन्थास्सन्ति । ते अन्यैः विषयैस्साकं गजमपि उपयोगदृष्ट्या गुणदृष्ट्या तत्कालीनज्ञानानुसारेण उल्लेखनं कुर्वन्ति । एषु यद्यपि गजसम्बन्धितास्सर्वेऽशाः अनुक्ताः शास्त्रीयांशाः केचन अवश्यं दृश्यन्ते । केषुचित् ग्रन्थेषु गजानां कृते कश्चन विभागोऽपि पार्थक्येन कृतः दृश्यते ।

१. अर्थशास्त्रम् (कौटिल्यविरचितम्)

देशस्य राज्यस्य वा प्रशासनं तस्य विविधमुखं च विवृणोति इदं महाशास्त्रम् अर्थशास्त्रं नाम । देशस्य राज्यस्य अनिवार्यमङ्गं गजाः ये तु वाणिज्योद्देशकाः, सैन्यशक्तिवर्धनोद्देशकाश्च आसन् । इदं तु कौटिल्येन लिखितमिति जगत्प्रसिद्धमेव । चन्द्रिकाव्याख्यासहितमिदमर्थशास्त्रं विद्वान् हेच्.पि.मल्लेदेवरु इत्येतेषां प्रधानसम्पादकत्वे मैसूरुप्राच्यसंशोधनालयद्वारा प्रकाशितम् । अस्मिन् अध्यायद्वये प्रमुखतया गजविचाराः दृश्यन्ते । तौ तु अध्यक्षप्रकरणं नाम्नः द्वितीयप्रकरणस्य एकत्रिंशत्तमः द्वात्रिंशत्तमश्चाध्यायौ । पुनस्साङ्ग्रामिकमिति दशमेऽधिकरणे पञ्चमेऽध्याये गजानां व्यूहरचनाव्यवस्था उक्ता । नैतदध्यायविभागेऽन्तर्गतमिति परिगणितम् ।

हस्त्यध्यक्षः इत्यस्मिन्नध्याये हस्त्यध्यक्षकर्तव्यानि, हस्तिशालाकल्पनविधिः, हस्तिदिनचर्याः, हस्तिग्रहणविधिः, गजभेदाः, तदाहारव्यवस्थाश्च, गजशोभाः, व्यायामविधिश्च चर्चिताः । हस्तिप्रचारः इति द्वात्रिंशत्तमेऽध्याये शिक्षणानुगुणाः गजभेदाः, गजसम्बन्ध्युपकरणानि, गजपरिचारकवर्गभेदः तत्कर्तव्यानि च, गजशान्तिकर्मविधिः, गजदन्तग्रहणविधिः इत्येतेंशाः वर्णिताः । पुनस्तत्र दशमेऽधिकरणे हस्तिकर्मणि (चतुर्थेऽध्याये), हस्तिव्यूहाः (पञ्चमेऽध्याये) इति गजविषयकचर्चाः दृश्यन्ते ।

अग्निपुराणम्

अग्निपुराणं भारतीयज्ञानस्य विज्ञानस्य वा कोशः इति सर्वत्र श्रुतंवर्तते । विज्ञानसम्बन्धिताः अनेके विचाराः अत्र वर्णिताः । वेदव्यासः एषां सर्वेषामष्टादश-

पुराणानां रचयिता इति साम्प्रदायिकाभिप्रायः । २८७तमः अध्यायः गजानां विविध-रोगोपचारान् २९१तमः अध्यायः गजानां रोगनिवारणार्थं कल्पनीयान्विधीन् विवृणोति ।

बृहत्संहिता (वराहमिहिरस्य)

अयं ग्रन्थः गजानां विचारे अतिन्यूनविषयान् कथयति । अस्य ग्रन्थस्य ६७तमः अध्यायः यस्य नाम हस्तिलक्षणम् तथैव हस्तिचेष्टितं नाम ९४तमोऽध्यायः इति अध्यायद्वयं गजानां विषयं ब्रवीति । ६७तमोऽध्यायः भद्र-मन्द्र-मृग-सङ्कीर्ण इति विविधगजानां गुणान् ज्ञापयति । अत्रोक्ताः श्लोकास्सर्वे पराशरोक्ताः इति कथितम् । अस्य ग्रन्थस्य ९४तमेऽध्याये गजदन्तवेष्टनम्, गजशरीरस्य शुभाशुभलक्षणान्युक्तानि । तथापि मध्ये मध्ये गजविषयाः उक्ताः इत्यपि सन्ति ।

मृगपक्षिशास्त्रम्

अस्य ग्रन्थस्य लेखकः हंसदेवः इति कश्चन जैनविद्वान् इति श्रूयते । अस्य कालः प्रायः क्रि.श.१३ शतकम् । अस्य मण्डकः इति कस्मिंश्चित् ग्रामे वासः आसीत् । अयं जिनपदस्य राजा शौढदेव इत्यस्य आश्रयेऽऽसीदिति राज्ञः आज्ञानुसारं ग्रन्थमिमं व्यरचीति अस्य सम्पादकेषु अन्यतमा श्रीमति नलिनी साधले स्वाभिप्राये कथयति मृगपक्षिशास्त्रस्य व्याख्याभागे । अयं ग्रन्थः हैद्राबाद् कृषिविश्वविद्यालयतः प्रकाशितः वै.एल्.नेने तथा नलिनी साधले इत्यनयोः आङ्ग्लव्याख्यासहितम् ।

अस्मिन् ग्रन्थे भागद्वयं दृश्यते । प्रथमो भागः - नानाविधमृग-जातिस्वरूपादिवर्णनम्, द्वितीयो भागः नानाविधपक्षिजाति-स्वरूपादिवर्णनम् इति । प्रथमे भागे एकविंशति विभागाः सन्ति । प्रत्येकोऽपि विभागः श्रेणीति शब्देन कथितः । द्वितीये भागे १५ श्रेण्यः सन्ति । प्रथमश्रेण्याम् सिंह-व्याघ्र-तरक्षु-भल्लूक-गण्डकमृग-गजाश्वोष्ट्र-गर्दभ-वराह-महिष-वृषभ-धेनु-अज-हरिण-चमूरु-कपि-श्रृगाल-बिडाल-मूषक-शश-वृकाश्च विवरणमर्हन्ति । द्वितीयश्रेण्यां हंस-चक्रवाक-सारस-गरुड-गृध्र-काक-उलूक-शुक-कोकिल-मयूर-पारावत-कुक्कुट-चटक - लोहपृष्ट-खञ्जरीट-प्लवादिपक्षिणां विवरणम् अस्यां श्रेण्यां ज्ञायन्ते ।

गजगुणादिवर्णनं नाम षष्टश्रेण्यां १०७ श्लोकेषु गजानां वर्णनं वर्तते । श्रेण्याः आदावेव गजानां सामान्यरूप-स्वभावाः ३२ श्लोके उक्तः । एतदुत्तरं दन्तिनः (४), दन्तावलः(५.५), हस्तिनः (३.५), द्विरदाः (४.५), गजाः (५.५), भद्रगजाः (६.५) मन्दगजाः (६), मृगगजाः (४), सङ्कीर्णगजाः (४.५), मतङ्गजाः (५), पद्मिनः (५.५), इभाः (५.५), स्तम्बेरमाः (१५) इति विभागद्वारेण यथानिर्दिष्टश्लोकेषु गजानां विविधाः भेदाः विवृतास्सन्ति ।

मानसोल्लासः

अयं महाग्रन्थः अभिलषितचिन्तामणिः इत्यपि प्रख्यातः । अस्य रचयिता भूलोकमल्लः इति प्रसिद्धः चालुक्यराजः सोमेश्वरः । अस्य प्रकाशनं बरोडानगरे विद्यमानः केन्द्रीयग्रन्थालयः कृतवानस्ति । अयं तस्मिन्नेव ग्रन्थालये संस्कृतग्रन्थपालकपदे कार्यं कुर्वता श्री गजानन के. श्रीगोण्डेकर्वर्येण सम्पादितम् । ग्रन्थोऽयं पञ्चभागेषु विभक्तः । विभागस्तु अत्र विंशतिः इति कथितः । प्रत्येकस्मिन्नपि विंशत्यां विंशत्यध्यायास्सन्ति । अतः आहत्य अस्मिन् शताध्यायाः सन्ति । अस्य कालः क्रि.श.११२७तः - ११३८ पर्यन्तमिति कथ्यते । इत्यत्र द्वादशशतकस्य आदिभागः क्रिस्तशके इति कथनमर्हति । एवमस्य ग्रन्थस्य पीठिकाभागे सम्पादकः सूचयति ।

अस्य ग्रन्थस्य द्वितीयविंशत्यां तृतीयोऽध्यायः राष्ट्राध्यायः इति । अस्मिन् गजवनविभागलक्षणम्, वारिबन्धः, वशाबन्धः, अनुगतबन्धः, आपातबन्धः, अवपातबन्धः, गजशुभलक्षणम्, गजजातिभेदलक्षणम्, गजशिक्षानिरूपणम्, निधिः इति भागेषु गजविषयाः चर्चिताः । एवमेव अस्यामेव विंशत्यां षष्टे बलाध्याये गजचिकित्सा, गजौषधिनिघण्टुः इति पुनः गजविषयकचर्चा अवलोकितुं लभते । नाम्नैव ज्ञायते प्रथमे भागे गजबन्धनमित्याद्यंशाः द्वितीये भागे गजव्याधिविषयकांशाः चिन्तिताः इति ।

### शिवतत्त्वरत्नाकरः

अयं महाग्रन्थः बसवभूपालः इति केनचित् केळदिसंस्थानस्य राज्ञा लिखितः । अस्य ग्रन्थकारस्य कालः १६९४ तः १७१४ पर्यन्तमिति ज्ञातोऽस्ति । डा.जि.मरुळसिद्दय्यस्य प्रधानसम्पादकत्वे ग्रन्थोऽयं प्रकाशनं नीतः मैसूरु विश्वविद्यालयस्य प्राच्यविद्यासंशोधनालयः । आग्रन्थः नवसु विभागे विभक्तः । प्रतिविभागः कल्लोल इति नामाङ्कितम् । प्रतिकल्लोले अनेके तरङ्गाः सन्ति । नवकल्लोलाः, १०८ तरङ्गाः सन्ति ग्रन्थेऽस्मिन् । अस्य ग्रन्थस्य सप्तमकल्लोलस्य एकादशस्तरङ्गः गजवननिरूपणम् नाम गजशास्त्रसम्बन्धी कश्चनाध्यायोऽस्ति । गजसम्बन्धिताः अनेके अंशाः अत्र निर्दिष्टाः २२६ श्लोकेषु ।

### नामलिङ्गानुशासनम् (अमरकोशः) हलायुधकोशश्च

एते कोषग्रन्थाः यत्र शब्दानामावलिः, समानार्थकशब्दानां, तेषां व्युत्पत्तिश्च प्रदत्ताः । गजविषयेऽपि एते ग्रन्थाः बहूपकारिणस्सन्ति । विशेषतया अमरकोशस्य द्वितीयखण्डस्य सप्तमे भागे क्षत्रियवर्गे गजानां अनेके विषयाः उक्ताः । अस्मिन् ४९८ श्लोकतः ५०८ श्लोकपर्यन्तं गजानां विविधनामानि, करिणी, मदः, तेषां केचन अवयवाः, तेषामङ्कुषः, बन्धनवस्तून्यत्रोल्लिखितानि । हलायुधकोशेऽप्येवं गजविषयकाननेकानंशान् विवृणोति कोशकारः ।

### रामायणम्

आदिकाव्यमिति जगति ख्यातमिदं महर्षिणा वाल्मीकिना विरचितम् । रामायणस्यापि काले गजानामुपयोगः गजज्ञानचिन्तनमासीदेव । एतेन ज्ञायते यदस्मिन् देशे गजानामध्ययनमाबहुकालादवर्ततेति । अतः गजविषय-ज्ञानार्थमस्याध्ययनमत्यन्तमवश्यमेवेत्याभाति । रामायणे सप्त-काण्डाः, चतुर्विंशति-सहस्रश्लोकाश्च सन्ति । गजानां विविधस्वभावाः, जीवितस्य विविधकालेषु तेषां चित्तं, तेषां दन्तः, युद्धकौशलं, पराक्रमः, शुभाशुभावर्तगुणलक्षणानीत्यादिकाः अंशाः ४५० अधिकश्लोकेषु वर्णिताः ।

महाभारतम्

व्यासलिखितमहोन्नतग्रन्थेषु अग्रस्थानं भजते इदं महाभारतम् । लक्षश्लोकैस्समन्वितोऽयं महाग्रन्थः । महाभारतस्य कार्यक्षेत्रं तावत् हस्तिनावतीति । १८ पर्वसु लक्षश्लोकैर्बद्धमिदं, ज्ञानभण्डारम् एव इत्यत्र नैव सन्देहः । स्थूलरूपेण वक्तव्यं चेत् महाभारतकाले लक्षाधिकाः गजाः आसन्नस्मिन् देशे । कुरुवंशस्य राजधानी आसीत् हस्तिनावती (हस्ति सम्बन्धि नाम), भीमः नागायुतबलः, पाण्डवानां दहनार्थं ते वारणावतं प्रेषिताः, कुन्त्याचरितं गजगौरीव्रतं, अक्षौहिण्यां गजानां नियोजनं, भगदत्तस्य गजस्य शक्ति-सामर्थ्यं, द्रोणस्य पतनकारणं कुञ्जरः एव । एवं महाभारते गजानां वर्णनं साहित्यात्मकदृष्ट्या शास्त्रात्मकदृष्ट्या वा अतिप्रमुखतया स्वीकर्तुमर्हति गजशास्त्राध्ययनाय ।

कालिदासस्य कृतयः

जगन्मान्यकविषु कालिदासः अग्रस्थानमाप्नोति । यद्यपि तस्य देश-काल-जीवितविषये वाद-विवादाः अनेके, सः स्वकाव्यैः एव प्रथां भजते । काव्यानि यद्यपि वर्णनप्रधानानि शास्त्रीयांशाः न भवेयुरिति भावः आक्षेपार्हः । गजानां स्वभावानुसारं, गजानां शरीररचना, तेषां क्रीडा, तेषां सामर्थ्यं, तेषां वयस्सहजगुणाः, तेषां परिवारव्यवस्था इत्याद्यनेकेंऽशाः सामान्यतया गजज्ञानसंवर्धनाय साहाय्यं कुर्वन्ति । तस्य सर्वेऽपि गजोल्लेखदृष्ट्या विशेषतया अध्ययनं करणीयं भवति । क्वचित् पुनरुक्तिरिति काव्येषु, काव्ये एव क्वचित् कदाचित् भवितुमर्हति । तथापि कालिदासस्य काव्येषु शताधिकाः उल्लेखास्तु दृश्यन्ते एव ।

भारवेः किरातार्जुनीयम्

किरातार्जुनीयं महाकाव्येषु अन्यतमम् । यद्यपि महाकाव्यानि बहूनि सन्ति, यद्यपि पञ्चमहाकाव्यानीत्येव प्रसिद्धानि सन्ति अन्येषां विहाय अस्यैव भारवेः कुतः इत्यस्य प्रश्नस्य निर्दिष्टोत्तरं नास्ति । परं केवलमेकस्यैव कवेरपेक्षया अन्यस्य महाकाव्यस्याप्यध्ययनं युक्तमिति कृत्वा अस्याध्ययनमत्र स्वीकृतं वर्तते ।

किरातार्जुनीये वनजीवनमेव प्रधानम् । पाण्डवानां वनवासः, अर्जुनस्य तपः एवं सर्वमपि वनमयम् । विना गजमरण्यमपूर्णमिति कारणेन अयमेव ग्रन्थः चितः अध्ययनाय ।

नाटक - सुभाषितग्रन्थेभ्यश्च - संस्कृतसाहित्यक्षेत्रमपारम् । अत्र बहुसहस्र काव्यानि रचितानि । गजानामध्ययनदृष्ट्या प्रधानकाव्यविभागेभ्यः आंशिकरूपेण एकैकप्रकारकं काव्यमधीत्य तत्र विद्यमानगजविषयकम् अंशमत्रायोजितम् । नाटकविभागतः यद्यपि कालिदासस्य नाटकानि स्वीकृतानि तथापि तत्भिन्नान्यस्य कवेः किञ्चन नाटकं स्वीकर्तव्यमिति धिया भासस्य प्रतिज्ञायौगन्धरायणं, स्वप्नवासवदत्तमिति नाटकद्वयं, शूद्रकस्य मृच्छकटिकमित्येतानि नाटकानि अध्ययनाय स्वीकृतानि । सुभाषितग्रन्थेभ्यः भर्तृहरेः शतकत्रयम् स्वीकृतम् । बाणस्य हर्षचरिते उक्ताः गजविषयकाः सङ्गृहीताः । इदं काव्यं तावत् गद्यकाव्यस्य प्रतिनिधिरिव चितम् ।

गजशास्त्रमिति विषयोऽयं न केवलं संस्कृतभाषायां विद्यते परं अन्यसु भाषास्वपि विषयमेनमुद्दिश्य कृतयः रचिताः इति दृश्यन्ते । अत्र पुनः तेषामुल्लेखमात्रं क्रियते न अध्ययनदृष्ट्या । तेषु प्रधानकृतयः तिस्रः एका कन्नडभाषायाः द्वे मराठीभाषयोश्च । प्रथमम् अस्मिन् विभागे कन्नडस्य पुस्तकं यदाधुनिककाले प्राचीनशास्त्रोद्दिष्टम् ।

**ಗಜಶಾಸ್ತ್ರ ಪದಕೋಶ** (गजशास्त्रपदकोशः)

अयं कन्नडभाषायां लिखितः कश्चन कोशग्रन्थः । अयं तु आधुनिककाले ग्रथितः । अत्र न केवलं संस्कृतग्रन्थानां परं प्राचीनकन्नडस्यापि केचन ग्रन्थाः अधीत्यारचितः । अस्य पुस्तकस्य सङ्ग्रहकारः रचनकारः वा कन्नडभाषायामाधुनिकविद्वद्दिग्गजेषु अग्रतमः डा.श्री.टि.वि.वेङ्कटाचलशास्त्रिमहोदयः । भारतीयज्ञानविज्ञानक्षेत्रे इदं विशिष्टं स्थानं भजते यतो हि एतत् गजशास्त्रसम्बन्धितशब्दानां शब्दकोशः अस्तीति कारणेन । प्राचीन संस्कृत-कन्नडग्रन्थानां गजसम्बन्धिशब्दानां कोशः क्वचित् सविवरणम् । ९२ पृष्टात्मकमिदं पुस्तकं गजानां शताधिकान् विषयान् बोधयति । अत्र प्रधानतया

शास्त्रभागस्य बहूनां शब्दानां विवरणं कृतं दृश्यते । कदाचिदाधुनिकशब्दानामुल्लेखोऽपि दृश्यतेऽत्र ।

गजशास्त्रम् - (सेर्फोजि महाराजप्रणीतम्) -

शरभेन्द्रमहाराजविरचितं गजशास्त्रमिदम् । एतत् मराठी भाषायामस्ति । (यस्याङ्ग्लानुवादः मया कारितः) अत्र विद्यमानाः अंशाः एवं सन्ति -

प्रथमं प्रकरणम् - पालकाप्योत्पत्तिकथनम्

द्वितीयं प्रकरणम् -दिग्गजवंशप्रकरणम्

तृतीयप्रकरणम् - गजशापप्रसादकथनम्

चतुर्थप्रकरणम् - गजवननिरूपणम्

पञ्चमप्रकरणम् - गजोत्पत्तिचरितकथनम्

षष्टप्रकरणम् - गजवयोज्ञानलक्षणम्

सप्तमप्रकरणम् - गजलक्षणतत्धारणनिरूपणम्

अष्टमप्रकरणम्-भद्रादिलक्षणनिरूपणम्

नवमप्रकरणम् - ब्रह्मांशदिग्गजलक्षणनिरूपणम्

दशमप्रकरणम् - गजगतिदोषगुणनिरूपणम्

गजशास्त्रसारः-(रख्माजि पण्डितविरचितः)

इदं तञ्जावूरु सेर्फोजिसरस्वतीमहल् ग्रन्थालयतः लब्धम् । अस्य ग्रथनं १८२२तमे वर्षे समाप्तम् । अस्य सङ्कलनं राजेश्वरी ए कृष्णस्वामीमहादिक् राव् साहेब् द्वारेण कृतम् । अस्मिन् १९८ श्लोकाः सन्ति । विभागस्तु कथनमित्यस्मादेवाङ्कितम् । विभागनामान्येवं सन्ति-

१. पालकाप्योत्पत्तिक्रमकथनम्    २. दिग्गजोत्पत्तिकथनम्

३. गजशापानुग्रहकथनम्, ४. गजवननिरूपणम्
५. कालीयगजलक्षणनिरूपणम् ६. देशभेदगजलक्षणनिरूपणम्
७. गजग्रहणप्रकारकथनम् ८. गजजातिलक्षणनिरूपणम्
९. अंशगजलक्षनिरूपणम् १०. वर्णगजलक्षणम्
११. छायानिरूपणप्रकरणम् १२. गन्धलक्षणप्रकरणम्
१३. गजबलसत्त्वनिरूपणम् १४. सात्त्विकगुण्निरूपणप्रकरणम्
१५. गजनेत्रवर्णलक्षणम् १६. गजगतिलक्षणनिरूपणम्
१७. आवर्तलक्षणप्रकरणं १८. गजमहादोषनिरूपणम्
१९. परिमाणकथनप्रकरणम् २०. आसनलक्षणकथनप्रकरणम्

एवं शास्त्राध्ययनं यदि नूतनत्वेन उपस्थापनीयं, तस्य प्रधानोल्लेखाः, प्रासङ्गिकोल्लेखाः, काव्योल्लेखाः अन्यभाषायां विद्यमानोल्लेखाः चेति सर्वज्ञानस्रोतः अन्वेष्टव्यः भवेत् । एतैस्साकं पुनः अयमाधुनिकवैज्ञानिकक्षेत्रेऽपि प्रसिद्धः विषयः इति कारणेनाधुनिकज्ञानसम्पन्नाः ग्रन्थाः अपि कदाचिदवलोकनीयाः । एतेषां ग्रन्थानामुपयोगः पूर्णतया कृतः अस्मिन् प्रबन्धे । परं कदाचित् गजस्वभावः वैज्ञानिकदृष्ट्या आधुनिकविद्याद्वारेण वा ज्ञातव्यः चेत् उपयोगाय भवति ।

गजसंहिता

इयं कन्नडभाषायां लिखिता काचिदाधुनिककालस्य कृतिः । अस्याः लेखिका प्रज्ञा चौटा इति (कन्नडानुवादः बि.एस्.गुण्डुराव् निशा चौटा च) । अस्मिन्नष्टौ विभागाः कृताः । ते यथा पीठिका, गजानां पालनं कुत्र? आहारः, कार्य-कर्म, हस्तिपाः, आरोग्यसंरक्षणम्, न्यायिकविचाराः इति । अस्मिन्नाधुनिककाले गजानां पालनस्य कृते आवश्यकगजज्ञानविषयकांशाः भृशं वर्णिताः ।

## THE ILLUSTRATED ENCYCLOPAEDIA OF ELEPHANTS –

इदं पुस्तकं एस्.के.एलिङ्ग्हाम् बि.डेविड्हार्ड् इत्येताभ्यां सम्पादितं प्रबन्धानां सङ्ग्रहः । इदमाधुनिकवैज्ञानिकदृष्ट्या गजानामुत्पत्तिविकासौ, तेषां शरीरविचय-शरीररचना-कर्मकरणशास्त्रं (फिसियालाजि), तेषां सामाजिकं जीवनं, वंशाभिवृद्धिः, परिसरः, रोग-जीवितञ्च, कर्मनिरताः गजाः, भारतीयचिन्तने गजाः, भारतीयैतिहासिक-दृष्ट्या गजाः, दन्तानां क्रय-विक्रयः, तेषां संरक्षणमिति अनेकान् अध्यायानावहति । आधुनिकगजज्ञानं प्राप्तुम् इदं पुस्तकं बहूपयोगायास्तीति निश्चयेन वक्तुं शक्यते ।

## ELEPHANT – MAJESTIC CREATURES OF THE WILD

इदं बहुभिः वैदेशिकलेखकैः रचितानां प्रबन्धानां सङ्कलनम् । इदं एषियाखण्डस्य आफ्रिकाखण्डस्यच गजानां सर्वानप्यंशान् अन्तर्वहति रोगविषयं विना । इदं पुस्तकं प्रधानतया भागचतुष्टये विभक्तम् । ते तु विकासः-जीवशास्त्रञ्च, स्वभावः-परिसरश्च, गजाः-मानवाश्च, संरक्षणं-निर्वहणञ्चेति । एतदप्याधुनिक-गजशास्त्रज्ञानपिपासुभ्यः परिपूर्णप्रायं ज्ञानं यच्छति ।

## ELEPHANT THE LORD OF THE JUNGLE

इदं राकेश् बेडि द्वारा लिखितं पुस्तकम् । एतत् पुस्तकं आधुनिककाले वनगजानां स्थितिं गतिञ्च किञ्चित् ब्रवीति किञ्चिदाधुनिक-प्राचीनज्ञानसंयोगेन । अत्र गजानां विविधस्वभावाः, तेषां केचन स्वारस्यकरविषयाः अत्र प्रदत्ताः ।

## ELEPHANT - THE LADY BOSS

इदं सि.हेच्.बसवप्पनवर् इत्यनेन गजमुद्दिश्य लिखितं पुस्तकम् । इदं शताधिकैश्चित्रैः युक्तम् इति विशिष्टम् । अस्मिन् पुस्तके अयं लेखकः गजैस्साकं स्वस्यानुभावनपि सम्मेल्य गजविषयकविचारान् प्रस्तौति । कर्णाटकस्य बण्डीपुरप्रदेशे अयं लेखकः प्रायः अरण्याधिकारी आसीदिति कारणेन तत्रात्यान् गजविचारान्, सामान्य- विशेषगजविचारान् सुष्ठुतया उपस्थापयति । इदं पुस्तकं

पीठिकां विहाय, बण्डीपुरारण्यानि - गजानां देवालयः, वनेषु (गजानां) छाया, गजगणस्थानम्, किमर्थं ते तथा कुर्वन्ति, मदः - आशां अनुसरन्, गजानां चर्या, मिथ्या-कथाः-जानपदिकं-शिल्प-साहित्यम्, गजग्रहणं-पालनं-शिक्षणञ्च, कष्टकाले गजाः, २१ शतकादुत्तरमपि गजाः इति दशविभागेषु पुस्तकमिदं विभक्तम् । एवमेतदपि पुस्तकं गजज्ञानवर्धनाय उपयोगाय भवितुमर्हति ।

एवमाधुनिकगजविषयकग्रन्थाः अप्युपयोगाय भवितुमर्हन्ति । आश्चर्यकरविषयो नाम न कुत्रापि एष्वाधुनिककालीनग्रन्थेषु गजशास्त्रस्य वा प्राचीनगजज्ञानस्य वा उल्लेखः दृश्यते । न कुत्रापि संस्कृतशास्त्रसाहित्ये उक्तगजशास्त्रीयाः अंशाः ज्ञाताः ज्ञापिताः वा । न कोऽपि लेखकः वैदेशिको वा, भारतीयोऽपि वा प्राचीनगजशास्त्रस्य स्मरणमपि न कुर्वन्तीत्यत्र दौर्भाग्यमेव । प्रायः एषां ज्ञाने संस्कृतस्य चिन्तनस्य परिचयोऽपि नास्तीति मतम् । गजवैद्यविषयेऽपि आयुर्वेदस्य, हस्त्यायुर्वेदस्य वा चिन्तनं न दृश्यते एव इति महाखेदकरः विचारः ।

अस्यां पृष्ठभूमौ गजविषयकज्ञानं सर्वत्र प्रसारणीयमिति ज्ञापयति अयमध्यायः । गजविषयकज्ञानं, तत् गजशास्त्रं वा, आयुर्वेदभागो वा, गजमुद्दिश्यैव ग्रथिताः ग्रन्थाः वा लोकस्य परिचयहेतुना अध्येतव्याः । शास्त्रोक्तं गजचिन्तनं, काव्येषु विद्यमानं गजविषयकज्ञानम्, आधुनिक-प्राचीनयोः गजविचारकसंयोगः, भिन्नता वा अध्येतव्याः विषयाः । एवं बृहदस्ति गजविषयकसाहित्यम् । तस्मिन् क्वचिदल्पप्रयत्नः प्रचलति चतुर्णां ग्रन्थानां तौलनिकमध्ययनेनानेन ।

१.३ किमर्थं गजशास्त्रम् ?

गजस्तु सर्वप्राणिषु अत्युन्नतः अतिस्नेहवन्यजीवीति परिगण्यते । स्वस्थूल-शरीरेणैव सर्वानप्याकर्षयति एषः । अस्योपयोगिता तु असदृशाऽस्ति । अस्य पालनं पोषणं यद्यपि अतिसुलभं नास्ति तथापि बहवः एनं पालयन्ति विविधोद्देशैः ।

गजो नाम सामान्यजनेभ्यः कः बोधः ?

जनानां मनसि विज्ञानमाधुनिककालस्यैव योगदानमिति चिन्तितमस्ति । परन्तु प्राचीनेऽपि काले अस्य प्रयोगः, चिन्तनञ्च कृतमासीदिति वेदितुमयं प्रबन्धः उपकारी भवेत् । एते वन्यमृगाः; एतेषां ग्रहणार्थं महान् प्रयासः अवश्यकः । प्रथमं तेषां वासस्थानमन्वेष्टव्यम् । गणे विद्यमानानां गजानां वयः, कति वयस्काः, कति शिशु-बालाः इति सर्वमपि ज्ञातव्यम् । तेषु कार्ययोग्यगजाः के इति विज्ञाय ग्रहणाय कः क्रमः अनुसरणीयः इति निर्णीय तत्कृते सज्जतां कृत्वा कार्ययोजनं करणीयं भवति । एतत् दिवसस्यैकस्य कर्म न तु साप्ताहिकं पाक्षिकं वा भवितुमर्हति । गजग्रहणं न सुलभमपि । पालितगजानां द्वारा तेषामानयनं गजशालां, तेषां तत्र दिनचर्यादिकमपि पालनीयं भवति । गजानां शक्तिः अपारा । अतः आदौ तैरपि कश्चन विरोधः दृश्यते एव । गर्जनं, बद्धस्य रज्ज्वोः कर्षणम्, घट्टनं सर्वमपि कुर्वन्ति एव एते । तानपि हठाद्वा बलाद्वा अन्यपालितगजानां साहाय्यं वा प्राप्य तेषां प्रशिक्षणमवश्यं करणीयं भवति ।

अत्र पुनः तेषां कृते भाषायाः, सूचनानां च परिचयः कर्तव्यः भवति । तेषां रोषः यथा अधिकः न भवेत् तथा व्यवस्था करणीया भवति । कृतकर्मणः कृते मानं दातव्यं भवति यथा - योग्यस्य, श्लाघनीयस्य कार्यस्य च कृते इष्टाहारं, सान्त्वनं, प्रीणनं इत्यादि-रूपेण ; तथैव दुष्टकार्यस्य कृते, सूचनानामपालनस्य कृते च शिक्षा वा दातव्या भवति ।

एषां ग्रहणं यद्यपि न सुलभं तथापि एतान् गृहीत्वा पालयन्ति तेषां अपेक्षामपि अवगम्य । तेषामपेक्षानुसारं तान् कार्ये नियोज्य यथातृप्ति कार्यं साधयामो वयं मानवाः । तर्हि गजानां प्रयोजनं किमिति प्रश्नः सामान्यः एव । प्राचीनकाले युद्धादिसन्दर्भेषु गजानां शक्तिः बहूपकारिणी आसीत् । आधुनिककालेऽप्येषामुपयोगिता अनेकधा । अद्य प्रधानतया पालितगजाः धार्मिककार्यार्थं, व्यावहारिकोपयोगार्थमेव उपयुज्यमानास्सन्ति । परमरण्यगजानामावश्यकता तु अत्यन्ततया प्रामुख्यं भजते ।

यो जीवी स्वपरिसरस्य परिवर्तनं कर्तुं शक्नोति सः आङ्ग्लभाषया की-स्टोन् प्रभेदः (**KEYSTONE SPECIES)** इति परिगणितः । आधुनिकज्ञानानुसारं गजः

स्वबृहद्गात्रस्य कारणेन स्वस्य परिसरं सर्वदा परिवर्तनशीलं कर्तुं समर्थः । एतस्य प्राणिनः कारणेनैव अनेके जन्तवः उपकृताः, परिसरः अपि । कथमिति नाम -

(अ) अरण्यस्थानानि परिवर्त्य घासभूयिष्ठप्रदेशम् इति परिवर्तयति गजः ।

(आ) गजानां मृतदेहः बहूनां प्राणि-पक्षिणां कृते आहारः । तथैव विघटितमृतशरीरस्तु पुनः परिसरस्य विशेषतया मृदः फलवत्ततामधिकां करोति ।

(इ) गजलिण्डद्वारेण बहिरागतानि बीजानि सम्यगङ्कुरितानि रोहन्ति ।

(ई) अस्य लिण्डः कीटेभ्यः बहूपकारी अण्डनिक्षेपार्थं, सस्य-पादपेभ्योऽपि ।

(उ) गजेन कवलिताहारस्य ४४% केवलं जीर्णितं भवति । अतः अजीर्णितमाहारः आहारः भवति वानरेभ्यः ।

(ऊ) अवग्रहसन्दर्भेषु गजाः भूमिं खनन्ति जलमन्विषन्तः । एतैः खनितजलनिक्षेपेभ्यः अन्येऽपि प्राणिनः बहूपकृताः ।

(ऋ) यदा गजाः अरण्ये चरन्ति, ते भूमौ पादपेषु स्थितानन्नेकान् कीट-प्राणिनः वा स्थानभ्रष्टान् कृत्वा भक्षक-भक्षणचक्रमुज्जीवयन्ति ।

(ॠ) सिंहाः, मकराश्च गजान् गृहीत्वा स्वाहारमिति भक्षयन्ति । [1]

एतैरंशैस्साकं गजानां दन्तादीनामुपयोगं कुर्वन्ति स्म पूर्वम् । गजः पर्यावरणस्य नाशं करोतीति यद्यपि सर्वत्रापि उक्तः तथापि एतैः बीजप्रसारः सर्वास्वपि दिक्षु सम्भविष्यति । अस्य मूत्रस्य लिण्डस्य च कारणेन भूमिः फलवत्ततामाप्नोति । एवं गजानां संरक्षणेन आपर्यावरणं संरक्षितं भवति येन वनप्रदेशाः सुस्थिराः तिष्ठन्ति ।

उपर्युक्तविचारः आधुनिकः, व्यावहारिकश्च भागः । भारतीयदृष्टौ न केवलं व्यावहारिकदृष्टिः अपितु सांस्कृतिक-साहित्यक-सौन्दर्यात्मकांशाः अपि गजविषये सन्दृष्टाः प्राचीनकालतः आधुनिककालपर्यन्तम् । वेदेषु, रामायणे, महाभारते, पुराणेषु,

---

[1] – MAJESTIC CREATURES OF THE WILD इति पुस्तकस्य जेहेस्केल् शोष्नानिना लिखितात् Why Save Elephants इति प्रबन्धात् ।

काव्येषु वा गजानां प्रशंसा बहुत्र दृश्यते एव । विना गजपराक्रमवर्णनं कविमनः न तृप्यति ।

वेदेषु यद्यपि अनेकेषु प्रसङ्गेषु गजोल्लेखः दृश्यते प्रधानतया अत्रोदाहरणत्वेन द्वित्राः केवलं स्वीकृताः । गणपतिमन्त्रः इति विख्याते गणानां त्वा गणपतिं हवामहे इत्यस्मिन् गणपतिसूक्ते महाहस्ती दक्षिणेन इति हस्त्युल्लेखः वर्तते । श्रीसूक्तमिति प्रसिद्धे मन्त्रभागे हस्तिनादप्रबोधिनी इति कथिता सा देवता । तथैव पवमानमिति प्रसिद्धेषु ऋग्वेदस्य नवममण्डलस्य मन्त्रभागेष्वपि आधावता सुहस्त्या शुक्रा गृभ्णीत मंहना इति दृश्यते । अयमेव हस्तिनादप्रबोधिनीति विचारमेव प्रकटयितुमिव रामायणे सुन्दरकाण्डस्य षष्टसर्गस्य चतुर्दशे श्लोके लक्ष्मीं सेवमानं गजयुगलमेकमहमपश्यमीति हनूमतः विवरणं वर्तते । अत्र हनूमान् वदति यत् सः गजयुगलं स्वशुण्डयोः पद्ममेकं दधानं देव्याः अभिषेकं कुरुते स्मेति । [2]

गजशिक्षायां गजप्रशंसा

देवतानां वरमाहात्म्यसम्पदाः, बलयुक्ताः, चतुराः, वेगशीलाः, उन्नतशरीरधारिणः, बहुकार्ये समर्थाः, राष्ट्रस्य सम्पद्विवर्धकाः गजाः । ते पुनः मनुष्याणां सेवां कुर्वन्ति वाहनत्वेन आधोराणस्य चित्तवृत्तिमनुसरन्, वात्सल्येनपोषिताश्चेत् सुखेन निवसन्ति च । [3]

उत्तमकार्येषु गजाः सद्भटाः इव । कष्टकाले सुसखाः एते, सर्वदा जयावहाः । मनुष्यस्य सर्वेष्वपि वयस्सु एते वाह्याः । शुभलक्षणान्विताः गजाः सर्वदा गौरवार्हाः । जनेभ्यः पुण्यं ददति सुयोग्यकुलस्य, शान्तचित्तगजाः केवलं दर्शनमात्रेणैव । सैन्ये गजदलस्यैव प्रामुख्यम् । यत्र एते युद्ध्यन्ति तत्र विजयस्तु सुनिश्चितः । यत् कर्म सामान्यतया अश्वैरसाध्यं, भटैरप्यसाध्यं तदत्यन्तं सुलभेन गजाः साधयितुं समर्थाः । हस्तिनां कीर्तनं पोषणं दर्शनं तु न केवलं पुण्यकरं अपि च श्रेयः प्राप्तुमपि कारणम् । एषां वीक्षणार्थं बालानां मनः नितरामिच्छति बहुकालं यतो ह्येतेषां दर्शनमानन्ददायकम्

---

[2] रामायणस्य सुन्दरकाण्डे षष्टे सर्गे १४तमः श्लोकः ।

[3] श्लोकसङ्ख्या २७, २८ च, प्रथमः पटलः नारदस्य हस्तिशिक्षा ।

। गजाः युद्धेऽप्युपयुक्ताः भारवहनेऽपीति कारणेन गजाः सर्वदा पालनीयाः, गौरवमर्पणीयाश्च । करिण्यः दत्तं कार्यं निष्ठया विना दोषेण च साधयन्ति । परसेना-भञ्जनोत्सुकाः तेभ्यस्सदा यमसदृशाः । तेऽऽधोराणानां सङ्केतमवगच्छन्ति, शब्दमवहिताः श्रुण्वन्ति तथैव मुदां मनः आकर्षयन्ति च । स्वयूथे सर्वदा सुशान्ताः परं विक्रमे पौरुषपूर्णाश्च । मेघवत् कृष्णवर्णशरीराः, पर्वतोपमाः, शुभदाः, शुभावह-दन्तयुक्ताः, सौख्यं प्रयच्छन्ति आसनविषये च । ये मृगयार्थं गन्तुमिच्छन्ति तेषां कृते योग्यं साहाय्यं ददत्येते ये सर्वदा जलक्रीडासक्ताः । एते शीघ्रगामिनश्च क्वचित् तथैवैषां स्मृतिरपि दीर्घकालिका वर्तते । यदि प्रीत्यादरैः पालिताश्चेत् तेऽपि तुष्यन्ति यद्यप्याधोरकाणां विरोधम्, उपकारञ्च सम्यक् स्मरन्ति । दैवांशसम्भूताः, बलसम्पन्नाः, योग्यकुले जाताः, पर्वतोपमाः, गन्धववत्सर्वत्र स्वेच्छया विहर्तुमिच्छुकाः एते पर्वत-तट-काननप्रदेशेषु सर्वत्र सञ्चरन्त्यस्माकं पुण्यभूमिभारतस्य सर्वप्रान्तेषु लोकक्षेमाय । [4]

*युद्ध्यन्ति केवलं योधा वहन्त्येव हया रथान् ।*

*वारणास्तु नरेन्द्रार्हा युध्यन्ति च वहन्ति च ॥* [5]

पालकाप्यस्य हस्त्यायुर्वेदग्रन्थे प्रथमे महारोगस्थाने गजरक्षणविन्यासाध्यायो नाम पञ्चमेऽध्याये गजप्रशंसा एव कृता वर्तते । गजाः कुतः रक्षणीयाः इति वदन्तं पालकाप्यं रोमपादः पृच्छति - किमर्थं ते सर्वश्रेष्ठाः इति परिगणिताः इति । तदा पालकाप्यः उत्तररूपेण ६६ श्लोकयुतेऽध्याये गजान् भृशं प्रशंसति । गजाः देवजातयः, गजारूढः राजा शोभते, क्षुत्तृट्बाधितश्चाप्ययं नृपं न परित्यजति (तावती निष्ठा), विनयरूपेषु गृहीतेषु विक्रीतेष्वपि दासवत् पालकं परिपालयति, विनयश्चेदृषिवत्, क्रुद्धश्चेत् राक्षसवद्व्यवहरति, गजाः युद्धेषु स्वस्य रक्षणं कुर्वन्तः युध्यन्तेऽऽधोरकान् नृपान् च वहन्तः अपि, इत्याद्यनेकविधेन गजश्लाघनं करोति ।

*मोक्षात्परागतिर्नास्ति नास्ति वेदात्पराश्रुतिः।*

---

[4] आद्वितीयः पटलः हस्तिशिक्षायाम् ।

[5] मातङ्गलीलायां द्वितीये पटले ११तमः श्लोकः |

*नास्ति कृष्णात्परंभूतं नास्ति यानात्परं गजम् ॥*

*पृथिव्या भूषणं मेरुः शर्वर्या भूषणं शशी ।*

*नराणां भूषणं विद्या सैन्यानां भूषणं गजाः ॥* [6]

शिल्पकलायां -

भारतं तु देवालयानामागरः यत्र लक्षाधिकदेवालयाः विद्यन्ते । सर्वेष्वपि स्थानेषु विद्यमानाः देवालयाः शिल्पादीनां मूलस्थानं न भवति । परं केचन देवालयाः कदाचिद्देवादप्यतिरिच्य तत्र विद्यमानायाः कलायाः कृते वा सन्दर्शनीयाः भवन्ति । विशेषतया कर्णाटकस्य बहवः देवालयाः शिल्पकलास्वर्गाः इत्येव नामाङ्कितुं योग्याः । यत्र शिल्पः वर्तते तत्र तु अवश्यं भवति गजः । गजास्तु देवालयेषु यथा द्वारे, पट्टिकासु अन्तर्बहिः भित्तिषु वा यत्र कुत्रापि भवन्त्येव । कदाचित् शताधिकाः गजाः एकस्मिन्नेव देवालये द्रष्टुं शक्याः । कर्णाटकस्यातिप्रमुखदेवालयेषु होय्सळ देवालयाः, विजयनगरस्य (हम्पी) देवालयाः वा गजानां कदाचिदागराः गजशिल्पानाम् । बेलूरु, हळेबीडु, जावगल् (हासनमण्डले), बेलवाडि (चिक्कमगलूरु मण्डले), होसहोललु, सोमनाथपुरम् (मण्ड्य मण्डले) इत्यादिक्षेत्राणां देवालयाः प्रसिद्धाः होय्सळदेवालयेषु । एषु देवालयेषु गजपट्टिकाः सन्ति यत्र शतशः गजाः विविधाकृतिषु प्राप्ताः । एतासु शिल्पाकृतिषु गजेन साकं युक्ताः अनेककथाः अपि कथिताः यथा - गजमुखः - गणेशः, भीमभगदत्तयोः युद्धं, शिवस्य गजचर्माम्बरत्त्वम्, इन्द्रस्यैरावतारोहणम्, प्रह्लादस्य भक्तिपरीक्षणं गजाभ्यामित्यादयः । [7]

---

[6] पालकाप्यहस्त्यायुर्वेदः महारोगस्थानं, पञ्चमोध्यायः, श्लोको २२, २३ ।

[7] केभ्यश्चिज्जनेभ्यः केवलमेषु देवालयेषु गजाः पट्टिकासु सन्ति, अनेकसङ्ख्याकाः सन्तीति भावः । इतोऽप्यन्येष्वपि देवालयेषु गजाः विविधकथाधारकाः सन्तीति ज्ञातव्यमस्माभिः । विशेषतः बेलवाडि इति नामाङ्किते स्थाने गजानामाकाररूपादिषु भिन्नता वर्तते एव ।









उपरि विद्यमानाः शिल्पाकृतयः होय्सलदेवालयेषु सम्प्राप्ताः । गजगमनं, गजयुद्धं, सामग्रीणां संवहनं, तथैव प्रह्लादस्यच गजाभ्यां पीडनमेतैः शिल्पैर्ज्ञायते ।





एतेऽपि शिल्पाकृती होय्सलदेवालयेभ्यः एव

चिक्कमगलूरु-मण्डलस्य बेलवाडिनामकस्थले विद्यते कश्चन त्रयाणां देवानां आलयानां समूहः यत्तु होय्सलराजैः निर्मितः । अत्र सर्वत्रापि भित्तिषु विविधानां ५० अधिकगजानां शिल्पाकृतयः आरचिताः । एवं गजानां कृते एव विशिष्टं किञ्चन स्थानं दत्तमासीदस्माकं पूर्वसूरिभिः, महाराजैश्च ।







एतानि त्रीणि चित्राणि चिक्कमगलूरुमन्डलान्तर्गतस्स्य बेलवाडिग्रामे विद्यमानस्य वीरनारायणदेवालयस्य मन्दिरस्य भित्तिशिल्पेभ्यः।









हम्पी नाम विजयनगरस्य राजधान्याम् अद्यापि गजशाला काचित् दृश्यते । तत्र विद्यमानेष्वनेकेषु देवालयेषु गजसम्बन्धिनः शिल्पाः बहवस्सन्ति ।

एतानि शिल्पाकृतयः हम्पीस्थाने विद्यमानानां देवालयानां भित्तौ दृष्टाः ।

परं शोचनीयः विषयो नाम स्वयं भारतीयाः तथाकथितविज्ञानिनः गजशास्त्रविषये अज्ञानिनः इति । अस्य विषयस्याध्ययने प्रमुखतया कानिचन आङ्ग्लभाषायाः पुस्तकानि स्वीकृतानि । पुस्तकद्वयं तु वैदेशिकैः प्रकटितम् यत् जगन्मान्यमिति कथयन्ति । परं तत्र लिखितवतां भारतीयानां भारतविषये, भारतीयगजशास्त्रीयपरम्पराविषये, प्राचीनज्ञानशाखाविषये न किमपि ज्ञानमासीदिति स्पष्टं ज्ञायते यतो हि रामायण-महाभारतादिषु, पुराण-अर्थशास्त्रादिषु, काव्य-नाटकेषु, आक्रामकानां काले गजानां स्थिति-गतिं केवलं वर्णयन्ति बर्हिष्टाद् न अन्तस्सत्वानुषङ्गेण । न कुत्रापि शास्त्रत्वेन गजस्योल्लेखः दृश्यते । काव्य-नाटकेष्वपि न शास्त्रत्वेन परं केवलमुल्लेखार्थं विद्यते गजविषयः । तत्र केवलं पाश्चात्य-आधुनिक-वैज्ञानिकदृष्ट्या तैरधीताः विषयाः अस्माकं भारतीयविज्ञानिभिरपि उल्लिखिताः । वैदेशिकास्तु न जानीयुरस्माकं ज्ञानपरम्पराम् । भारतीयलेखकाः अपि ? इत्यस्य परिणामः भारतीयगजशास्त्र-ग्रन्थानां, गजज्ञानानां, ज्ञानशाखानां जगतः परिचयः नास्ति । यदि वा जगतः पुरतः एषामुपस्थापनं न क्रियते चेत् दोषः कस्य ?

परं भारतीयप्रकाशकैः प्रकाशितं पुस्तकं किञ्चन किमपि वा उल्लेखं करोत्यस्मिन् विषये । इदं लघु किञ्चन पुस्तकं यत्र तु गजशास्त्रस्य उल्लेखः न दृश्यते परं पालकाप्यहस्त्यायुर्वेदग्रन्थः एव उल्लिखितः । तत्र विद्यमानः विचारः यद्यपि सत्याद्दूरमेव स्यादुत सत्यमेव स्यात्तथापि, जगतः परिचयार्थं विशिष्टं कञ्चन विषयं प्रतिपादयति । [8]

प्रश्नः विचित्रः तथापि प्रष्टव्यश्चेत्, किं महाभारतकाले गजाः आसन्वेति । सर्वत्र सर्वेऽपि जानन्त्येव यत् महाभारते गजसैन्यमेव बृहत्तासीदिति । एकस्यामक्षौहिणीसेनायां २१,८७० गजाः आसन्निति जानीमः । [9] महाभारतयुद्धे अष्टादशाक्षौहिणीसैन्यस्य नाशः समभवदित्यत्र अष्टादशदिवसीययुद्धे ३,९३,६६० गजाः

[8] रमेशबेडिवर्येण लिखिते Elephant The Lord of the Jungle नामकपुस्तके पृ.सं ८३ मध्ये हस्त्यायुर्वेदस्य (यो हि १८९४ मध्ये प्रकाशितः), पुष्टसङ्ख्या ६४६ मध्ये ५६त्तमश्लोके गजेभ्यः दीयमानानामनेकानां धान्यानामुल्लेखः वर्तते । तस्यैव पृष्टस्य टिप्पणिभागे पुनः अस्य कालः १० शतकमपि उक्तोऽस्ति ।

[9] शब्दार्थकौस्तुभः, प्रथमसम्पुटम्, पृ.सं ११ ।

मारिताः इति । तस्मिन् काले गजसम्पत्तिः आदेशे कति आसीदिति एतयैव ज्ञातुं शक्यते ।

भारतीयसंस्कृतौ दृश्यमानेष्वनेकेषु वैशिष्ट्येषु प्राणिनामुपयोगः अपि अन्यतमः । विशेषतया पौराणिककल्पनेषु प्रत्येकस्याः अपि देवतायाः वाहनत्वेन वान्यविषयत्वेन वा प्राणिनः उपयुक्तता दृश्यते यथा - शङ्करस्य गजचर्माम्बरम्, गणेशस्य गजमुखम्, विष्णोः आदिशेषे शयनत्वादित्यादिभिः। वाहनत्वेन इन्द्रस्य ऐरावतः (गजः), पार्वत्याः सिंहः, गणपतेः आखुः, नारायणस्य गरुडः, अग्नेः मेषः, यमस्य महिषः इत्यादि । एते सर्वेऽपि पुराणग्रन्थेषु लभन्ते । गजाः एतैस्साकं दिग्गजत्वेनाप्युक्ताः ।

आधुनिककाले

बहुजनसमाज पार्टि नाम राजकीयसंघस्य लाञ्छनं गजः । अस्य उद्देशः एवं स्पष्टीकृतं तैः यद्गजाः स्वशक्त्या सामर्थ्येन च बहुमान्याः । महाकायाः परं शान्ताः । अस्य राजकीयसङ्घटनस्यापि भावः यत्तथाकथितदलिताः समाजे सुप्ताः परं अतिसामार्थ्यवन्तः । गजवत्तेषामपि शारीरक-बौद्धिकशक्तिर्वर्तते इति । अतः समाजस्य उच्चवर्गे विद्यमानाः शक्तीः निवारयितुं वयं समर्थाः इति द्योतयितुं गजः लाञ्छनत्वेन स्वीकृतः ।[10]

गजाः शक्तिशालिनः इति आधुनिककालेऽपि सामान्येभ्यः अपि ज्ञापयन्ति विज्ञापिकाः । अम्बुजा सिमेण्ट् विज्ञापिकायाम् अम्बुजासिमेण्ट्द्वारा निर्मितां भित्तिं भङ्क्तुं गजोऽप्यसमर्थः इति दर्शितः । तथैव फेविकाल् नामक संश्लेपकवस्तुनः चिह्नमपि गजद्वयोः कर्षणम् फेविकाल् इति नामाङ्कितस्य फलकस्य । मुत्तूट् फैनान्स् इति संस्था या कैरलीया यत्र गजाधिक्यं दृश्यते, तस्याः संस्थायाः लाञ्छनेऽपि गजौ दृश्येते ।

प्रथमं स्मर्तव्यं यदस्माकं राष्ट्रलाञ्छने गजोऽपि वर्तते इति । अस्माकं राष्ट्रलाञ्छनं सारनाथस्य अशोकस्तम्भः, यत्र स्तम्भस्थितचतुर्णां गजानां प्रतिमास्सन्ति।

---

[10] http://www.elections.in/political-parties-in-india/bahujan-samaj-party.html

एवं गजाः नाम भारतीयेभ्यः कश्चन अज्ञातजीवी नास्ति । नास्ति कोऽपि भावः भयमुत्पादयितुं न वा कोऽपि लाघवं प्रकटयितुं गजविषये । संस्कृतेः भागवच्छोभतेऽयं महाजीवी सहस्रादिकवर्षेभ्यः आराष्ट्रे । सर्वेषु प्रान्तेषु, सर्वासु जातिषु, सर्वासु भाषासु समानरूपेण वर्णितः कोऽपि वा वनजीवी नाम सः गजः एव । अस्य विचारयुतस्य शास्त्रस्य अध्ययनं नाम सर्वेषां ज्ञानवर्धनायेति ।

# द्वितीयोऽध्यायः

## संस्कृतकाव्यसाहित्ये गजाः -

(अत्र प्रमुखतया रामायण-महाभारताभ्यां, केभ्यश्चिद्गद्य-पद्य-नाटकग्रन्थेभ्यः कृताः गजविषयकाः अंशाः उक्ताः भवन्ति । ग्रन्थविस्तारभयात् अत्र रामायणस्य, महाभारतस्य, कालिदासीयकाव्यानां, भासनाटकस्य, भर्तृहरेः त्रिशतकानां, बाणस्य हर्षचरितमिति काव्येभ्यः आंशिकरूपेणैव गजविचाराणां चयनं कृतं वर्तते ।)

गजानामितिहासः प्रायः मनुष्याणां नागरिकतामप्यतिरिच्यते इति कथयति आधुनिकविज्ञानम् । गजानामितिहासः आबहुकालाद्विद्यते एव । गजानां गुण-स्वभावाः, तेषामुपयोगाः, तेषामवसथस्थानानि च जनेभ्यः बहुकालादेव चिरपरिचितम् । जगतः प्राचीनेतिहासः विषयममुं स्पष्टं प्रसारयति । प्राचीनगजशास्त्रकोविदाः गजविषयकज्ञानं स्वमत्यनुसारमुपस्थापितवन्तः । एतेन सिद्ध्यति यच्छास्त्ररक्षकाः, विद्वांसश्च अस्य संरक्षणमकुर्वन्, अस्मिन् गजसम्बन्धिताः अनेकेंऽशाः वर्तन्ते इति कारणात् ।

संस्कृतसाहित्यमगाधम् । अत्र गद्य-पद्य-चम्पू-कथा-स्तोत्र-सुभाषित-नाटकेत्याद्यनेके प्रभेदाः विद्यन्ते । अत्र मुख्यवस्तुना साकं अनेकानि वैविध्य-पूर्णान्युदाहरणानि कृतानि । एतेषु काव्येषु तत्कालीनेषु प्रसिद्धिं गतेषु ज्ञानक्षेत्रेषु विद्यमानानामंशानां विशदीकरणं कृतम् । सामान्यतया प्रकृतिरेव तेषां आराध्य-दैवमासीत् प्रायः । अत्र पुनः पञ्चभूतानि, प्रकृतौ दृश्यमानानि विविधरूपक-वैशिष्ट्यानि यथा सूर्यः, चन्द्रः, नक्षत्राणि, दिवा, रात्रिः, सन्ध्याकालौ, वृष्टिः, तडित्, मेघः, तुषार-हिम-गिरि-पर्वत-काननानि, ऋत्वनुसारमेषु परिवर्तनानि, केचन प्राणिनः, केचन पक्षिणः, प्राणि-पक्षिणां स्वभावाः, गुणाः, दोषाः, जीवनशैली, वृक्षाः, नदी-नद-सागर-कूप-वापि-तटाकादीनि जलस्थानानि, वायुः, अग्निः, भूमिरिति बहुविधचिन्तनं विविधायामेषु प्रचिन्तिताः । एषु अत्रदत्तचित्तविषयोऽस्ति गजः ।

अतः गजानां विचारे विद्यमानानां वर्णनानामुल्लेखानां वा कथनम् आदिकाव्याद्रामायणादेवारभते । आदिकविना वाल्मीकिना ग्रथितेऽस्मिन्, गजानां वर्णनानि न केवलं काव्यदृष्ट्या अपितु शास्त्रदृष्ट्याऽपि कृतानि दृश्यन्ते । इत्यत्र स्पष्टं भवति यत् शास्त्रज्ञानमस्माकं पूर्वमेवासीत् येषां क्रमबद्धनिरूपणमेकत्र पश्चात्काले निबद्धमिति । रामायणस्य सप्तकाण्डेषु चतुश्शताधिकस्थानेषु गजानामुदाहरणं विद्यते ।

काण्डशः अस्याध्ययनेन अनेके विचाराः ज्ञायन्ते चेदपि अत्र सामान्यांशाः शास्त्रीयांशाः चेति भेदौ कर्तुं शक्यते । सामान्यांशेष्वन्तर्गताः भवन्ति ते विचाराः ये सामान्यजनैरपि किञ्चित् ध्यानं दत्वापि ज्ञातुं शक्यन्ते । तस्य कारणमित्यादिकाः अप्यत्राप्रस्तुताः । विशेषः इति विभागे गजानां विषये केचन ज्ञापकांशाः इति वक्तुं शक्यन्ते । एतेऽंशाः कदाचित् विचारपरामर्षेण ज्ञाताः भवेयुः । परं शास्त्रीयांशास्ते ये शास्त्रोक्तानां विशेषाध्ययनेनैव ज्ञायन्ते । तेंऽशाः शास्त्रीयत्वेनापि अधीयन्ते तेषां शास्त्रीयता शास्त्रेषूक्ताः चेति कारणाभ्याम् ।

गजोल्लेखाः बालकाण्डे ३४ स्थानेषु, अयोध्याकाण्डे १२१ स्थानेषु, अरण्यकाण्डे ३५ स्थानेषु, किष्किन्धाकाण्डे ५० स्थानेषु, सुन्दरकाण्डे ५७ स्थानेषु, युद्धाकाण्डे १३९ स्थानेषु, तथा ३५ काण्डेषु दृश्यन्ते । एवमाहत्य ४७१ स्थानेषु गजोल्लेखाः दृश्यन्ते आरामायणे ।

न सर्वे अंशाः अत्रोच्यन्ते प्रबन्धविस्तारभयात् । प्रथमकाण्डद्वयोरेव केषाञ्चन विचाराणां चिन्तनमत्र प्रस्तूयते । प्रथमं बालकाण्डात् ।

| क्र | गजविचारः | श्लोकः | सर्गः | पृष्ट सङ्ख्या |
|---|---|---|---|---|
| १ | गजानां शिक्षणम् | १३ | ५ | ४५ |
| २ | गजजातयः * | २३,२४,२५ | ६ | ५२ |
| ३ | गजशालाः | १२ | १३ | ८४ |
| ४ | गजस्य बृहद्गात्राम् | १८ | १७ | ११४ |
| ५ | गजस्य मदः | २९ | १७ | ११४ |
| ६ | गजवाहनम् | २७ | १८ | १२३ |

| | | | | |
|---|---|---|---|---|
| ७ | गजाः चतुरङ्गसैन्यस्य भागाः आसन् । | (३, १०), २१, ९-१३, ११, ४, २३, ३,७, ३ | २०, ५१, ५२, ५४, ५५, ६६, ६८, ६९, ७७, | (१३४), २८६, २८९, २९८, ३०१, ३५८, ३६९, ३७०, ४१३, |
| ८ | गजसहस्रस्य शक्तिः ताटकायाः | १४-२५ २, ७ | २४ २५ | १५३-१५४ १५६-१५७ |
| ९ | दिग्गजाः पू-विरूपाक्षः, उ-भद्रः द-महापद्मः, प-सौमनस्, | १३-१४, २०-२१ ७,८,९ | ४० ४१ | २२८ २३२ |
| १० | गजगतिः | २, १८ | ४८, ५० | २६८,२८१ |
| ११ | गजाः बद्धाः स्वर्णनिगडैः | १८ | ५३ | २९५ |
| १२ | गजबन्धनशाला | ३ | ७० | ३७८ |
| १३ | गजानां दानमुपहाररूपे | ५ | ७४ | ३९७ |

* यथैरावत-पुण्डरीक. . ., तथैव भद्र-मन्द्र-मृगजातयः ।

## कोष्टकः - २

अयोध्याकाण्डादिदानीम्-

| क्र | गजविचारः | श्लोकः | सर्गः | पृ.सं |
|---|---|---|---|---|
| १ | गजानां शिक्षणं वाहनञ्च | २८, ९६ | १,१२ | ६,१०७ |
| २ | गजारोही युवराजः | २२, ३६, १२, २३ | २, १४, १५, १६ | १५, १२३, १३२, २२४ |
| ३ | चतुरङ्गसेनाभागः | १०, ६, ७ | ३, ३३, ५१ | २३, २७०, ३८८ |
| ४ | शुभगजः | १० | ३ | २३ |
| ५ | मदान्वितस्य गजस्य गतिः | २८ | ३ | २७ |
| ६ | गजान् भाययन्ति सिंहाः कानने | ३६ | ८ | ६२ |
| ७ | गजदन्ताः अलङ्कृताः | १४ | १० | ७९ |
| ८ | गजः करिण्याः कृते शोचति (२) करिण्यः गजस्य व्रणं शोचन्ति | २६, २३, २४ | १०, ३०, ४० | ८१, २४८, ३२४ |
| ९ | रामस्य शत्रुञ्जयगजः | ४७-४८, १० | १५, ३२ | १३८, २६१ |
| १० | गजस्यालङ्करणम् | ४७- ४८ | १५ | १३८ |
| ११ | गजशिशवः | ३० | १६ | १४४ |
| १२ | गजस्य बृहद्गात्रम् | ३४ | १६ | १४५ |

| | | | | |
|---|---|---|---|---|
| १३ | गजस्य निःश्वसनम् | ८, ४७, २१, २२ | २०, १६, ४१, ५० | १७०, १४८, ३३२, ३८१ |
| १४ | गजचलनं नगरेषूत्सवेषु च | ४८, ५, २२ | १६, ७, ५१ | १४८, ५०, ३९० |
| १५ | गजसम्पद्युक्तराज्यम् | ३८ | १८ | १५९ |
| १६ | मदगजस्य पथा । | ५४ | २१ | १८८ |
| १७ | गजशुण्डस्य चलनम् | ४ | २३ | १९८ |
| १८ | गजस्योपयोगः युद्धेषु | ३४ | २३ | २०४ |
| १९ | गजस्य मर्मस्थानानि | ३७ | २३ | २०४ |
| २० | वनगजाः (गजगमन-मार्गाः शुभमार्गाः) | १९, २१,३, ३, २३-२७, | २६, २७, २९, ३१, ३३, ५४ | २१६, २३२, २३५, २५३, २७३, ४२३-२४ |
| २१ | गजेभ्यः काश्चन नद्यः अगाधाः | ९ | २८ | २३५ |
| २२ | गजान्वेषणं मृगयया | २-६,१८-९ | ३५, ४० | २९२, ३२२ |
| २३ | गजसम्बन्धितवस्तूनि (रज्जुः..) | ३, ४२, ६ | ३७, ४०, ४८ | ३००, ३२६, ३३८ |
| २४ | दुःखे न खादन्ति, अश्रुयुक्ताः | १०, २७ | ४१, ५१ | ३२०, ३९१ |
| २५ | गजाः नदीतटे धूलीयुक्ताः | १७ | ४२ | ३३५ |
| २६ | गजगतिः | ६, ३१ | ४३, ४८ | ३४०, ३७२ |
| २७ | गजाभ्यां साकं करिणी गच्छति | ३०-३४ | ५६ | ४३० |
| २८ | गजगमनं नगरेषु | ७, २४, २०, २, २५ | ५७, ७१, ८६, ११४(२) | २, ९८, १८५, ३६५(२) |
| २९ | नवगृहीतः स्वस्वास्थ्यं शोचति | ७ | ५८ | ८ |
| ३० | गजस्य बृंहणादिकम् | २२-२३, १२ | ६३, ३०५ | ४१, ३०९ |
| ३१ | गजस्य जलपानं, ध्वंसनम् | २०,१४-१५,१८ | ६३, ६४, ९५ | ४९, २४३ |
| ३२ | करिण्यःगजमृत्युमनुशोचन्ति | २१, २५ | ६५ | ६५ |
| ३३ | गजनियन्त्रणं कष्टमराजके | २०, २४ | ६७, ८८ | ७५, १९६ |
| ३४ | गजवनवैविध्यम् | २०, २३-२५ | ६८, ७० | ८२, ९१ |
| ३५ | गजदन्तपतनं चूर्णनमशुभम् | १२ | ६९ | ८२ |
| ३६ | गजः उपहारत्वेन | १९ | ७० | ९१ |
| ३७ | गजविधः भद्रादि | ८ | ७१ | ९५ |
| ३८ | गजगाम्भीर्यम् | २३ | ७२ | १०६ |
| ३९ | रज्जुबद्धगजाः | ३७ | ७२ | १०९ |
| ४० | गजसम्पद्युक्तराज्यम् | १६ | ७५ | १२७ |

| | | | | |
|---|---|---|---|---|
| ४१ | गजाः चतुरङ्गस्य भागाः | २७, ९, २२, ८, १३, ३४-३८, १२, २९, ३०, ४०, २०, ६, ११ | ७५, ७९, ८२, ८६, ९२, ९३, ९६ (२), ९७,१००, ११३, ११४, ११५ | १२९, १५२, १६६, १८३, २२५, २२९, २४५(२), २५५, २७६, ३६३, ३६५, ३७३ |
| ४२ | गजाः वाहनत्वेन, जलेऽपि | १४, ३२, ३, १९, #१९, ६०,१९ | ८१, ८२, ८३, ८३, #८९, ९१, ९६, | १६१, १६८, १६९, १७२, #२०१, २१७, २४५, |
| ४३ | गजमदः | २५, ८ | ८६, ९१ | १८६, २०६ |
| ४४ | गजः पतत्यङ्कुशप्रयोगेण | ३ | ८७ | १८७ |
| ४५ | गजाः पर्वतसदृशाः | १९, ३, ४२ | ८९,९३, ९९ | २०१, २३१, २६२, |
| ४६ | गजशालानिर्माणम् | ३२ | ९१ | २१३ |
| ४७ | वाहनानां गजानां पालनम् | ५५ | ९१ | २१७ |
| ४८ | आधोराणकाः स्वगजमभिजानन्ति | ५७ | ९१ | २१७ |
| ४९ | गजाः पद्मसरस्सु स्नान्ति | ७८ | ९१ | २१७ |
| ५० | गजाः गणे चरन्ति | १, ८ | ९३, ९६ | २३०, २४५ |
| ५१ | गजमर्दनं सस्यानाम् | ९, ३ | ९३, ११७ | २३१, ३८२ |
| ५२ | मदगजेन वृक्षपातनम् | २६ | ९६ | २४५ |
| ५३ | बृहच्छतृञ्जयगजः | २५ | ९७ | २५४ |
| ५४ | गजानां तीक्ष्णदन्ताः | ११ | ९९ | २६१ |
| ५५ | गजवनानां पालनम् | ५० | १०० | २७६ |
| ५६ | गजग्रहणार्थं करिणीनाम् उपयोगः | ५० | १०० | २७६ |
| ५७ | गज-करिणीनां समतोलनम् | ५० | १०० | २७६ |
| ५८ | गजानां वप्रक्रीडा | ४ | १०२ | २८७ |
| ५९ | गजमदस्रावः क्रोधे | ३७ - ४१ | १०२ | २९१ |
| ६० | मदगजस्य महाश्वासः | १५ | १०४ | ३०४ |
| ६१ | राज्ञः गजारोहणम् | २९, १ | ११२, ११३ | ३५६, ३६० |

कोष्टकः - ३

इत्थं रामायणस्य काण्डद्वये एव शताधिकान्युदाहरणानि उपलभ्यन्ते गजानां विषये । तर्हि इतोऽप्यन्यकाण्डेषु गजानामनेकविचाराः परिचर्चिताः ।

*<u>महाभारते गजाः</u>* -

महत्वात् भारवत्वात् महाभारतमुच्यते, यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्

क्वचित् इति विख्याते महाभारते गजानां विषयाः बहुत्र वर्तन्ते । अतः कृत्वैव सामान्यतया ज्ञापिताः विना अधोटिप्पणीः प्रदीयन्ते । महाभारतकालीना राजधानी हस्तिनावती, यत्तु हस्तिशब्दद्वारेणैवाकारिता । तत्र युद्धवीराः अनेके आसन् । भीमः नागायुतबलः । यथा रामायणे अत्रापि गजस्य शुण्डः, गजस्य गर्जनं, गजमदः, सिंहस्याघातः, गजस्नानं, गजस्योपरीत्याद्यान्युदाहरणानि सामान्यानि एव । राजनैतिकविचारेऽपि यथा अङ्कुशस्य सूचनां पालयति गजः तथैव राजादेशः जनानामङ्कुशवत् कार्यं निर्वहतीति ।

महाभारतस्य काले दक्षिणारूपेण गजानां दानमपि आसीदिति ज्ञायते । तथैव युधिष्ठिरः द्यूते सहस्रगजानां नष्टमनुभवति । अत्यन्तप्रामुख्यमाप्नोत्ययं विचारः यद्युद्धे तेषामुपयोगिता कथमासीदिति । चतुरङ्गसैन्यस्यातिप्रमुखभागाः आसन् गजाः । पत्तिरिति सेनायाः कनिष्ठतमं घटकम् यत्र १ गजः, १ रथः, ३ अश्वाः, तथैव ५ सैनिकाः आसन् । अक्षौहिणी सेनायाः गरिष्ठतमं घटकम् । अत्र तस्याः विवरणमेवं दत्तम्। [11]

| सेनाभागः | गजाः | रथाः | अश्वाः | पदातयः |
|---|---|---|---|---|
| पत्तिः | १ | १ | ३ | ५ |
| सेनामुखः | ३ | ३ | ९ | १५ |
| गुल्म | ९ | ९ | २७ | ४५ |
| गण | २७ | २७ | ८१ | १३५ |
| वाहिनी | ८१ | ८१ | २४३ | ४०५ |
| पृतना | २४३ | २४३ | ७२९ | १२१५ |
| चमू | ७२९ | ७२९ | २१८७ | ३६४५ |
| अनीकिनी | २१८७ | २१८७ | ६५६१ | १०९३५ |
| अक्षौहिणी | २१८७० | २१८७० | ६५६१० | १,०९,३५० |

कोष्टकः - ४

[11] शब्दार्थकौस्तुभः प्रथम सम्पुटम्, पृ.सं.८० ।

एकस्यामक्षौहिण्यां २१८७० गजाः नामाहत्य उपचतुर्लक्षगजाः १८ अक्षौहिणीसेनायां विनष्टाः कुरुक्षेत्रस्य युद्धे । भीम-भगदत्तयोर्घोरं युद्धं, युधिष्ठिरस्य अश्वत्थामो नाम कुञ्जरः हतः इति कथनव्याजेन द्रोणपतनमित्याद्युदाहरणानि युद्धे गजस्य पात्रं स्पष्टीकुर्वन्ति ।

कविकुलगुरुः कालिदासः जगतः अद्वितीयकविः । तस्य सप्तकाव्येषु काव्यसरस्वती एव प्रवहतीति जेगीयते विद्वन्मणिभिः । तस्य शैली, भावः, पाण्डित्यं, नम्रता सर्वमप्यनिर्वचनीयम् । तस्यापि काव्येषु गजानामतिप्रमुखं स्थानं तु वर्तते एव । अस्य कवेः कृतिष्वपि अनेके गजविषयकोल्लेखाः दृश्यन्ते । तत्पुनः सामान्यं शास्त्रीयाः इति विभक्तुमर्हाः । प्रथमं तस्य रघुवंशमहाकाव्ये विद्यमानाः गजांशाः (सामान्यांशाः शास्त्रीयांशाश्च)।

१. दिलीपः शापं न श्रुतवान् यतो हि गङ्गायाम् ऐरावतादिदिग्गजाः क्रीडन्ति स्म । [12]

२. देवदारुवृक्षेण वन्यनागः कश्चन स्वगण्डस्थलानां घट्टनेन तस्य त्वङ्नाशमकरोत्। [13]

३. वन्यान् गजान् भाययितुं कुम्भोदरः तत्र योजितः आसीत् । [14]

४. यथा कलभः काले महान् गजः भविष्यति, तथैव रघोरपि संवर्धनं जातम् । [15]

५. मदारम्भः गण्डस्थलस्य प्रभिन्नेन भवति । [16]

६. इन्द्रस्य गजस्य नाम ऐरावतः यो नैरन्तर्येण अङ्कुशेन नुदितः । [17]

७. रघोः गज इव गम्भीरगतिरासीत् । [18]

८. सप्तपर्णवृक्षस्य सुवासितैः पुष्पैः गजाः सप्तभिरपि स्थानैः मदं स्रावितवन्तः । [19]

---

[12] कालिदासरघुवंशस्य प्रथमसर्गस्य ७८तमः श्लोकः ।
[13] कालिदासरघुवंशस्य द्वितीयसर्गस्य ३७तमः श्लोकः ।
[14] कालिदासरघुवंशस्य तृतीयसर्गस्य ३२तमः श्लोकः ।
[15] कालिदासरघुवंशस्य तृतीयसर्गस्य ३४तमः श्लोकः ।
[16] कालिदासरघुवंशस्य तृतीयसर्गस्य ३७तमः श्लोकः ।
[17] कालिदासरघुवंशस्य तृतीयसर्गस्य ५५तमः श्लोकः ।
[18] कालिदासरघुवंशस्य चतुर्थसर्गस्य ०४तमः श्लोकः ।
[19] कालिदासरघुवंशस्य चतुर्थसर्गस्य २३तमः श्लोकः ।

९. गजानां वर्णः कृष्णः । [20]

१०. महाशक्तियुतगजाः स्वमार्गे विद्यमानानां वृक्षाणां फलानि, सर्वाणि नाशयन्ति । [21]

११. गजानुपयुज्य सेतुनिर्माणं कृतं रघुणा कलिङ्गदेशे । [22]

१२. उद्धतान् गजानङ्कुशेन नोदयति स्म आधोरणः । [23]

१३. कलिङ्गदेशस्थस्य महाराजस्य महागजसैन्यमासीत् । [24]

१४. नद्यां क्रीडनेन गजानां सुगन्धमदमिश्रितजला भवति नदी । [25]

१५. मदजलस्यैलायाश्च गन्धः परिमलयुतः भवति । [26]

१६. गजानां ग्रैवेयबन्धाः दृढाः आसन् । [27]

१७. मदजलेनाकर्षिताः मधुकराः खर्जूरवृक्षेषु बद्धगजानां मदजलग्रन्थीनामुपर्यपतन् । [28]

१८. मदोद्धतानां गजानां दन्तैः छेदनं त्रिकूटाचलस्य । [29]

१९. गजानां रज्जुभिरेव काम्भोजराजः अङ्कोलवृक्षवत् नुदितः । [30]

२०. सरलवृक्षाणामधोभागे विद्यमानानामोषधीनां प्रकाशः गजग्रैवेयेषु प्रतिफलनेन रात्रिकालः अपि दीपप्रज्वलित इवाभूत् । [31]

२१. गजाः देववदारुवृक्षस्य काण्डेषु कण्डूयन्ति । [32]

[20] कालिदासरघुवंशस्य चतुर्थसर्गस्य २९तमः श्लोकः ।
[21] कालिदासरघुवंशस्य चतुर्थसर्गस्य ३३तमः श्लोकः ।
[22] कालिदासरघुवंशस्य चतुर्थसर्गस्य ३८तमः श्लोकः ।
[23] कालिदासरघुवंशस्य चतुर्थसर्गस्य ३९तमः श्लोकः ।
[24] कालिदासरघुवंशस्य चतुर्थसर्गस्य ४०तमः श्लोकः ।
[25] कालिदासरघुवंशस्य चतुर्थसर्गस्य ४५तमः श्लोकः ।
[26] कालिदासरघुवंशस्य चतुर्थसर्गस्य ४७तमः श्लोकः ।
[27] कालिदासरघुवंशस्य चतुर्थसर्गस्य ४८तमः श्लोकः ।
[28] कालिदासरघुवंशस्य चतुर्थसर्गस्य ५७तमः श्लोकः ।
[29] कालिदासरघुवंशस्य चतुर्थसर्गस्य ५९तमः श्लोकः ।
[30] कालिदासरघुवंशस्य चतुर्थसर्गस्य ६९तमः श्लोकः ।
[31] कालिदासरघुवंशस्य चतुर्थसर्गस्य ७५तमः श्लोकः ।
[32] कालिदासरघुवंशस्य चतुर्थसर्गस्य ७६तमः श्लोकः ।

२२. गन्धवृक्षाः अपि गजानामालनमभूवन् । [33]

२३. गजसैन्यस्य समर्पणं कृतं कामरूपनृपैः । [34]

एतावत् रघोः दिग्विजयपर्यन्तं गजानामुल्लेखाः दृष्टाः । एवं क्रमेण कालिदासस्य अस्मिन् काव्येऽवशिष्टेषु सर्गेषु इतोऽपि ४१ गजोल्लेखाः वर्तन्ते । अभिज्ञानशाकुन्तलनाटके गजानामुल्लेखः अधिकस्थानेषु नास्ति । प्रथमाङ्के, द्वितीयाङ्के, पञ्चम सप्तमाङ्कयोश्च गजोल्लेखः विद्यते ।

मालविकाग्निमित्रनाटके -

१. गजचर्माम्बरधारिणः उल्लेखः । [35]

२. वरदानदीतटे विद्यमानाः वृक्षाः राज्ञः जयशालिनां गजानामालानस्तम्भाः । [36]

विक्रमोर्वशीये नाटके -

१. गजाः सिंहनादैर्भीताः । [37]

२. गजः स्वकरं वृक्षशाखायां काण्डे वा स्थापयन् विश्रान्तिं प्राप्नोति । [38]

३. नवयौवने विद्यमानाः गजाः रसयुक्तसल्लकीकाण्डस्य कवलमभिनन्दन्ति । [39]

४. यौवनमदोन्मत्तः गजः - गजाधिपवदिति वर्णनम् । [40]

५. गजस्य मदस्रावः, गजस्य करेण्वा साकं भवनम् । [41]

६. गजशिशुरपि अन्यान् गजान् जेतुमर्हति । [42]

---

[33] कालिदासरघुवंशस्य चतुर्थसर्गस्य ८१तमः श्लोकः ।
[34] कालिदासरघुवंशस्य चतुर्थसर्गस्य ८३तमः श्लोकः ।
[35] कालिदासस्य मालविकाग्निमित्रं नाम नाटकस्य नान्दीश्लोके ।
[36] कालिदासस्य मालविकाग्निमित्रं नाम नाटकस्य ५/१ ।
[37] कालिदासस्य विक्रमोर्वशीये १५/१ ।
[38] कालिदासस्य विक्रमोर्वशीये चतुर्थाङ्के -
[39] कालिदासस्य विक्रमोर्वशीये २३/४ ।
[40] कालिदासस्य विक्रमोर्वशीये २४/४ ।
[41] कालिदासस्य विक्रमोर्वशीये २५/४ ।
[42] कालिदासस्य विक्रमोर्वशीये १८/५ ।

कालिदासस्य ‘ऋतुसंहार’ नामकखण्डकाव्ये -

१. पिपासाबाधितः सिंहोऽपि गजं न हन्ति । [43]

२. सिंहानामुपस्थितावपि गजाः जलं पातुं ईहन्ते । [44]

३. गजाः निदाघपीडिताः [45]

४. गजाः निदाघपीडिताः नदीं धावन्ति । [46]

५. वर्षाकाले मेघाः गजाः इव । [47]

६. मलयपर्वतस्य मृदुपवनः गजवत् । [48]

कालिदासस्य  मेघदूते -

१. गजानां वप्रक्रीडा । [49]

२. गजाः स्वकरं चालयन्ति वर्षाकाले मेघदर्शनेन, दिग्गजविचारस्योल्लेखश्च । [50]

३. गजानां मदजलेनयुक्तं नदीजलम् । [51]

४. नलगिरिर्नामगजेन आलानस्योत्पाटनं । [52]

५. शिवस्य गजचर्माम्बरत्त्वम् । [53]

कालिदासस्य कुमारसम्भवमहाकाव्ये -

१. गजमौक्तिकं यत्तु सिंहात् हठात् प्राप्तम् । [54]

---

[43] कालिदासस्य ऋतुसंहारस्य १४/१ ।
[44] कालिदासस्य ऋतुसंहारस्य १५/१ ।
[45] कालिदासस्य ऋतुसंहारस्य १९/१ ।
[46] कालिदासस्य ऋतुसंहारस्य २७/१ ।
[47] कालिदासस्य ऋतुसंहारस्य १/२ ।
[48] कालिदासस्य ऋतुसंहारस्य २८/६ । (प्रक्षिप्ते भागे पञ्चमसर्गस्य प्रथमश्लोकः गजानां गर्जनविषयं ब्रवीति ।)
[49] कालिदासस्य मेघदूते द्वितीयः श्लोकः, पूर्वमेघे
[50] कालिदासस्य मेघदूते १४तमः श्लोकः पूर्वमेघे ।
[51] कालिदासस्य मेघदूते २०तमः श्लोकः पूर्वमेघे ।
[52] कालिदसस्य मेघदूते २७तमः श्लोकः, पूर्वमेघे ।
[53] कालिदासस्य मेघदूते ३६तमः श्लोकः पूर्वमेघे ।
[54] कालिदासस्य कुमारसम्भवे ६/१, २२/१४ ।

२. गजानां घर्षणं सरलवृक्षस्य त्वचासाकम् । [55]

३. शिवस्य गजचर्माम्बरत्त्वम् । [56]

४. मन्दाकिन्याः जलं दिग्गजानां मदजलेन गन्धितम् । [57]

५. तारकासुरस्य गजाः ऐरावतमपि पराजित्य, पुष्करावर्तकाभ्यां वप्रक्रीडां क्रीडन्ति । [58]

६. करिणी स्वगजाय स्वमुखात् कमलपरागयुक्तजलमदात् । [59]

७. गजाः वृक्षान् घट्टयन्ति । [60]

८. इन्द्रस्य वाहनमैरावतः । [61]

९. गजाः सिंहैरपि अभीताः आसन् । [62]

१०. गजाः करेण जलं पिबन्ति । [63]

११. गजाः जलक्रीडासक्ताः । [64]

१२. युद्धे गजाः स्वदन्तैः घट्टयन्ति भित्तिम् । [65]

१३. दिग्गजानां मदस्रावणम् । गजानां वा । [66]

१४. गजानां घण्टानिनादः, भीकरगर्जनञ्च युद्धे । सिंहानपि भाययन्ति अनेन । [67]

१५. स्वप्रतिबिम्बमरिगजं मत्वा स्वदन्तैः कोपेन अताडयन् महागजाः । [68]

---

[55] कालिदासस्य कुमारसम्भवे ९/१ ।
[56] कालिदासस्य कुमारसम्भवे ५४/१, ७८/०५, ७/३२, १५/१२ ।
[57] कालिदासस्य कुमारसम्भवे ४४/२ ।
[58] कालिदासस्य कुमारसम्भवे ५०/२ ।
[59] कालिदासस्य कुमारसम्भवे ३७/३ ।
[60] कालिदासस्य कुमारसम्भवे ३१/०४ ।
[61] कालिदासस्य कुमारसम्भवे ८०/०५, १४/५ ।
[62] कालिदासस्य कुमारसम्भवे ३९/६ ।
[63] कालिदासस्य कुमारसम्भवे ३३/८ ।
[64] कालिदासस्य कुमारसम्भवे ६४/८, २५/१३ ।
[65] कालिदासस्य कुमारसम्भवे ३८/१३, ४१/१३ ।
[66] कालिदासस्य कुमारसम्भवे ४०/१३, ४३/१४ ।
[67] कालिदासस्य कुमारसम्भवे १४,१५/१४, ४२/१४, २६/१४ ।

१६. युद्धे गजाः । पर्वतसमानाः । [69]

१७. गजगर्जनं वाद्यमप्यतिरिच्यते स्म । [70]

१८. निरन्तरध्वनिभिः गजानां स्रावः शुष्कः भवति । [71]

१९. गजानां गर्जनं, मदस्रावश्च । [72]

बाणभट्टस्य हर्षचरिते गजाः -

गद्यकाव्यस्योदाहरणत्वेन स्वीकृतमिदं काव्यम् । अत्रापि बहुत्र गजानां वर्णनं दृश्यते विशेषतया द्वितीयोच्छ्वासे उपविंशतिस्थानेषु गजानामुल्लेखः कृतः । (सुलभग्रहणार्थमत्र गजविचारः यत्रोपलभ्यते तस्यानुवादस्य भागः प्रदत्तः) । अत्र गजानामुल्लेखाः केचनैव प्रदत्ताः -

| क्र.सं | गजविचारः | पृष्टसङ्ख्या |
|---|---|---|
| १ | गजानां शिरसि अलङ्करणार्थं कपर्दाः स्थापिताः | १७३ |
| २ | गजाः नदीतटेषु घट्टनमभिलषन्ति | १७४ |
| ३ | गजाः कुङ्कुमाङ्किताः | २७७ |
| ४ | गजानां मदस्य सौगन्ध्यम् | २६८,२७० |
| ५ | ४० वर्षीयाः गजाः श्रेष्ठाः, ते अष्टदिक्षु रक्षणं कुर्वन्ति | २७० |
| ६ | गजशिरस्सु पट्टवर्धनाः आसन् | २७३ |
| ७ | बुद्धिशालिनां गजानां अतिमृदुनखम् | २७३ |
| ८ | गजाः सम्पदां चिह्नम् | ३६४ |
| ९ | गजाः गिरौ, उन्नतप्रदेशेषु च घट्टयन्ति स्वशिरांसि | ५०६ |
| १० | गजाः देहस्य त्रिपादेभ्यः मदजलं स्रावयन्ति । | ५५० |
| ११ | गजाः ब्रह्मणः हस्तेभ्यः उत्पन्नाः | ३७६ |
| १२ | अष्टदिग्गजानां नामानि | ४९१ |
| १३ | गजाः चर्मचित्रैः शिक्षिताः | ५२९ |

कोष्टकः - ५

[68] कालिदासस्य कुमारसम्भवे २३/१४ ।
[69] कालिदासस्य कुमारसम्भवे २४/१४, ३४/१४, ५०/१४, ८/१५, १०/१५, ०२/१६, २३,२४/१६, २९/१६, ३०, ३१, ३२, ३३, ३५, ३६, ३८, ३९, ४०, ५१, /१६ ।
[70] कालिदासस्य कुमारसम्भवे ३३/१४, ४७/१४ ।
[71] कालिदासस्य कुमारसम्भवे ३९/१४ ।
[72] कालिदासस्य कुमारसम्भवे ४१/१४ ।

## भासस्य यौगन्धरायणम् [73]

भासस्य प्रतिज्ञायौगन्धरायणं नाम नाटकं गजानामध्ययनार्थं विशेषतया स्वीकृतम् । इदं नाटकं गजं परितः एव ग्रथितम् इत्युक्ते गजस्य ग्रहणविषयः अत्र प्रधानः । परं तत्समये एव गजानाम् अन्येऽपि बह्वंशाः कथयत्ययं नाटककारः । प्रद्योतः उदयनं वञ्चयितुं कृतकगजं निर्माय वने चारयति । तं ग्रहीतुमानसः उदयनः ग्रहणव्याजेन वनं प्रतिष्ठते । तत्र स्ववीणाघोषवतीसहितं गृहीतः उदयनः उज्जयिन्यां बद्धः । परं यौगन्धरायणस्य साहाय्येन उदयनः महाराजपुत्र्या वासवदत्तया सह गजमारुह्य वीणासहितः कौशाम्बीं प्रत्यागच्छति । अत्र विंशत्यधिकसन्दर्भेषु गजविषयकाः अंशाः उक्ताः । अत्र गजवनं, गजग्रहणम् इत्येवं शास्त्रीयांशैस्साकं सामान्यांशाः अपि बहुत्रोक्ताः । इदानीमैकैकमपि ज्ञातुं प्रयतामहे ।

१. नागवनस्योल्लेखः यौगन्धरायणेन कृतः यदा उदयनस्तत्र प्रविष्टवानिति ज्ञायते। [74], [75]

२. प्रद्योतः उदयनं छलयितुं नीलकुवलयतनुः इति गजं निर्माति । [76]

३. गजानां यूथस्योल्लेखः उदयनः यदा नागवनमगच्छत् । [77]

४. नीलहस्तिनः वर्णनम् । [78] , [79]    ५. हस्तिशिक्षायाः उल्लेखः । [80]

६. दिग्गजानामुल्लेखः । [81]    ७. हस्तिनः वाहनत्त्वम् । [82]

---

[73] भासस्य यद्यपि त्रयोदशनाटकानि तस्य प्रतिज्ञायौगन्धरायणं केवलं स्वीकृतमत्र । अन्येषु नाटकेषु अनेके गजांशाः उक्ताश्चेदपि अस्मिन् नाटके अयं नाटककारः स्वगजशास्त्रज्ञानं परिपूर्णतया प्रदर्शयति । अत्र न केवलं गजानां स्वभाव-रूपादिकानां वर्णनं दृश्यते अपि तु तस्य ग्रहणविचारः, तस्य भायनविचाराः इति सर्वेऽपि विषयाः उपस्थापिताः ।

[74] प्र.यौ. (प्रतिज्ञायौगन्धरायणम), प्रथमोऽङ्कः, पृष्टसङ्ख्या ५८, तृतीयश्लोकानन्तरं यत्र यौगन्धरायणः आह अथ वेणुवनात् त्रिषु नागवनं श्वः प्रयाता . . . . . . . .सम्भावितव्यः ।

[75] प्र.यौ. प्रथमोऽङ्कः, पृष्टसङ्ख्या ६०; यौगन्धरायणस्य वचनम् - हंसक, न खलु गतः स्वामी नागवनम्?

[76] प्र.यौ. प्रथमोऽङ्कः, पृष्टसङ्ख्या ५८, यौगन्धरायणस्य वचनं - एतदपि मेधाविलक्षणम् । भोः । वनगजप्रच्छादितशरीरं नीलहस्तिनमुपन्यस्य प्रद्योतः स्वामिनं छलयितुकाम इति प्रवृत्तिरुपगता नः ।

[77] प्र.यौ. प्रथमोऽङ्कः, पृष्टसङ्ख्या ६१, हंसकस्य वचनम्-आर्य! तथा . . . .छत्रमात्रपरिच्छदेन गजयूथविमर्दनयोग्येनबलेन . . . . . . .नागवनं प्रयातो भर्ता ।

[78] प्र.यौ. प्रथमोऽङ्कः, पृष्टसङ्ख्या ६२, यौगन्धरायणस्य वचनम् - तिष्ठ । इतः क्रोशमात्रे मल्लिकासालप्रच्छादितशरीरो नखदन्तवर्जमेकनीलो हस्ती मया दृश्यत् इत्युक्तवान् ननु ।

[79] प्र.यौ. चतुर्थोऽङ्कः, पृष्टसङ्ख्या १०३, चतुर्दशः श्लोकः ।

[80] प्र.यौ. प्रथमोऽङ्कः, पृ.सं.६२, हंसकस्य वचनम् - ततः . . . . . .अस्त्येष चक्रवर्ती हस्ती नीवकुवलयतनुर्नाम हस्तिशिक्षायां पाठितः । तद् अप्रमत्ता भवत यूयमस्मिन् यूथे । गजं तमहं वीणाद्वितीय आनयामीति ।

८. कृतकहस्तिनः निर्माणम् । [83]      ९. गजस्य हस्तस्योल्लेखः । [84]

१०. उदयनः कुञ्जरज्ञानदृप्तः । [85]

११. उदयनस्य घोषवतीवीणा गजहृदयानि वशीकरोति स्म । [86]

१२. ऐरावतस्योल्लेखः। [87]

१३. गजानां चित्तमपाक्रष्टुमनेकोपायाः चिन्तिताः । [88]

(अत्र गजानामिष्टानिष्टानेक-स्वभावान् भृशं वर्णिताः यथा- "स्थानावह्यवासशय्या-भागेष्वाश्रयेषूपन्यस्तौषधिव्याजो नलागिरिः; मन्त्रौषधिनियमसंभृतपुराणकर्म-व्यामोहितः । अनुकूलमारुतमोक्तव्यः सज्जितो धूपः । रोषप्रतिकूलोऽस्य सज्जितः प्रतिगजमदः । शालासन्निकृष्टमल्पसाधनं गृहमादीपयितुमग्नित्रासित्वाद् वारणानाम् । गजपति-चित्तोद्भ्रमणार्थं देवकुलेषु स्थापिताः शङ्खदुन्दुभयः । तेन नादेन श्वः प्रद्योतेन स्वामी शरणमुपगन्तव्यः । ततः स्वामिना शत्रोरनुमतेनैव बन्धनान्निष्क्रम्य सहव्यापन्नां घोषवतीं हस्तगतां कृत्वा नलागिरिः स्वाधीनः कर्तव्यः । ततो व्यवस्थितासनस्तदानीं स्वामी नलागिरौ" . . . . . . . . . ,गजान् भाययितुं करणीयाः अनेके उपायाः, गजानां स्वभावाः, मदः, तस्यनिरोधक्रमः सर्वमपि सम्यक्तया कथितम् ।)

१४. गजस्य वाहनत्त्वमुक्तम् । [89]

१५. धेनुकायाः नाम, अङ्कुशः, क्षुरप्रमाला, घण्टा, कशिका इत्येषामुल्लेखः । [90]

१६. युद्धे गजस्य विक्रमः । [91]

---

[81] प्र.यौ. प्रथमोऽङ्कः, पृ.सं ६३, हंसकः - नहि .......... न खलु ते ऐरावणादीनामपि दिग्गजानां ग्रहणं न सम्भावनीयम् ।
[82] प्र.यौ. प्रथमोऽङ्कः, पृ.सं ६३, हंसकः - ततः . . . . . .नीलबलाहकाद् हस्तिनोऽवतीर्य . . . . . . प्रयातो भर्ता ।
[83] प्र.यौ. प्रथमोऽङ्कः, पृ.सं६४, हंसकः - ततः . . . . . . प्रत्युद्गतः सः कृतकहस्ती ।
[84] प्र.यौ. प्रथमोऽङ्खः पृ.सं ६५. अष्टमः श्लोकः - पीनांसस्य विकृष्टपर्वमहतो नागेन्द्रहस्ताकृतेः . . . . . ॥
[85] प्र.यौ. द्वितीयोऽङ्कः पृ.सं ७२, तृतीयः श्लोकः - ममहयखुरभिन्नं . . . . . । प्रणमति गुणशाली कुञ्जरज्ञानदृप्तः ॥
[86] प्र.यौ, द्वितीयोऽङ्कः पृ.सं.८०, द्वादशतमः श्लोकः - श्रुतिसुखमधुरा . . . . . । . . . गजहृदयानि बलाद्वशीकरोति ॥
[87] प्र.यौ. तृतीयोऽङ्कः पृ.सं ८५, विदूषकः - किमैरावणस्त्वम् ? उन्मत्तकः - आम् ऐरावणोऽहम् . . . . . ।
[88] प्र.यौ. तृतीयोऽङ्कः पृ.सं ९०, यौगन्धरायणः - स्थानावह्यवसशय्याभागेष्वाश्रयेषूपन्यस्तौषधिव्याजो . . . .नलागिरौ ।sss
[89] प्र.यौ. तृतीयोऽङ्कः पृ.सं ९०, पञ्चमः श्लोकः - सेनाभिर्मनसानुबद्धजघनं कृत्वा जवे वारणं . . . .निर्वाह्यते ।
[90] प्र.यौ. चतुर्थोऽङ्कः, पृ.सं ९७ - ९८; प्रवेशके भटगात्रसेवकयोः सम्भाषणम् ।

१७. हस्तिनः दन्तः । [92]

१८. गजस्याधोरणः । [93]

१९. गजानां निग्रहः । [94], [95]

भर्तृहरेः शतकत्रयम् -

इदं सुभाषितग्रन्थसरण्यामुदाहरणत्वेन स्वीकृतं गजविषयकांशानन्वेष्टुम् । अत्राहत्य षोडशसन्दर्भेषु गजसम्बन्धिताः अंशाः चर्चिताः ।

मूर्खस्योपदेशदानं विफलाय भवतीति निरूपयितुं कविः गजग्रहणविषयं चिनोति यत् स्थिरैः दृढैश्च रज्जुभिः गजाः बन्धनीयाः न तु मृणालतन्तुभिरिति [96] । पुनः बलान्वितानां गजानां बन्धनविषये वदन्नयं कविः विधिः सर्वानपि अतिशयतीति ब्रवीति । [97] गर्वः न कर्तव्यः मनसि वा इति गजाः यदा मददूषिताः तदा उन्मत्ताः इव भवन्तीति कथनम् । [98] मूर्खस्यौषधं नास्तीति वचनसमये मदयुक्ताः नागेन्द्राः अपि निशिताङ्कुशेन वारयितुं शक्याः कदाचिदिति गजानां मदः, अङ्कुशस्य चोपयोगं विवृणोति । [99] विद्वज्जनेषु न कदापि अवज्ञा प्रदर्शनीया इति कथनसमये गण्डस्थलैर्युतानां मदयुतानाञ्च गजानां बन्धनं न युक्तमित्युक्तम् । [100] मत्तेभाः जेतुं दुष्कराः इति वक्तुं सिंहं वर्णयन् कविः गजानां मदावस्थां, कुम्भस्थलञ्चाख्यायति । [101] पुनः अनुवर्तयन् सिंहानां सुलभः ग्रासः गजः इत्यपि विवृणोति । [102] तथैव

---

[91] प्र.यौ. चतुर्थोङ्कः पृ.सं ९९, तृतीयः श्लोकः ।
[92] प्र.यौ. चतुर्थोऽङ्कः पृ.सं १००, द्वितीयस्य वचनम् - विजयसुन्दरस्य हस्तिनः दन्तान्तचोदितोऽसिर्विपन्नः . . . . . ।
[93] प्र.यौ. चतुर्थोऽङ्कः पृ.सं १०२, दशमः श्लोकः ।
[94] प्र.यौ. चतुर्थोऽङ्कः, पृ.सं. १०४, भरतरोहकयौगन्धरायणयोः संवादः षोडषः श्लोकः ।
[95] प्र.यौ. चतुर्थोऽङ्कः, पृ.सं. १०५, नवदशश्श्लोकः ।
[96] व्यालं बालमृणालतन्तुभिरसौ रोद्‌दुं समुज्जृम्भते छेत्तुंवज्रमणीञ्छीरीषकुसुमप्रान्तेन संनह्यते ।
माधुर्य्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते नेतुं वाञ्छति यः खलान्पथिसतांसूक्तैःसुधास्यन्दिभिः ॥ ६/नीतिशतकम्
[97] गजभुजङ्गमयोरपि बन्धनं, शशिदिवाकरयोः ग्रहपीडनम् । . . . . . . . . . ॥ ९१/नीतिशतकम्
[98] यदाऽकिञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवम् . . . . . . ॥ ८/नीतिशतकम्
[99] शक्यो वारयितुं हुतभुक् . . . . . . नागेन्द्र् निशिताङ्कुशेन समदो . . . . . . . .॥ ११/नीतिशतकम्
[100] अधिगतपरमार्थन्पण्डितान्माऽवमंस्थाः . . . . .। अभिनवमदलेखाश्यामगण्डस्थलानां न भवति बिसतन्तुर्वारणं वारणानाम् ॥ १७/नीतिशास्त्रम् ।
[101] क्षुत्क्षामोऽपि जराकृशोऽपि . . . . . । मत्तेभेन्द्रविभिन्नकुम्भपिशित. . . . . . .॥ २९/नीतिशतकम्
[102], स्वल्पं स्नायुसावशेषमलिनं . . . . . .। सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं . . . . . ॥ ३०/नीतिशतकम्

सिंहशिशवोऽपि गजपिशितं रोचन्ते इत्यस्मिन्नप्यर्थे कविः गजोल्लेखं करोति । [103] गजस्य गाम्भीर्यं तस्य पोषणविधिश्चोक्तम् । [104] मदावस्थायाः कारणं गजाः क्षीणं गच्छन्तीति कविः वदति । [105] इन्द्रस्य वाहनमैरावतं [106] तेषां कुम्भस्थलवद्वर्तते स्त्रीस्तनयुगलम् [107], [108] कुम्भस्थलस्य दलने सन्ति केचन शूराः इति, [109] गजशिशोः कर्णौ सदा चापल्येन वीजेते [110] गजानामुपयोगः वहनार्थं भवति स्म [111] इत्येवं बहवो अंशाः कविनात्र चर्चिताः।

भारविकृतेऽष्टादशसर्गेषु निबद्धे किरातार्जुनीयमहाकाव्ये ६४ स्थानेषु गजोल्लेखाः दृश्यन्ते । प्रबन्धविस्तारभयात् न सर्वेषामुल्लेखः शक्यते । उदाहरणत्वेन केचन पूर्णश्लोकाः प्रदत्ताः । परं गजोल्लेखाः कुत्र कुत्र सन्तीति निर्देशः कोष्टकद्वारेण दत्तम् ।

| क्र | श्लोकः | सर्गः | पृ.सं | क्र | श्लोकः | सर्गः | पृ.सं | क्र | श्लोकः | सर्गः | पृ.सं |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |
| १ | १६ | १ | १४ | २३ | २८ | १ | २२ | ४४ | ३६ | १ | २७ |
| २ | ६ | २ | ३६ | २४ | १८ | २ | ४४ | ४५ | २३ | २ | ४७ |
| ३ | २५ | २ | ४८ | २५ | ३८ | ३ | ८६ | ४६ | ४५ | ३ | ९० |
| ४ | ५० | ३ | ९३ | २६ | २ | ५ | १२० | ४७ | ७ | ५ | १२३ |
| ५ | २५ | ५ | १३३ | २७ | २६ | ५ | १३४ | ४८ | ४७ | ५ | १४६ |
| ६ | ७ | ६ | १५३ | २८ | ११ | ६ | १५५ | ४९ | १४ | ६ | १५७ |
| ७ | १ | ७ | १७४ | २९ | ८ | ७ | १७७ | ५० | ११ | ७ | १७८ |
| ८ | १२ | ७ | १७९ | ३० | २० | ७ | १८३ | ५१ | २४ | ७ | १८५ |
| ९ | ३० | ७ | १८८ | ३१ | ३१ | ७ | १८८ | ५२ | ३२ | ७ | १८९ |
| १० | ३३ | ७ | १८९ | ३२ | ३४ | ७ | १९० | ५३ | ३५ | ७ | १९० |

[103] सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु । . . . . . . . ॥ ३८/नीतिशतकम्
[104] लाङ्गूलचालनमधश्चरणावपातं . .. . . . । श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु धीरं विलोकयति चाटुशतैश्च भुङ्क्ते । ३१/नीतिशतकम्
[105] मणिः शाणोल्लीढः समरविजयी हेतिनिहतो मदक्षीणो नागः . . . . . । . . . . . . . ॥ ४४/नीतिशतकम्
[106] नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः, स्वर्गोदुर्गमनुग्रहः किल हरेरैरावतो वारणः । ८८/नीतिशतकम्
[107] वक्त्रं चन्द्रविडम्बि . . . . . . . । वक्षोजाविभक्तकुम्भविभ्रमहरौ . . . . . . ॥ ९/शृङ्गारशतकम्
[108] मत्तेभकुम्भपरिणाहिनि कुङ्कुमार्द्रे . . . . . . . । . . . . . . . . . क्षणं क्षपयति क्षणलब्धनिद्रः ॥ ९६/शृङ्गारशतकम्
[109] मत्तेभकुम्भदलने भुवि सन्ति शूराः . . . . . । . . . . कन्दर्पदर्पदलने विरलाः मनुष्याः ॥ ५८/शृङ्गारशतकम्
[110] यदा मेरुः श्रीमान्निपतति युगान्ताग्निदलितः . . .. । . . . . . . . शरीरे का वार्ता करिकरभकर्णाग्रचपले ॥ ६९ वैराग्यशतकम्
[111] जीर्णाकन्था ततः किं . . . . . . . एका भार्या ततः किं हयकरिसुगणैरावृतो वा ततः किम् । . . . . . . . ॥ ७२/वैराग्यशतकम्

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| ११ | ३६ | ७ | १९१ | ३३ | ३७ | ७ | १९१ | ५४ | ३८ | ७ | १९२ |
| १२ | १२ | ८ | १९९ | ३४ | २२ | ८ | २०५ | ५५ | २० | ९ | २३३ |
| १३ | ५३ | १० | २८९ | ३५ | ४० | १२ | ३५२ | ५६ | ४८ | १२ | ३५६ |
| १४ | २० | १३ | ३६९ | ३६ | ५५ | १३ | ३८७ | ५७ | २२ | १४ | ४०८ |
| १५ | ५ | १५ | ४३२ | ३७ | १६ | १५ | ४३७ | ५८ | २४ | १५ | ४४१ |
| १६ | ४५ | १५ | ४५० | ३८ | २ | १६ | ४५६ | ५९ | ८ | १६ | ४५९ |
| १७ | ९ | १६ | ४५९ | ३९ | ११ | १६ | ४६० | ६० | १२ | १६ | ४६१ |
| १८ | १३ | १६ | ४६१ | ४० | १४ | १६ | ४६१ | ६१ | ३० | १६ | ४६९ |
| १९ | ३६ | १६ | ४७१ | ४१ | ३८ | १६ | ४७२ | ६२ | १० | १७ | ४८८ |
| २० | १७ | १७ | ४९२ | ४२ | २५ | १७ | ४९५ | ६३ | ३६ | १७ | ५०० |
| २१ | ४५ | १७ | ५०४ | ४३ | ५७ | १७ | ५०७ | ६४ | १ | १८ | ५१३ |

कोष्टकः - ६

*अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् ।*
*नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥* १/१६

*अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः ।*
*त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्रगिवापवर्जिता ॥* १/२९

*वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।*
*कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥* १/३६

*चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता ।*
*कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति ॥* २/६

*मदसिक्तमुखं मृगाधिपः करिभिर्वर्तयते स्वयंहतैः ।*
*लघयन्खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः ॥* २/१८

*द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः ।*
*प्रसहेत रणे तवानुजान्द्विषतां कः शतमन्युतेजसः ॥* २/२३

*इति दर्शितविक्रियं सुतं मरुतः कोपपरीतमानसम् ।*
*उपसान्त्वयितुं महीपतिर्द्विरदं दुष्टमिवोपचक्रमे ॥* २/२५

*धैर्यावसादेन हृतप्रसादवन्यद्विपेनेव निदाघसिन्धुः ।*
*निरुद्धबाष्पोदयसन्नकण्ठमुवाच कृच्छ्रादिति राजपुत्री ॥* ३/३८

*प्राप्तोऽभिमानव्यसनादसह्यं दन्तीव दन्तव्यसनाद्विकारम् ।*
*द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्ण इवादिरह्नः ॥* ३/४५

*आक्षिप्यमाणं रिपुभिः प्रमादान्नागैरिवालूनसटं मृगेन्द्रम् ।*
*त्वां धूरियं योग्यतयाधिरूढा दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥* ३/५०

*तपनमण्डलदीपितमेकतः सततनैशतमोवृतमन्यतः ।*
*हसितभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा ॥* २/५

*दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः ।*
*विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः ॥* ७/५

शूद्रकस्य मृच्छकटिके गजांशाः

गजानामध्ययनार्थं चितमन्यन्नाटकं नाम शूद्रकस्य मृच्छकटिकम् । अस्य कवेः काले गजशास्त्रस्य प्रवेशः परिचयः आसीद्वा न वेति यद्यपि वक्तुं न शक्यते तथापि अयं कविः हस्तिशिक्षा इति शब्दस्योपयोगं करोति । हस्तिशिक्षा नाम कृतिः गजशास्त्रसम्बन्धितः इति ज्ञातव्यः । अस्य ग्रन्थस्य परिचयं प्राप्यैवैवमवदत् वेतीति प्रश्नः उद्भवत्येव । अतः अयं कविः स्वकाव्ये शास्त्रानुगुणं सामान्यांशानुगुणञ्च गजविषयं कथं ज्ञापयतीत्येव कौतुकम् । अतः अस्य नाटकस्याध्ययनाल्लब्धाः अंशाः अत्र सङ्गृहीताः ।

नाटकस्य प्रस्तावनायामेव कवेः गजवद्गम्भीरचलनमासीदित्युक्तम् । [112]

अयं हस्तिशिक्षां ज्ञातवानासीत् । [113]

अयं कविः वाराणैस्साकमपि युद्ध्यते स्म । [114]

कालक्रमेण गजानां मदस्रावः न्यूनः भवति । [115]

---

[112] द्विरदेन्द्रगतिः .. .. .. .. .. .. शूद्रक इत्यगाधसत्त्वः ॥ प्रथमाङ्के तृतीयः श्लोकः ।

[113] ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षाम् . . . . .शूद्रकोऽग्निं प्रविष्टः ॥ इति चतुर्थश्श्लोकः प्रस्तावनायाम् ।

[114] समरव्यसनी. . . . . . . । परवारणबाहुयुद्धलुब्धः । इति पञ्चमश्श्लोकः प्रस्तावनायाम् ।

[115] एतत्तु मां दहति यद्गृहमस्मदीयं क्षीणार्थमित्यतिथयः परिवर्जयन्ति ।
संशुष्कसान्द्रमदलेखमिव भ्रमन्तः कालव्यये मधुकराः करिणः कपोलम् ॥ १२/१

गजस्य बन्धनाय आलानस्योपयोगः भवति स्म । [116]

वसन्तसेनायाः गजस्य नाम खुण्टमोडकः इति । अन्यः गन्धगजः अपि आसीत् । [117]

वसन्तसेनायाः गजस्य कोलाहलः मार्गे सम्यक् चित्रितम् । दुष्टहस्त्युल्लेखः दृश्यते । [118]

गजानामाभरणानि बन्धाश्च । [119]

अग्रे कर्णपूरकस्य भणितिः यथा - कश्चन परिव्राजकः गजेन समासादितः । [120]

कर्णपूरकः पर्वतोपमं गजमताडयल्लोहखण्डेन । [121]

गजस्य मदजलस्य कारणात् कुसुमगन्धः विनष्टः । [122]

ऐरावतस्य शुण्डस्य, गजदन्तस्य चोल्लेखः विदूषकस्य कथने । [123]

गजकलभानामुल्लेखः विदूषकेन । [124]

गजानां कृते तैलमिश्रितमन्नं ददाति स्म । [125]

मेघवत्कृष्णाः गजाः । [126]

अलङ्कृतः वारणः, यो हि मत्तः । [127]

कक्षबद्धगजानामुल्लेखः । [128]

प्रभ्रष्टः गजः भ्रमति । [129] कदाचित् बन्धं खण्डयित्वा परिभ्रष्टः भवति । [130]

---

[116] आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते । हृदये गृह्यते नारी यदीदं नास्ति गम्यताम् ॥ ५०/१

[117] एवमाकाशभाषिते भणति संवाहकः - . . . . .वसन्तसेनायाः खुण्टमोडको नाम दुष्टहस्ती विहरतीति । अहो आर्याया गन्धगजं प्रेक्षिष्ये गत्वा । . . . . . . . द्वितीयोऽङ्कः पृ.सं ९४ ।

[118] अपनयत बालकजनं त्वरितमारोहत वृक्षप्रासादम् । किं न खलु प्रेक्षध्वं पुरतो दुष्टो हस्तीत एति । १८/२

[119] विचलति नूपुरयुगलं छिद्यन्ते च मेखला मणिखचिताः । वलयाश्च सुन्दरतरा रत्नाङ्कुरजालप्रतिबद्धाः ॥ १९/२

[120] ततस्तेन दुष्टहस्तिना . . . . . . . . .हा परिव्राजको व्यापाद्यत इति । पृ.सं ९६, ९८ ।

[121] आहत्य सरोषं तं हस्तिनं विन्ध्यशैलशिखराभम् । मोचितो मया स दन्तान्तरसंस्थितः परिव्राजकः ॥ २०/२

[122] कर्णपूरकस्य वचनं - आर्ये मदगन्धेन सुष्टु तं गन्धं न जानामि । पृ.सं ९८

[123] ऐरावणहस्तभ्रमायितमल्लिकादामगुणालङ्कृतस्य समुच्छ्रितदन्तिदन्ततोरणावभासितस्य . . . . . . पृ.सं. १५६

[124] परगृहललिताः परान्नपुष्टाः परपुरुषैर्जनिताः पराङ्गनासु । परधननिरता गुणेष्वाच्या गजकलभा इव बन्धुलाः ललामः ॥ २८/४

[125] कुरच्युततैलमिश्रं पिण्डं हस्ती प्रतिग्राह्यते मात्रपुरुषैः इति विदूषकस्य कथनम् । पृ.सं १५८

[126] एतैरेव यदा गजेन्द्रमलिनैराध्मातलम्बोदरैः . . . . . . . . . . .क्षते प्रक्षिपन् । १८/५

[127] बलाकापाण्डुरोष्णीषं विद्युदुत्क्षिप्तचामरम् । मत्तवारणसारूप्यं कर्तृकाममिवाम्बरम् ॥ १९/५

[128] एते हि विद्युद्गुणबद्धकक्षा गजा . . . . . . . समुद्धरन्ति । २१/५

गृहीतः गजः संयमितः । [131]

बाहुः गजशुण्ड इव । [132]

गजाः क्रूराः । [133]

[129] हित्वाऽहं नरपति. . . . . . . . . . .प्रभ्रष्टो गज इव बन्धनाद् भ्रमामि । १/६
[130] कदापि हस्ती बन्धं खण्डयति तेन सम्भ्रमेण बध्यो मुक्तो भवति । प्रथमचाण्डालस्य वचनम् । पृ.सं ३९८
[131] भाग्यानि मे यदि तदा मम कोऽपराधः यद्वन्यनाग इव संयमितोऽस्मि तेन । २/६
[132] करिकरसमबाहुः . . . . . . . . . महात्मा ॥ ५/७
[133] चिन्तासक्त. . . . . . . . .नागाश्वहिंस्राभयम् । १४/९

# तृतीयोऽध्यायः

शास्त्रोक्ताः (प्राचीनाधुनिकाः) गजविषयकाः अंशाः -

३.१ गजो नाम किम् ?     ३.२ गजोत्पत्तिः     ३.३ गजानां वर्गीकरणम्

(जात्यंशदेशवर्णच्छायागन्धबलसत्त्वगुणगत्यावर्तेद्यादीनामाधारैः)

३.४ गजदोषाः

## *३.१ - गजो नाम किम् ?*

जगति बहुसहस्रप्राणिनः जीवन्ति । तेषु अत्यन्तिकया स्थूलाः, उन्नताः, स्तनयुताः, भूचरप्राणिषु प्रमुखाः गजाः । आधुनिककाले गजानां भेदद्वयं दृश्यते यथा एषियाखण्डीयाः आफ्रिकाखण्डीयाश्चेति । आधुनिककाले पुनः अन्यगुणपरिष्कारेण यथा देशेत्यादि, इतोऽपि अनेके उपभेदास्सन्ति । परं ग्राह्योऽयं यत् सामान्यतः गजशास्त्रग्रथनकाले अस्माकं पूर्वजानां आफ्रिकाभूखण्डे विद्यमानानां गजानां परिचयः नासीदिति भासते । यतो हि शास्त्रेषूक्ताः विषयास्सर्वे (प्रायः) अस्मिन् देशे एव विद्यमानानामेव गजानां विवरणं वर्णनं च करोति ।

यद्यपि वैज्ञानिकदृष्ट्या उभावपि गजौ बह्वंशेषु समानाः एव, अस्य शास्त्रस्य तेषूपयोगः कृतो वाकृतो वेति न ज्ञातः । (बहुशः न कृतः इत्येव स्वकीयाभिप्रायः यतो हि भारतीय-गजानामेव अस्य शास्त्रस्योपयोगः, न दृश्यते कथमाफ्रिकाखण्डस्थानाम् ?) आधुनिक-कालस्य गजानां एलिफस् माक्सिमस् (Elephas maximus), लाक्सोडाण्टा आफ्रिकाना (Loxodonta africana) इति कुलद्वये विभागः शक्यते । प्रथमः एषियाखण्डीयः द्वितीयस्तु आफ्रिका- खण्डदेशीयः । एतयोः पुनः उपकुलान्यनेकानि सन्ति । एवं गजानामनेक-कुलान्युपकुलानि सन्ति चेदपि तानि तु

वैज्ञानिकदृष्ट्या मूलांशान् सर्वानपि वहन्तः क्वचित् विशिष्टांशैः उपकुलमिति विभक्तानि सन्ति । परमेते गजशास्त्रानुगुणेन न सन्तीति ज्ञातव्यमेव ।

एते गजाः सर्वेष्वपि साहित्यप्रकारेषु भिन्न-भिन्नशब्दैः उक्तास्सन्ति यथा - नागः, मातङ्गः, करी, हस्तीत्यादयः । शब्ददृष्ट्या 'गज' इत्यस्योत्पत्तिः तस्य गुणानुगुणमेव भवति । न केवलं गजशब्दः परं गजस्य सर्वेऽपि समानार्थकशब्दाः गजस्य कञ्चित् गुणमादृत्यैव तथा नामाङ्कितास्सन्ति । नीलकण्ठस्य मातङ्गलीलायां एवं गजानां बहूनि नामान्युक्तानि । आदौ नीलकण्ठस्य मातङ्गलीलायां गजानां विविधानां नामानां पट्टिका अस्ति । न केवलं तावत्, नामानां वर्णनार्थमेव प्रथमाध्याये कश्चन अध्यायभागः दृश्यते ।

*नागाः सर्वत्र गत्या गज इति विजयाद् गर्जनाच्चैव हस्ती*

*वेधोहस्तप्रसूत्या परनृपतिचमूवारणाद् वारणोऽपि ।*

*मातङ्गो वर्त्ममृत्त्वादतिजरयति कुं कुञ्जरः पादतोदात्*

*पद्मी पद्मप्रसक्त्या द्विप इति मुखतो हस्ततोऽपि प्रपानात् ॥* [134]

*शुण्डावालधिदन्तैश्च चतुर्भिश्च पदैरपि ।*

*प्रहरन्ति यतस्तस्मादष्टप्रहरणा द्विपाः ।* [135]

(शुण्ड-वाल-रद(२)-पाद(४) इत्येतैः प्रहरतीति)

*इमे बिभ्यति सर्वेभ्यः सर्वेभ्योऽभ्यधिकं वपुः ।*

*कान्तत्वाच्च तथा प्राहुरिभानेतान् महर्षयः ॥* [136]

*प्रशस्तकरसंयोगात् करिणो दन्तिनस्तथा ।*

*सिन्धुराः सिन्धुरमणादेवं निर्वचनक्रमः ॥* [137]

---

[134] श्लोकः - ३१, प्रथमोऽध्यायः, मातङ्गलीला
[135] श्लोकः - ३२, प्रथमोऽध्यायः, मातङ्गलीला
[136] श्लोकः - ३३, प्रथमोऽध्यायः, मातङ्गलीला

अस्मिन्, नागः, गजः, हस्ती, वारणः, मातङ्गः, कुञ्जरः, पद्मी, द्विपः, अष्टप्रहरणः, इभः इति गजस्य १० नामानि प्रयुक्तानि । एवमेव नामलिङ्गानुशासनमिति प्रसिद्धे अमरकोषेऽपि गजानां विविधनामानां परिचयः दृश्यते । यथात्र गजानां नामोक्तं तथा प्रत्येकस्यापि व्युत्पत्तिमुक्तं तद्व्याख्यानग्रन्थेषु । अमरसिंहस्य कृतावस्यां गजानां विंशत्यधिकानि नामान्युक्तानि । यथा - *दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ।*

*सिन्धुरस्सामजः कुम्भी मातङ्गश्च मदावलः ॥* [138]

*मतङ्गजो गजो नागः कुञ्जरो वारणः करी ।*

*इभः स्तम्बेरमः पद्मी यूथनाथस्तु यूथपः ॥* [139]

एषां शब्दानां विवरणमेवमस्ति । [140]

१. स्थूलौ दन्तौस्तः अस्येति दन्ती, दन्तावलश्च

२. हस्तः शुण्डः अस्यास्तीति हस्ती

३. द्वौ रदावस्य स्त इति द्विरदः

४. अनेकेन तुण्डेन वक्त्रेण च पिबतीति अनेकपः

५. द्वाभ्यां पिबतीति द्विपः

६. मतङ्गाख्यराजर्षेर्जातः मतङ्गजः (जनी प्रादुर्भावे)

७. गर्जति माद्यतीति गजः ('गज्' शब्दे मदे च)

८. नगे गिरौ भवः नागः

९. कुञ्जौ कुम्भाधोगर्थावस्यास्तीति कुञ्जरः  कुञ्जे रमत इति वा

१०. अरीन् वारयतीति वारणः   (वृञ् वरणे)

११. करावस्यास्तीति करी

१२. एति मदमिति इभः. (इण् गतौ)

१३. स्तम्बे नदीकुञ्जे रमत इति स्तम्बेरमः,  (रमु क्रीडायां)

---

[137] श्लोकः - ३४, प्रथमोऽध्यायः, मातङ्गलीला
[138] श्लोकः - ४९९, क्षत्रवर्गः, द्वितीयकाण्डः, अमरकोशः
[139] श्लोकः - ५००, क्षत्रवर्गः, द्वितीयकाण्डः, अमरकोशः
[140] अमरकोशस्य व्याख्याग्रन्थतः ।

१४. पद्मं बिन्दुजालं तदस्यास्तीति पद्मी

१५. यूथपः, यूथनाथः --- यूथं गजसमूहं पातीति यूथपः गजयूथमुख्यं नाम

१६. मदोत्कटः -- मदेन उत्कटस्तीव्रः

१७. मदकलः -- मदेन कलो मनोज्ञः

१८. कलभः -- (कल् भाति) कमुदकमन्यतो लभते वा कलभः (डुलभष् प्राप्तौ)

१९. करिशावकः --- करिशिशुर्नाम बालगजश्च

२०. प्रभिन्नः-- प्रकर्षेण भिन्न इव

एतैस्साकं गजानां विविधानामवस्थानां वावस्थाहेतवो वा वर्णिताश्च यथा -

२१. गर्जितः -- गर्जो गर्जनमस्य सञ्जात इति (गर्ज् शब्दे)

२२. मत्तः -- माद्यतीति मत्तः -- मदजलैः प्लावितः गजः (मदि हर्षग्लेपनयोह्)

२३. उद्वान्तः -- मदमुद्वमतीति, (तुवमु उद्गिरणे)

२४. निर्मदः -- निर्गतो मदोऽस्मादिति गतमदगजनामनि मदरहित गजो वा

२५. हास्तिकं-हस्तीनां समूहः, गजता -- गजिनां समूहः ; गजवृन्दनामनी

२६. करिणी, धेनुका, वशा ---- स्त्रीगजनामानि

२७. धयत्येनां करिपोतक इति धेनुका, (धेत् पाने)

२८. वष्टि कामयते गजमिति वशा -- (वश कान्तौ)

२९. गन्धः-- गन्ध्यते हन्यते इति गन्धः (गदि वदनैकधेशे)

३०. कटः -- कटति वर्षतीति, (कटे वर्षावरणयोः) गजगण्डस्थल नामानि

एवं विधेन गजसम्बन्धितानां अनेकानां शब्दानां परिचयोऽपि प्राप्नोति ज्ञायते यथा - मदो {माद्यतेऽनेनेति (मदि हर्षग्लपनयोः)}, दानम् {द्यति हस्तिनमस्योद्गमेन पीडयन्तीति; (दोः अवखण्डने)}, वमथुः {वंयत उद्गीर्यत (तुवमु उद्गिरणे)}, गजस्य कुम्भात् निर्गतं जलं मदावस्थेषु, करिकरशीकरः, कुम्भौ (तु शिरसः पिण्डौ) {शिरस्थितगण्डौ}, (तयोर्मध्ये) विदुः (पुमान्) {कुम्भयोः मध्यस्थितप्रदेशः}

हलायुधकोषो नामान्यस्मिन्नपि ग्रन्थे गजानां १४ विविधनामानां उल्लेखं पश्यामः । यथा *मातङ्गद्विरदद्विपाः करिगजस्तम्बेरमानेकपाः ।*

*कुम्भीकुञ्जरवारणेभरदिनः सामोद्भवः सिन्धुरः ॥* [141]

गजविषयमनुवर्तमानः कोषकारः न केवलं गजानां नामानि परं गजसम्बन्धिनः, गजशास्त्रसम्बन्धिनः इतोऽप्यनेकानंशानत्र परिचाययति । [142]

- अवग्रहः -- ललाटम्
  - धीषिका -- अक्षिकूतम्
  - निर्याणम् -- अपाङ्गदेशे
  - चूलिका -- कर्णमूलम्
  - वाहित्थं -- कुम्भस्य अधः
  - प्रतिमानं -- वाहित्थस्य अधः
  - आसनम् -- स्कन्धक्षेत्रम्
- पद्मकम् -- मुखस्य च शुण्डस्य च उपरिस्थितवर्णमयबिन्दवः -- (बिन्दुजालकम्)
- पक्षभागः -- पार्श्वस्थितास्थि
- दन्तभागः -- यो अग्रतः
- गात्रावरे -- द्वौ पूर्वपश्चात् जङ्घादिदेशौ
- तोत्रं, वैणुकं -- गजान् शिक्षितुम् दण्डौ
- आलानं, बन्धस्तम्भे -- गजान् बन्धयितुं गोष्टः (स्तम्भः)
- श्रृङ्खला, अन्दुकः, निगलः -- गजान् बन्धियितुं निगदः
- सृणिः, अङ्कुशः
- दूष्या, कक्ष्या, वरत्रा - स्नायुनिर्मिता रज्जुः
- कल्पना, सज्जना -- गजस्य अलङ्काराणि
- प्रवेण्यः, आस्तरणम्, पर्णः, परिस्तोमः, कुथः -- गजस्योपरि स्थितानि कम्बलानि

---

[141] पृष्टसङ्ख्या २१४, (आदिपटलद्वयम्), द्वितीयकाण्डम्, हलायुधकोशः ।
[142] श्लोकः - ५०३तः ५०८ पर्यन्तम्, क्षत्रवर्गः, द्वितीयकाण्डः, अमरकोशः ।

- ◦ वीतम् -- असारः गजः
- ◦ वारी -- गजबन्धने

अमरकोशे पुनः गजसम्बन्धिनः केचन अन्ये अंशाः प्रदत्ताः यथा तेषां बन्धनवस्तूनि, तेषां नियन्त्रकसाधनान्याभरणानि च ।[143] हलायुधकोशेऽपि गजसम्बन्धिताः अनेके अंशाः उक्ताः ।[144]

षट्श्लोकेषु मदस्रावी गजः, गजानां विविधाः प्रहाराः, युद्धसज्जिताः, पादैरन्य-वस्तुभिश्च तेषां नियन्त्रणविधानानि, बन्धकवस्तूनि, आलानस्तम्भाः, राजवाहनाय गजः, दुष्टगजः, करिणी, हस्तिपकाः, गजशिक्षकाः इत्यनेकान् गजविचारान् परिचाययिताः ।

हंसदेवस्य मृगपक्षिशास्त्रे वर्गीकरणसन्दर्भे विविधानि गजनामान्युक्तानि [145] यथा दन्तिनः, दन्तावलाः, हस्तिनः, द्विरदाः, गजाः - पुनरत्र भद्रगजाः, मन्दगजाः, मृगगजाः, सङ्कीर्णगजाः; मतङ्गजाः, पद्मिनः, इभाः, स्तम्बेरमाश्चेति । यथान्येषु विविधजातीयांशजेत्यादीनां गजानां वर्णनं ग्रन्थेषु पश्यामः अत्र तेषामेव भिन्न-भिन्नस्वभावजगजानां गजस्यान्यैः समानार्थकशब्दैरुक्ताः । अत्र ज्ञातुं शक्यते यत् हंसदेवः गजेषु भद्र-मन्द्र-मृग-सङ्कीर्णः इति विभागं करोति । प्रष्टव्योऽयं यत् कुतः अन्येषु यथा हस्ति-द्विरद-इभेत्यादिषु एवं विभागः न दृश्यते (यथा भद्रेभः, मन्देभः, मृगेभः . . .) इति ? अत्र प्रायः विविधानां गजप्रभेदानां स्वभावाः भिन्नाः भवन्ति । परं गजानामेव वैशिष्ट्यमिति चिन्तितं स्यात् अथवा पूर्वसूरिभिः रामायणादारभ्य अन्यगज-शास्त्रग्रन्थेष्वेवंविधविभागः कृतः इति वा कारणेन एवमिति शास्त्रकारस्याशयः स्यात् ।

---

[143] तोत्रं वैणुकमालानां बन्धस्तम्भेऽथ शृङ्खले ।
अन्दुको निगडोऽस्त्रीस्यादङ्कुशोऽस्त्री सृणीस्त्रियाम् । दूष्या कक्ष्या वरत्रा स्यात्कलना सज्जनासमे ॥ ५०७
प्रवेण्यास्तरणं पर्णः परिस्तोमः कुथोद्वयम् । वीतंत्वसारं हस्त्यश्वं वारी तु गजबन्धने ॥ ५०७

[144] लग्नः प्रभिन्नो मत्तस्स्यादुपात्तो मदवर्जितः । तिर्यग्दन्तप्रहारस्तु अजः परिणतो मतः ॥
सज्जितः कल्पितो ज्ञेयो बहूनां घटना घटा । चूषा कक्ष्या वरत्रा स्यादालानं स्तम्भ उच्यते ॥
पादकर्म यतं प्रोक्तं यातमङ्कुशवारणम् । उभयं वीतमाख्यातं भेअः स्थूलोच्चयो गतेः ॥
करीरी दन्तमूलं स्याद्वारी च गजबन्धनम् । निगडः पादबन्धश्च हिञ्जीरः शृङ्खलोऽन्दुकः ॥
कलभः करिपोतः स्यादङ्कुशः सृणिरुच्यते । औपवाह्यो राजवाह्यः सन्नाह्यः समरोचितः ॥
व्यालो दुष्टगजः प्रोक्तो हस्तिनी तु वशा स्मृता । आधोरणा हस्तिपका हस्त्यारोहा निषादिनः ॥
गजाजीवास्तु शास्त्रज्ञैर्महामात्रा इति स्मृताः ॥

[145] षष्टश्रेणी- गजगुणादिवर्णनम्, मृगपक्षिशास्त्रम् ।

पुनराङ्ग्लभाषायाम् 'एलिफेण्ट्' इति कथनस्यापि शब्दोत्पत्तिः सुष्ठु ज्ञायते यथा 'एलि' इत्यस्यार्थः ग्रीक् भाषायां वृत्तखण्डः तथैव ' फास् ' इत्यास्यार्थः ल्याटिन् भाषायां बृहत् इति । अत्र अस्योल्लेखः प्रायः गजानां शुण्डमुद्दिश्यैव कृतो वर्तते ।[146] एवमेकत्र व्याकरणरीत्या गजानां नामानां चिन्तनं व्युत्पत्तिदृष्ट्या कृतं दृश्यते । परं पालकाप्यस्य गजशास्त्रयोः गजाः कथं सामसम्भवाः मतङ्गजाश्चाभवन्निति कथासहितं दृश्यते न तेषां विविधनामानि ।

*३.२ - गजोत्पत्तिः*

गजानामेवमनेकनामानि सन्तीति ज्ञात्वा गजानामुत्पत्तिः कथमभूदिति चिन्तितमस्मिन् भागे । सामान्यतया सर्वेऽपि गजशास्त्रसम्बन्धिताः शास्त्रग्रन्थाः गजोत्पत्तिं प्रधानतया चर्चयन्ति । अत्र केचन रचनकाराः केवलं गजोत्पत्तिं कथयन्ति अन्ये केचन पालकाप्यस्याप्युत्पत्तिं विशदतया वर्णयन्ति । पालकाप्यो नाम ऋषिरस्य शास्त्रस्याद्यप्रवर्तकः इति बहुत्रोक्तम् । मातङ्गलीलायाः प्रथमोऽध्यायः नागोत्पत्त्यधिकारः । पालकाप्यविरचितगजशास्त्रस्य प्रथमोऽध्यायोऽस्ति पालकाप्योत्पत्तिक्रमकथनं, तञ्जावूरुग्रन्थालयात् प्राप्तस्य पालकाप्यविरचितगज-शास्त्रस्य प्रथमोऽध्यायः पालकाप्यचरितमिति । नारदमुनिप्रणीतगजशिक्षायां प्रथमः पटलः इति नामदत्वा तस्मिन् गजसृष्टिक्रमकथनमिति भागेनारम्भः कृतः । हस्त्यायुर्वेदः किञ्चिद्भिन्नतया आरभते यथात्र प्रथमोऽध्यायोऽस्ति वनानुचरिताध्यायः इति । कल्पनारत्ने प्रथमः परिच्छेदः दन्तकल्पनाय प्रशस्तं कालं विवृणोति । अस्य कर्ता प्रथमे श्लोके एव पालकाप्यस्यापि स्तुतिं करोतीत्यत्र यद्गौरवं दातव्यं तदर्पयति ।[147] परं नारायणदीक्षितः स्वगजग्रह-प्रकारस्याद्याश्वासे गजानां प्रशंसां कुर्वन् स्वकृतिमारभते ।

---

[146] What is elephant ?, ELEPHANTS majestic creatures of the wild, Jeheskel Shoshani & Sandra Lee Shoshani.

[147] केशान् सोमं गुहं शुक्रं पावकं वा विनायकम् । प्रणम्य कल्पनां वक्ष्ये पालकाप्यं च गौतमम् । १/१, कल्पनारत्नम्

आधुनिककाले सर्वत्रापि जीविनां विषये यदा संशोधनं प्रवर्तते तदा कश्चन क्रमः अनुस्रियते यत् सर्वमान्यं भवति । प्राणिशास्त्रानुगुणं सः सर्वमान्यः क्रमः एतान् विषयान् गर्भस्थीकरोति । एनं सामान्यतः आङ्ग्लभाषायां टैप्स्टडि (Type Study) इति कथयन्ति । क्रमोऽयं सर्वेषामपि प्राणिनां समानः एव । गजविषयेऽपि अयमेव क्रमः अनुसृतोऽस्ति । Habit - स्वरूपः - अत्र प्राणिनां वर्गः, प्राणिपरिवारः, तस्य वैज्ञानिकनामधेयं, आहारक्रमः, वास-स्थानकविषयः, सस्यहारी उत मांसाहारी इत्याद्याः तेषां गुणाः परिगण्यन्ते । गजानां प्राणिवर्गे विद्यमानं स्थानं तु आधुनिककालस्यानुगुणेन एवं विद्यते -

| | | |
|---|---|---|
| Kingdom | : | Animalia |
| Phylum | : | Chordata |
| Sub-phylum | : | Vertebrata |
| Class | : | Mammalia |
| Order | : | Proboscidea |
| Family | : | Elephantidae |

आधुनिककालस्य प्राणिशास्त्राध्ययनक्रमेण तेषामध्ययमेवं प्रकारेण भवति - Habitat - वासस्थनविषयः, Morphology - बाह्यलक्षणानि - अत्र पुनः विशेषलक्षणानि - परिमाणं (Size), करः (Trunk), दन्तः (Dentine), गण्डस्थलं (Temporal glands) - मदजलं (Ichor), उरःस्थानं (Thorax), जठरभागः (Abdomen), जघनप्रदेशः, तथा चर्म (Skin) इति भवन्ति । Muscular System - मांसखण्डव्यवस्था, Skeletal System - अस्थिव्यवस्था, Digestive System - जीर्णाङ्गव्यवस्था, Circulatory System - परिचलनव्यवस्था, Respiratory System - श्वासाङ्गव्यवस्था, Sense Organs - इन्द्रियव्यवस्था, Excretory System - विसर्जनाङ्गव्यूहः, Reproductive System - सन्तानोत्पत्ति - संयोगः - गर्भोत्पत्तिः, Nervous System - नरव्यूहव्यवस्था इति । सामान्यतः प्राणिनः उत्पत्तिर्नाम तद्वैज्ञानिकदृष्ट्या सः प्राणिः केन साकं सामान्यतां भजते कस्य सम्बन्धी कथं तस्य सृष्टिः कस्मात् जीविविशेषादित्येव भवति ।

परं प्राचीनभारतीयशास्त्राणि चिन्तनं वा, एकस्मात् प्राणिनः अन्यस्योत्पत्तिं न बोधयति परं सर्वमपि परमात्मना सृष्टमिति प्रतिपादयति । अतः एतस्मादेव प्राणिनः अस्योत्पत्तिः इति वचस्स्थाने प्राणिनः पक्षिणः वृक्ष-सस्यविशेषस्य वा सष्टिः केनापि विशेषेण हेतुना समभूदिति प्रतिपादयति । गजानामप्युत्पत्तिस्तु तथैवेति वक्तुं अनेकान्युदाहरणानि सन्ति । अतः प्रायः सर्वेषां गजशास्त्रग्रन्थानां निरपवादतया गजोत्पतिः तदुत्पत्तिहेतुर्वा ग्रन्थस्य प्रथमे भागे एव चर्चिताः ।

संस्कृते गजविषयकाः अनेके ग्रन्थाः अद्योपलभ्यन्ते । ते गजानां जीवनमुद्दिश्य अनेकानंशान् ब्रुवन्ति । अत्र स्वीकृतासु गजशास्त्रकृतिषु यथाऽधुनिककालीना पद्धतिः तथैव आदौ गजोत्पत्तिरेव स्वीकृताऽस्ति । सर्वे ग्रन्थाः गजानामुत्पत्तिमेव प्रधानतया प्रथमेऽध्याये चर्चयन्ति । नीलकण्ठस्य मातङ्गलीलायां प्रथमोऽध्यायस्य नाम नागोत्पत्त्यधिकारः । अस्मिन्नधिकारे ४० श्लोकास्सन्ति ये गजानामुत्पत्ति-कारणान्यनेकानीति कथयन्ति ।

एनं विचारं अङ्गाधिपतिः रोमपादः (यस्य राजधानी चम्पा इति नद्यास्समीपमासीत्) ज्ञातुकामः भवति । गजशास्त्रप्रवर्तकः पालकाप्यः यो हि करेणुपुत्रः इति कथितः, गजोत्पत्तिम् एवमङ्गाधिपतिं विशदयति । सूर्यः यस्मादण्डादजायत तस्याण्डस्य भागद्वयं ब्रह्मा हस्ताभ्यां गृहीत्वा ब्रह्मर्षीणां पुरतः सामान्यगायत् । तेन ऐरावतादयः तस्य हस्तस्य दक्षिणकरे धृताण्ड-भागात् प्रादुर्बभूवुः । ब्रह्मणः वामहस्तस्य अण्डभागात् एषामैरावतादीनां धेनुकाः जन्मालभन्त ।

कालक्रमेण एते गजाः, स्वेषां पुत्रपौत्राः, तेषामेव शक्त्युत्साहयुक्ताः जगतः सर्वेष्वपि गिरि-काननदीप्रान्तेषु सुखेनाचरन् । अष्टावप्येते महागजाः (दिग्गजाः) अमारासुरयुद्धे देवनां वाहनत्वेन इन्द्राग्नीनां सहायकाः बभूवुः । कदाचित् युद्धकाले भीताः एते गजाः ब्रह्माणमगच्छन् यत्रैषु मदमुत्पादितवान् विरिञ्चिः । एतेन बलान्विताः गजाः, क्रोधाविष्टाः राक्षसचमूं विनाश्य इन्द्रादिभिस्साकं स्वं स्वं दिशं प्रययौ ।

कदाचित् दुर्वासमहामुनिः इन्द्राय पुष्पमालिकां दत्तवान् या ऐरावतेन नाशिता । एतेन क्रुद्धः दुर्वासः तान् निर्घृणया शशाप । शापबाधितः ऐरावतः सपद्येव विनष्टः परं समुद्रमथनकाले अभ्रमुसहितः पुनः प्राप्तजन्मा यथापूर्वं स्वशक्त्या रराज । अतः ऐरावतः समुद्रमथनकाले क्षीरसागरात् समुत्पन्नः इति प्रथां बभज । [148]

पूर्वं गजाः पक्षिणः आसन् । दीर्घतपः नाम केनचिन्मुनिना शप्ताः गजाः मनुष्याणां वाहनानि भवितुम् । परं दिग्गजाः अस्माद्विमुक्ताः । परं स्वबन्धूनां शापविमोचनार्थमेते दिग्गजाः ब्रह्माणं प्रार्थयामास यत् भुवमागताः गजाः अयोग्याहारात्, अजीर्णात्, गर्हिताहाराद्वा रोगयुक्ताः भवन्तीति । परं ब्रह्मा तेषां शापनिर्वर्तनार्थं नाङ्गीकुर्वन् गजवैद्यविषये कश्चन गजज्ञानी यो गजरोगान् तेषां परिहारोपायान् च जानीयात् प्रादुर्भविष्यतीत्यभणत् ।

कदाचित् रुचिरा नामाप्सरा मतङ्गमुनिना करेणुर्भवितुमभिशप्ता । परं पुनः तच्छापं परिवर्त्य सामगायनऋषेः प्राप्तस्य पुत्रदर्शनेन स्वर्गं प्रतिनिवर्तयितुमादिदेश । एतदनु रुचिरा सामगायन-महर्षिणा पुत्रमेकमसूयत यस्य पालकाप्यः इति नाम चक्रे सामगायनः । भद्र-मन्द-मृगेति त्रिविधगजाः क्रमशः कृत-त्रेता-द्वापरेष्वजायन्त । परं कलियुगे गजाः सङ्कीर्णविधगजाः इति कथिताः येषां विवरणं ग्रन्थे सम्यक्तया दत्तम् ।

पालकाप्यगजशास्त्रम् (त)

गजोत्पत्तिक्रमकथनं द्वितीयाध्याये चर्चितम् । सृष्टिकर्ता ब्रह्मातु प्रथमं जलमसर्जयद्यत्र हैममण्डमप्यसर्जयत्यत्सर्वजीवजनीहेतुः । कालान्तरे सः पुनः मृत्पिण्डमेकं सृष्टवान् यस्मात्सूर्यादीनां जननमभूत् । एतस्मादेवाण्डाद्गजाः अपि प्रादुरभूवन् । [149] इतःपरमुभयोरपि गजशास्त्रग्रन्थयोः अष्टदिग्गजानमुत्पत्ति-विषयोपस्थापितः । ऋषयः तस्मादण्डभागात् गजस्य सृष्टिं करोत्विति प्रार्थितः चतुर्मुखः तमेव गजविशेषं ध्यात्वा सप्तसामानि गायन् दक्षिणहस्ते

---

[148] मातङ्गलीला - प्रथमाध्याये २५तमः श्लोकः ।
[149] पालकाप्यगजशास्त्रे गजोत्पत्तिर्नाम द्वितीयाध्याये प्रथमदशश्लोकाः ।

विद्यमानादण्डभागात् मनोहररूपिणं हस्तिनमुत्पादितवान् ।[150] गुणविशेषानुगुणेन तस्य नाम ऐरावतमित्यकरोत्सः ।[151] व्याख्यासहिते पालकाप्यस्य गजशास्त्रे व्याख्यायामस्य ऐरावतेति नामकरणाय कारणं ब्रूते - इरावती सरस्वती । तस्याः पुत्रत्वेन तद्व्यवहारो युज्यत इति । एतस्यानन्तरमैरावतस्य पत्नीमभ्रमुमपि संसृज्य रमणीयेषु वनेषु विहरन् स्वगुणशीलयुतान् पुत्रानपि सर्जितुमाज्ञापयामास सृष्टिकर्ता । पुनः महर्षिभिः प्रार्थितः विरिञ्चिः एवमेव अन्यानपि गजमिथुनमिथुनसप्तकमसृजत् । तेषां गुणरूपादयः एवं ज्ञातुं शक्यते ।

| क्र | गजस्य नाम | स्वरूपम् | पत्नी | दिक् |
|---|---|---|---|---|
| १ | ऐरा-वतः | सामसृष्टः, सर्वगजश्रेष्ठः, शुभावहः, शुभ्रवर्णः, पक्ष-द्वयं, चतुर्दन्ती, दीर्घवालः, उन्नतः, शक्ति-युतः, सुन्दरश्च; | अभ्रमुः | पूर्व-दिक् |
| २ | पुण्ड-रीकः | रथन्तरसाम्ना सृष्टः, ऐरावतवत् सुन्दरः, पुण्डरीकवत् शुभ्रवर्णश्च; | कपिला | आग्नेय-दिक् |
| ३ | पुष्प-दन्तः | बृहत्साम्ना सृष्टः, षट्पुष्पवर्णचतुर्दन्तयुतः, पुण्डरीकवत्सुन्दरः; ** (रक्ताम्बुजवत्, रक्तवर्णभासुरशरीरं, विकसितमल्ली-कुसुमवत् श्वेतवर्णः, चतुर्दन्तैरुपेतः) ## | ताम्र कर्णी | दक्षिण-दिक् |
| ४ | वामनः | वामदेव्यसाम्ना सृष्टः, श्यामवर्णः, अदीर्घैः दन्तैर्युतः; (सजलमेघवत्, नीलवर्णछुरिताङ्गः, प्रमाणे वामनः, वामनदन्तचतुष्कः) ## | अङ्गना | नैऋत्य-दिक् |
| ५ | सुप्र-तीकः | महावीरः, सुन्दरावयवः, वैरूपसामभिः सृष्टः (राकाचन्द्रमरीचिनिचयप्रसारवत् श्वेतवर्णछुरिताङ्गः, अत्यन्तसौन्दर्ययुतः गजदम्पतिरयम) ## | अनुपमा | प्रतीची दिक् |
| ६ | अञ्जनः | पवमानसाम्ना सृष्टः, अञ्जनाद्रिवर्णः, (संयुक्तमञ्जनगिरिकान्तिपुञ्जवत् निबिडकृष्णकान्ति -झरीछुरितसर्वावयवः) ## | अञ्जना-वती | वायव्य दिक् |
| ७ | सार्व- | वैराजसाम्ना सृष्टः, पद्मनयनः, पद्मवर्णः, पद्मादेव- | शुभ्र- | उदीची |

[150] जवनं बलिनं शूरं रौप्यपर्वतसन्निभम् । युक्तं सर्वैः प्रमाणैश्च धुतिमान्तमनेकपम् ।
मृदुना परिपूर्णेन सुवृत्तेनायतेन च । करेणैकेन चोपेतमाहाराघ्राणकर्मणा ॥
चतुर्भिरायतैस्तीक्ष्णैर्युक्तं दन्तैर्मधुप्रभैः । पृथुकर्णं चतुष्पादं दीर्घमाभूमिवालधिम् । पा.ग.शा द्वितीयोऽध्यायः श्लो १४-१६ ।

[151] रवेण महता गायन् ससर्ज भुवि यन्मुदा । जन्म तस्य रवेणैव तस्मादैरावणः स्मृतः ॥

| | | | | |
|---|---|---|---|---|
| | भौमः | सम्भूतः, भूम्ना सर्वस्मादधिकः (शरत्कालविकसित-कमलोदरकान्तिपूरवत् किञ्चिच्छ्वेतरक्तवर्ण-झरीकवचितसर्वावयवः, मनोहरातिदीर्घशुण्डादण्डः) ## | दन्ती | दिक् |
| ८ | कुमुदः | चन्द्रमसेन साम्ना सृष्टः, नागवरः, (विकसितकुमुद-वत् नोहरश्वेतवर्णछुरिताङ्गः,नयनानन्दकरः) ## | पिङ्गला | ऐशान्य-दिक् |

** चम्पकारुणराजीवमल्लिकाकेतकाम्बुजम्। बन्धूकप्रसवश्चेतिषट्पुष्पाणि प्रचक्षते॥ [152]
## इदं व्याख्यायां वर्तते पालकाप्यगजशास्त्रस्य द्वितीयभागे (पृ.सं-१२९ तः १४७ पर्यन्तम्)

कोष्टकः - ७

(व्यास) गजशास्त्रेऽपि यथापूर्वं निर्दिष्टं द्वितीयाध्याये दिग्गजोत्पत्तिकथनमिति नामाङ्कितेे गजोत्पत्तिक्रमकथनमुक्तम् ।

नारदस्य गजशिक्षा

अस्यां कृतौ नारदं प्रति वासवस्य प्रथमप्रश्नः एव, कथं पूर्वं गजाः सृष्टाः? इति । [153] गजसृष्टिक्रमकथनम् नाम प्रथमपटले नारदः वासवं प्रति गजजन्मारम्भवृत्तान्तं कथयति । [154] इन्द्रेण गजानां सृष्टिः, वंशाः, वंशवृद्धिः, गुणाः, ग्रहणं, रक्षणीय-शिक्षणीयविधानानि, बलमित्येते विचाराः पृष्टे सति नारदः सर्वानप्युद्दिश्य प्रथमं तेषां जननमवोचत् । सामगायनेन ब्रह्मा गजानसृजत् । ऐरावत-अभ्रमु, कपिला-पुण्डरीकः, पुष्पदन्त-ताम्रकर्णी, अङ्गना-वामनः, अनुपमा-सुप्रतीकः, अञ्जना-अञ्जनः, शुभ्रदन्ती-सार्वभौमः, कुमुद-पिङ्गलेति अष्टदिग्गजान् अप्यसृजत् । आदावेते पक्षयुक्ताः यथेच्छं विहरन्ति स्म महाबलाः त्रिलोकगामिनः । एते एव दिग्गजाः अप्यभूवन्, देवतानां साहाय्यम् अकुर्वन्नसुराहवेषु वाहनत्वेन च । अग्रे एषामपत्यानि बलसत्त्वगुणान्वितानि गर्वयुक्ताः अभवन् । बहुकोलाहलमकुर्वन् साधूनां पर्णकुटीरेष्विति शप्ताः पक्षहीनाः, दुर्बलाः, द्विदन्ताश्च भूत्वा भुवमागत्य तत्र तत्र वासमारब्धवन्तः अङ्गादिदेशेषु । एवं यथान्येषु ग्रन्थेषु विषदतया गजजन्मवृत्तान्तं कथितं न तथात्र ।

[152] पालकाप्यगजशास्त्रे द्वितीयप्रकरणे दिग्गगोत्पत्तिः इति भागस्य ११ श्लोकतः ४३पर्यन्तम् ।
[153] गजशिक्षा- प्रथमः पटलः श्लोकसङ्ख्या ७ ।
[154] नारदविरचितहस्तिशिक्षायां प्रथमपटले प्रथम २४ श्लोकाः ।

आश्चर्यकरः विषयो नाम हस्त्यायुर्वेदः न किमपि भणति गजोत्पत्तिविचारे ।[155] अत्रादावेव गजान् गृहीत्वा पालकाप्यस्य दर्शनं प्राप्नोति रोमपादः । तदुत्तरं गजानां विविधविचारान् पृच्छति परं गजोत्पत्तिं न ।

अन्याकरेषु

<u>*रामायणे -*</u>

गजोत्पत्तिविषये रामायणस्य अरण्यकाण्डस्य १४ तमस्सर्गः किञ्चिद् ब्रवीति । अत्र गरुडः अरण्ये वसन्तं सपरिवारं रामं प्रति स्वपरिचयदानसमये एवं गजानामैरावतस्योत्पत्तिं च ब्रूते । प्रजापतेः दक्षस्य षष्टिपुत्र्यः । तासु अष्टौ सुताः कश्यपस्य जायाः अभवन् । ताः अदितिः, दितिः, दनु, कालिका, ताम्रा, क्रोधवशा, मनु, अनला चेति । कश्यपः क्रोधवशायामेताः दश- पुत्र्यः असृजत् - मृगी, मृगमन्दा, हरि, भद्रमदा, मातङ्गी, शार्दूली, श्वेता, सुरभि, सरसा, कद्रू चेति ।[156] भद्रमदायाः पुत्री इरावती यस्याः पुत्रः ऐरावतः । ऐरावतः दिग्गजत्वेन प्रथां बभज । पुनः मातङ्गी नाम कन्यायामन्ये गजाः अजायन्त ।[157] अन्ये सर्वेऽपि दिग्गजाः श्वेतायाः सन्तानम् ।[158] अतः प्रायः ऐरावतस्य वंशवृक्षः एवं भवितुमर्हति - विष्णोः - ब्रह्मा-कश्यपः- भद्रमता - इरावती - ऐरावतः । तथैवान्यगजानां वंशवृक्षः एवं कथयितुं शक्यं - विष्णोः - ब्रह्मा - कश्यपः - मातङ्गी - गजाः । एवमेव पुनः दिग्गजानां वंशानुक्रमः एवं निरूपयितुं शक्यम् - विष्णुः - ब्रह्मा - कश्यपः - श्वेता - दिग्गजाः इति ।

इन्द्रः कश्यपस्य अदित्याः जातः । अतः स्वभ्रातरमैरावतमेव सः वाहनत्वेन स्वीकृतवान् । कदाचित् शीघ्रकोपी दूर्वासमुनिः इन्द्रमभिनन्दन् तस्मै पुष्पहारमेकं समर्पितवान् । इन्द्रः तमैरावस्य दन्तेऽलङ्कृतवान् । पुष्पगन्धेनाकर्षिताः मधुकराः तत्रागतेषु तैः कुपितः ऐरावतः तं पुष्पहारं भूमौ निपात्य तं नाशितवान् । एतेन क्रुद्धः

---

[155] हस्त्यायुर्वेदे चतुर्थे विभागे उत्तरस्थानस्य द्वाविंशः अध्यायः यद्यपि श्रीगजसम्भवाध्यायः इति कश्चनाध्यायः दृश्यते तत्र गजोत्पत्तेः न कोऽपि सम्बन्धः वर्तते । पृष्टसंख्या ६६९ मध्ये ।

[156] श्लोकसङ्ख्या २१-२२, १४तमस्सर्गः, अरण्यकाण्डः, वाल्मीकिरामायणम् ।

[157] श्लोकसङ्ख्या २३ - २५, १४तमस्सर्गः, अरण्यकाण्डः, वाल्मीकिरामायणम् ।

[158] श्लोकसङ्ख्या २६, १४तमस्सर्गः, अरण्यकाण्डः, वाल्मीकिरामायणम् ।

मुनिः - देवाः मदयुताः स्वशक्तिभ्यः चिरयौवनाच्च, अतः सर्वेऽपि स्वयौवनात् स्वशक्तितश्च प्रभ्रष्टाः भवन्त्विति शशाप । शापात् देवाः स्वयौवनविहीनाः वृद्धाः अभवन् । दूर्वाससः देवानां शक्तिविरहाय दत्तस्य शापस्य कारणं स्वयमेवेति विचिन्त्यैरावतः भिया, ह्रिया च क्षीरसागरं प्रविश्य तत्र विष्णोः प्रीत्यर्थं तपः आचरत् । अत्र देवाः असुरैस्साकं मिलित्वा समुद्रमथनमकुर्वन् यत्रैरावतादयः प्राप्ताः । दीर्घकालपर्यन्तं क्षीरसागरवासात्सः

श्वेतवर्णीयः जातः इति ।[159]

स्कान्दपुराणे आसुरकाण्डे ऐरावतः शूरपद्मेत्यसुरेण पराजितः, भग्नदन्तश्च मूर्छितोऽभूत् । परं बहुकालोत्तरमुत्थायारण्यमेकं प्रविश्य शिवं तपसा प्रसाद्य,

स्वदन्तानाप्नोदिति ।[160]

पालकाप्यविरचितः आयुर्वेदसम्बन्धी महाग्रन्थः हस्त्यायुर्वेदः इति । अस्मिन् यद्यपि विशेषाध्यायत्वेन अनुक्तोऽस्ति विषयः क्वचित्तूल्लेखः दृश्यते । यथा पूर्वमुक्तं तथैवात्रापि किञ्चिदिव दृश्यते गजानामुत्पत्तिविचारः । अस्य उद्ग्रन्थस्य महारोगस्थानस्य वनानुचरिताध्यायो नाम प्रथमाध्याये एवायं विषयः उपस्थापितः । वारणाः अण्डे जाताः । तदण्डन्तु तेजसात्मकम् आसीत् । मार्ताण्डकायभागादेते सृष्टाः आसन् । अस्मादेव ऐरावतादयः समुत्पन्नाः । कपालस्य भागात् पुण्डरीकादयः उत्पन्नाः ।[161]

सोमेश्वरस्य मानसोल्लासे गजानामुत्पत्तिविषये न कोऽप्युल्लेखः दृश्यते । अत्र गजविषयकाः गजवनतः आरभते ।

शिवतत्त्वरत्नाकरे गजोत्पत्तिविषये एवं विषदीकृताः । भूमेः गोलद्वयं

---

[159] व्यासप्रणीतमहाभारतस्य आदिपर्वणः अष्टादशतमोऽध्यायः ।

[160] वेट्ट्म् मणिसङ्कलितात् पुराणिक् एन्सैक्लोपीडियातः - ऐरावत इति भागात् ।

[161] अण्डे किल समुत्पन्ना वारणाः पौर्वकालिकाः । तच्चाण्डं तैजसं प्रोक्तमतः क्रीडन्ति पांशुभिः ॥ २०७/१/१
मार्ताण्डकायशकलैस्तण्डमभवत्किल ॥ तस्मादैरावतः श्रीमानुत्पन्नः प्रथमो गजः ॥ २०८/१/१
पुण्डरीकादयः पश्चात्कपालशकलेऽभवन् । तैजसीं तनुमिच्छन्ति नागानां भूतचिन्तकाः ॥ २०९/१/१
तच्चाण्डमर्कतनुजैर्जातं तन्मयमेव च । समानजन्मयोनित्वादिह तस्मान्मतङ्गजाः ॥ २०१/१/१

तालवाद्यवत् कृत्वा मतङ्गमुनिः शिवं तोषयितुं सामगायनं कुर्वन् वादयामास । तदा गजाः जाताः इति कारणेन ते सामजाः इति कथिताः । कश्यपप्रजापतेः त्रयोदशी पत्नी क्रोधा नाम्नी । तस्याः द्वादशपुत्रिषु भद्र-मुद्रा नाम्न्याः ऐरावतो नाम गजः अजनि । अन्ये दिग्गजाः शतायाः पुत्राः । क्रोधायाः अन्यापुत्री मातङ्गा । एतस्यां प्राप्तजन्मानः गजाः मातङ्गाः इत्येव ख्याताः अभवन्। [162]

३.२ - गजानां वर्गीकरणम्

*(जात्यंशदेशवर्णच्छायागन्धबलसत्त्वगुण-गत्यावर्तेद्यादीनामाधारेण)*

जीवविज्ञानस्यात्यन्तविशेषः विभागोऽयं वर्गीकरणशास्त्रम् । वर्गीकरणं सामान्यतया गुणविशेषाणामाधारेण क्रियते । पाश्चात्यवर्गीकरणशास्त्रे आधारः एकः एव । केरोलस् लिनेयसित्यस्य कस्यचन वर्गीकरणज्ञानिनः सिद्धान्तानुसरेण सर्वेषां जीविनां वर्गीकरणं कृतम् । यथोक्तं तत्रानुसृतः क्रमः एवम् - Kingdom, Phylum, Sub-phylum, Class, Order, Family, genus, species इत्यादि । परं भारतीयवर्गीकरणं तु गुणवैशिष्ट्यानुसारं, वर्ण, जातीत्यादिकाननेकानंशानवलम्बते । अतः संस्कृत-गजशास्त्रग्रन्थेषु कथिताः वर्गीकरणविचाराः अत्र अनुसृतः । पूर्वोक्तरीत्या यद्यपि प्रधानतया चत्वारः ग्रन्थाः अत्र परिगणिताः अस्मिन्विषये अन्येऽपि ग्रन्थाः परामृष्टाः अत्र ।

भारतीयगजशास्त्रानुसारं गजानां वर्गीकरणं मान-सत्त्व-अंशक-गुण-वर्ण-छाया-वर्ण इत्याद्यनेकानंशानाधारीकृत्य कृतं वर्तते ।

गजवर्गीकरणाय परिगणिताः अंशाः एवं सन्ति - मानः, अंशः, सत्त्वम्, अन्वयः/कुलम् बलं, वर्णः, छाया, शुभाशुभाः जातिः इति । यद्यपि अनेकसाहित्यप्रकारेषु गजवैविध्यविषये उक्तास्सन्ति, तेषां शास्त्रीयत्त्वमस्तिवा इति प्रश्नः विहितः एव । परमिदं ज्ञानं आबहुकालादेवासीदिति साधयितुं

[162] शिवतत्त्वरत्नाकरस्य सप्तमकल्लोलस्य एकादशस्तरङ्गस्य ४-७श्लोकपर्यन्तम् ।

बहुत्रैषामुदाहरणान्युपलभन्ते । अत्रोद्धर्तुं रामायणे गजानां बहुविधत्वं क्वचिदुक्तम् । तेषु कानिचनात्रोदाहृतानि -

| उल्लेखः | श्लोक | सर्ग | पृष्टसङ्ख्या |
|---|---|---|---|
| भद्रादिगजानामुल्लेखः (अयोध्याकाण्डः) | ८ | ७१ | ९५ |
| विविधजातीनां गजाः (बालकाण्डः) | २३,२४,२५ | ६ | ५२ |
| दिग्गजाः आकाशे चरन्ति (सुन्दरकाण्डे) | १७१/७५, २ | १, १, ५७ | २६, २७, ४२३ |
| उत्तमजातीनां गजाः (सुन्दरकाण्डे) | ३२ | ६ | ६७ |

कोष्टकः - ८

गजमानः

गजानामौन्नत्य-स्थौल्य-दैर्घ्याणां परिगणनमस्मिन् विभागे कृतम् । एतेषां गुणानामाधारेण गजानां गुणगणनं प्रचलति । सर्वेऽपि ग्रन्थकर्तारः विभिन्नानंशानाधारीकृत्य एषां निर्धारणं कुर्वन्ति । सर्वे गजाः एषु विषयेषु न भजन्ते समानतां; मानाधारेण केचन उत्तमगजाः, केचन मध्यमगजाः अन्ये केचन अधमगजाः इति ज्ञाताः भवन्ति । गजानामौन्नत्यानुसारमेव तेषामुपयोगितायाः निर्णयः जायते ।

मातङ्गलीलायां माननिर्णयाध्यायो नाम षष्टाध्याये गजप्रमाणविषये एवमुक्तम् । प्रथमे एव श्लोके मापनवस्य विधानमुक्तं यत् दैर्घ्यम् (length) नेत्रतः पेचक (वालमूलं) पर्यन्तं, तेषां औन्नत्यं (height) तेषां पादाङ्गुलीतः तेषां भुजपर्यन्तं, तेषां स्थौल्यं (girth) शरीरस्य मध्यभागे चेति । एवं क्रमेण अत्रोक्तं विषयं वक्तुं शक्यते । (अत्र मानप्रमाणः हस्तः वर्तते)

| गज-विधाः | जननकाले | | | हस्तिनः | | | करिण्यः | | |
|---|---|---|---|---|---|---|---|---|---|
| | भद्रः | मन्दः | मृगः | भद्रः | मन्दः | मृगः | भद्रः | मन्दः | मृगः |
| दैर्घ्यम् | - | - | १ १/२ | ९ | ८ | ७ | ८ | ७ | ६ |
| स्थौल्यम् | - | - | २ | १० | ९ | ८ | ९ | ८ | ७ |
| औन्नत्यम् | - | - | १ | ७ | ६ | ५ | ६ | ५ | ४ |

कोष्टकः - ९

इदमप्युक्तं यत् तेषां संवर्धनगतिः दशवर्षपर्यन्तं वार्षिकं पञ्चाङ्गुल्यः इति । परं केचन गजाः अधिकतया स्थौल्य-दैर्घ्यमौन्नत्यं वा प्रदर्शयन्तीत्यतः अस्य समन्वयः तत्र न शक्यते । ये गजाः सामान्यं सम्प्रवर्धनं प्रदर्शयन्ति ते कल्याणगजाः इत्युक्ताः । [163]

गजशास्त्रग्रन्थयोः मानविषयकचर्चा क्वचिदन्ते दृश्यते । गजानां परिमाणविषये गजशास्त्रस्य नवमोऽध्यायः विशदीकरोति २० श्लोकेषु । भद्रमन्दमृगणां प्रमाणं कथितमेवम् -

| गजविधः | दैर्घ्यम् | औन्नत्यम् | स्थौल्यम् |
|---|---|---|---|
| भद्रः | ९ | ७ | १० |
| मन्दः | ८ | ६ | ९ |
| मृगः | ७ | ५ | ८ |

अत्रानुसृतं मानः अरत्निभिः गण्यते ।अष्ट-अरत्निदीर्घः, दशारत्नि उन्नतः, एकादश-अरत्निस्थूलः गजः अरालः, यो निन्दितः। [164]

कोष्टकः - १०

इदानीमुत्तममध्यमाधमगजानां प्रमाणं कथयति ।

| गजविधः | दैर्घ्यम् | औन्नत्यम् | स्थौल्यम् |
|---|---|---|---|
| उत्तमः | ९ | ७ | १० |
| मध्यमः | ८ | ६ | ८/९ |
| अधमः | ७ | ५ | ८ |

कोष्टकः - ११

अत्रानुसृतं मानं तु हस्त/अरत्निभिः ।

(भद्रादिगजमानविषये तथैवोत्तमादि-गजमानविषये च स्थौल्यं विना अधिकः विशेषः नास्तीति सम्यग् ज्ञायते अनेन । )

ग्रन्थान्तरे इति पालकाप्यगजशात्रे अयमेव विषयः भिन्नरीत्योपस्थापितः । [165]

उत्तमगजादेकस्याप्यरत्नेराधिक्यमराळः इति स्मृतः । द्वयाधिक्यञ्चेत् अत्यराळः

[163] प्रथमतः षष्टश्लोकपर्यन्तं माननिर्णयाध्यायो नाम षष्टोऽध्यायः मातङ्गलीला ।

[164] गजशास्त्रे तु ग्रन्थान्तरे इत्युक्त्वा, गजशास्त्रे (व्यास) व्यासप्रोक्ते गजशास्त्रे इत्युक्त्वा, उक्त विषयस्य कश्चन मतभेदः उक्तः यत्रारालगजस्य वर्णनमेवं कृतम् -

अष्टहस्तोच्छ्रितो नागो दशहस्तायतस्तथा । एकादशपरीणाहो ह्यराळमिति तं विदुः॥

अग्रे अनुवर्तमानः गजशास्त्रे पुनः कथ्यते-नाहतो द्वादशारत्निरत्यराळ इति स्मृतः । अत्यराळमराळं च न गृह्णीयात्कदाचन ॥ श्लोकोऽयं (व्यास) गजशास्त्रे अत्र न दृष्टः परं श्लोकत्रयानन्तरं दृष्टः -सामान्यारालगजलक्षणमिति भागे ।

[165] पञ्चोन्नतः सप्तकरं च दीर्घो ह्यष्टौ च हस्ताः परिणाहयुक्ताः । एकद्विवृद्ध्या मृगमन्दभद्राः सङ्कीर्णनागोऽनियतप्रमाणः ॥

इति । उभावपि निन्दितौ । (उभयत्राप्युक्तोऽयं परं गजशात्रे तु पाठान्तरे)

अग्रे शुभमध्यकनिष्ठः इति गजानां मानमुक्तम् । [166] सौलभ्यार्थं कोष्टकः कल्पितः।

| गजविधः | दैर्घ्यम् | औन्नत्यम् | स्थौल्यम् |
|---|---|---|---|
| शुभः | ९ | ७ | १० |
| मध्यः | ८ | ६ | ९ |
| कनिष्ठः | ७ | ५ | ८ |

अनुसृतं मानं तु अरत्निभिः । (यथा पूर्वं भद्रगजः उत्तमः शुभश्च, मन्दः मध्यमद्वयं, मृगः अधमः कनिष्ठश्च मानविषयेऽपि)

कोष्टकः - १२

कनिष्ठादरत्निमात्रात् हीनश्चेत् वामनः, वामनादपि हीनः कुब्जः । उभावपि निन्दितौ । यद्यपि गजपरिमाणं समाप्तमिति गजशास्त्रं कथयति, दिग्गज-परिमाणमित्यनुवर्तते परिमाणविचारः । [167] ऐरावतादीनां दिग्गजानां मानमुच्यते यत्तेषामौन्नत्यं सप्तशत-योजनानि, नवशतयोजनानाम् आयताः, तथैव स्थौल्यं तु दशशतयोजनानीति । अस्मिन्नेव खण्डे मापनमप्युक्तमेवम् -

*मुखादापेचकं दैर्घ्यं पृष्टपार्श्वोदरान्तरा ।*

*आनाह उच्छ्रयः पादाद्विज्ञेयो यावदासनम् ॥*

*परिणाहः प्रमातव्यः कक्षापृष्टोदराश्रितः।*

*रज्वा तन्त्र्यादिना वापि प्रमाणं तु प्रचक्षते॥* [168]

अस्य प्रमाणप्रकरणस्यान्ते उभयत्रापि परमाणुतः योजनपर्यन्तमपि प्रमाणमुक्तम् । [169]

---

[166] गजशास्त्रे तु वैय्यासिक्ये इत्युक्त्वायं विषयः उपस्थापितः । परं (व्यास) गजशास्त्रे उत्तमगजप्रमाणमिति कृत्वा एवं विवरणं दत्तम् ।

[167] अयं भागः (व्यास) गजशास्त्रे न दृश्यते ।

[168] श्लोकसङ्ख्या ४६, ४७, नवमप्रकरणं, गजशास्त्रम् । गजशास्त्रे (व्यास) अयं भागः नास्ति ।

[169] परमाणुस्सुसूक्ष्मत्वाद्भूमो ग्राह्यो न चक्षुषा । ते चाष्टौ त्रसरेणुस्स्यात्त्रसरेणोस्तथाष्टकम् ॥
रथरेणुस्तदष्टाभिर्वालाग्रं समुदाहृतम् । वालाग्राणि तथा चाष्टौ लीक्षेति समुदाहृता ॥
अष्टौ लीक्षा भवेद्यूकाताश्चाष्टौ यव उच्यते । अङ्गुलं स्याद्यवाश्चाष्टौ पादोऽर्त्नेष्षडङ्गुलः ॥
द्विवितस्तिररत्निस्स्याद्वितस्तिर्द्वादशाङ्गुलः । चतुर्वितस्तिः किष्कुस्स्यात् द्वौ किष्कू धनुरुच्यते ॥
धनुस्सहस्रं गोळस्स्यात्क्रोशस्स्याद्गोलयुग्मतः। क्रोशद्वयं तु गव्यूतिस्तद्द्वयं योजनं स्मृतम्। अष्टौ धनुस्सहस्राणि योजनं परिकीर्तितम् ॥ एतेन गजलक्षणादि कथनमिति नवमं प्रकरणं समाप्तं भवति गजशास्त्रे । परं गजशास्त्रे (व्यास) इदमष्टादशकं प्रकरणमित्युक्तम् ।

पालकाप्यः हस्त्यायुर्वेदोऽपि अस्मिन् विषये एवमभिप्रैति - गजशिशुः सामान्यतया १,३/४ अरत्न्युन्नतः, २ अरत्निस्थूलः, अरत्निद्वयं वितस्त्येकञ्च दीर्घः भवति । प्रतिवर्षं तेषां संवर्धनगतिस्तु अङ्गुलचतुष्टयं, १/५ यवमात्रमौन्नत्ये, अङ्गुलपञ्चकं-यवत्रयंच स्थौल्ये, दैर्घ्ये अङ्गुलषट्कं वार्षिकं पञ्चवर्षपर्यन्तमिति । रज्जु-दण्डाः वात्र तेषां माननिर्णयार्थं उपयुक्ताः ।

सोमेश्वरः स्वमानसोल्लासकृतौ मानाधारेण गजानां सप्तभेदान् कथयति [170] यथा-(१)शुद्धः(२) अरालः (३) अत्यरालः (४) मध्यमानः (५) कनिष्ठः (६) वामनः (७) कुब्जः इति ।

| क्र. | विधः | औन्नत्यम् | दैर्घ्यम् | स्थौल्यम् | अभिप्रायः |
|---|---|---|---|---|---|
| १ | शुद्धः/शुभः | ७ अरत्नयः* | ९ अरत्नयः | १० अरत्नयः | शुभः |
| २ | अरालः | ८ अरत्नयः | १० अरत्नयः | ११ अरत्नयः | निन्द्यः |
| ३ | अत्यरालः | ९ अरन्त्नयः | ११ अरत्न्यः | १२ अरत्नयः | निन्द्यः |
| ४ | मध्यमानः | ६ अरत्नयः | ८ अरत्नयः | ९ अरत्नयः | - |
| ५ | कनिष्ठः | ५ अरत्नयः | ७ अरत्नयः | ८ अरत्नयः | - |
| ६ | वामनः | ४ अरत्नयः | ६ अरत्नयः | ७ अरत्नयः | निन्द्यः |
| ७ | कुब्जः | ३ अरत्नयः | ४ अरत्नयः | ६ अरत्नयः | निन्द्यः |

* अरत्निर्नाम सप्तकोष्टतता अङ्गुलिकरेऽपि च ।

कोष्टकः - १३

बसवभूपालस्य शिवतत्त्वरत्नाकरः एवमेव वर्गीकरणमुपस्थापयति भेदद्वयमृते ।

१. कुब्जगजविधस्य उल्लेखः न दृश्यतेऽत्र ।

२. अत्यरालोऽपि गजः शुभः इत्येव परिगणितः ।

भद्रः, मन्दः, मृगश्चेति त्रिविधाः गजाः प्रोक्ताः मानसहितम् ।

| गजविधः | औन्नत्यम् | दैर्घ्यम् | स्थौल्यम् |
|---|---|---|---|
| भद्रः | ६ हस्ताः ** | ८ हस्ताः | ९ हस्ताः |
| मन्दः | ७ हस्ताः | ९ हस्ताः | १० हस्ताः |
| मृगः | ५ हस्ताः | ७ हस्ताः | ८ हस्ताः |

** हस्तो नाम प्रकोष्टे विस्तृत-करः । परं सङ्करविधाः गजाः न निर्दिष्टमानं भजन्ते । [171]

कोष्टकः - १४

[170] मानसोल्लासः - द्वितीयविंशतौ तृतीयाध्याये श्लोकाः २२३-२२५ ।

[171] शिवतत्वरत्नाकरस्य सप्तमकल्लोके एकादशस्तरङ्गे श्लोकाः २७ - ३१ ।

माननिर्णये पालकाप्यगजशास्त्रं भद्र-मन्द-मृगेति गजविधविषये तेषां मानविषये च एकस्मिन्नेव श्लोके एवं विवृणोति - [172]

*नवाष्टौ सप्त चायामाः सप्तषट् पञ्च चोच्छ्रयाः।*

*नाहादश नवाष्टौच भद्रमन्द्रमृगाः क्रमात् ॥*

एतया गजमानविषयस्य चर्चया विषयस्तु स्पष्टः यदुत्तरकालीनाः गजविषयक-ज्ञानसङ्ग्राहकाः गजशास्त्राधारेणैव स्वस्यानेकान् विचारानुपस्थापितवन्तः इति ।

यतो हि गजमानं यदुक्तं मातङ्गलीलायां, गजशास्त्रयोश्च तदेव दृष्टं मानसोल्लासे शिवतत्त्वरत्नाकरे च । सर्वेषामपि तुलनेन ज्ञातं भवतीदम् ।

*गजविधः (जातिः) -*

गजानामपि विविधजातयः दृष्टाः । गजजातिविषयकप्रथमोल्लेखः प्रायः रामायणाल्लभते यत्र गजाः भद्र-मन्द्र-मृग-सङ्कीर्णश्चेति चतुर्विधाः इति भणिताः । [173]

स्मर्तव्यः यत् वराहमिहिरस्य बृहत्संहिताऽपि गजानां एताः एव गजजातयः इति ब्रवीति । वराहमिहिरस्य बृहत्संहितापि विविधगजानां गुणविशेषमेवं वदति । अत्र हस्तिविषयकचिन्तनं अध्यायद्वये दृश्यते । प्रथमं सप्तषष्टितमोऽध्यायः यस्मिन्नाहत्य दशश्लोकाः सन्ति । अत्र चर्चिताः विषयाः गजवर्गीकरणं, तेषां मानवर्णौः, तेषां शुभाशुभलक्षणञ्च ।

वर्गीकरणे प्रमुखतया गजानां विधचतुष्टयमित्युक्तम् । ते भद्रगजाः, मन्दगजाः, मृगगजाः, सङ्कीर्णगजाश्चेति । अत्र तेषां स्वभावाः अपि तथैवोक्ताः । [174] एषां पुनः

---

[172] पा.ग.शा- सप्तमप्रकरणस्य सप्तमः श्लोकः ।

[173] भद्रैर्मन्द्रैर्मृगैश्चैव भद्रमन्द्रमृगैस्तथा ।
भद्रमन्द्रैर्भद्रमृगैर्मृगमन्द्रैश्च सा पुरी ॥ बालकाण्डः, २५/६ अध्यायः

[174] मध्वाभदन्ताः सुविभक्तदेहा न चोपदिग्धा न कृशाः क्षमाश्च ।
गात्रैस्समैश्चापसमानवंशा वराहतुलयैर्जघनैश्च भद्राः ॥
वक्षोऽथ कक्षावलयः श्लथाश्च लम्बोदरस्त्वग्बृहती गलश्च ।
स्थूला च कुक्षिः सह पेचकेन सैंही च दृग् मन्दमतङ्गजस्य ॥
मृगास्तु ह्रस्वाधरवालमेढ्रास्तन्वङ्घ्रिकण्ठद्विजहस्तकर्णाः ।
स्थूलेक्षणाश्चेति यथोक्तचिह्नैः सङ्कीर्णनागा व्यतिमिश्रचिह्नाः ॥
श्लोकाः प्रथमतः तृतीयपर्यनतम् हस्तिलक्षणाध्यायो नाम सप्तषष्टितमोऽध्यायः, वराहमिहिरस्य बृहत्संहिता ।

दैर्घ्यादिमानमप्युक्तमस्मिन्नध्याये । मदेऽपि वर्णभेदः वर्तते इत्यत्र वर्णितोऽस्ति । तत्सर्वमेवं कृतयत्नः कोष्टकद्वारेण कथयितुम् - [175]

| क्र | गजविधः | औन्नत्यम् | दैर्घ्यम् | परिणाहः | मदवर्णः |
|---|---|---|---|---|---|
| १ | मृगः | पञ्चहस्ताः | सप्तहस्ताः | अष्टहस्ताः | कृष्णवर्णः |
| २ | मन्दः | षट् हस्ताः | अष्टहस्ताः | नवहस्ताः | हरिद्रकवर्णः |
| ३ | भद्रः | सप्तहस्ताः | नवहस्ताः | दशहस्ताः | हरितवर्णः |
| ४ | सङ्कीर्णः | अस्य सर्वमनिश्चितम् भवति । | | | विमिश्रः |

कोष्टकः - १५

पालकाप्यस्य (व्यास) गजशास्त्रे गजजातिलक्षणनिरूपणम् नाम कश्चन भागः उपलभ्यते । अस्मिन् चतसृणां गजजातीनां विवरणं दृश्यते यथा भद्रगजाः - श्रेष्ठाः, मन्दगजाः -मध्यमाः, मृगगजाः - अधमाः, सङ्कीर्णगजाः - एषां मिश्रणम् । एते क्रमशः कृतयुगे, त्रेतायुगे, द्वापरयुगे कलियुगे च जन्म लभन्ते । [176]

कृते युगे लब्धजन्मानः भद्रगजाः एवं वर्णिताः । ते पक्षद्वययुताः, चतुर्दन्तयुक्ताः, स्वैरविहारिणः बलशालिनश्चासन् । ऋषीणां शापानां कारणेन त्रेतायुगे लब्धजन्मानः मन्दगजाः भद्रगजादपि क्षीणबलयुताः आसन् । द्वापरे प्राप्तजन्मानः एताभ्यामपि क्षीणशक्तयः मृगगजाः इति कथिताः । परं कलियुगे जाताः सङ्कीर्णगजाः इति कथिताः । अस्मिन् युगे भद्र-मन्द-मृगगजानां गुणानां प्रकटणं कुर्वन्ति सर्वे गजाः । भद्रेत्यादीनां गजानां लक्षणान्युक्तानि । [177]

| शरीरभागः | लक्षणम् | शरीरभागः | लक्षणम् | शरीरभागः | लक्षणम् |
|---|---|---|---|---|---|
| गात्रम् | स्थूलम्, अत्युन्नतम् | ऊरुः | स्निग्धः | हस्ताग्रः | महीं स्पृशति |
| कुम्भस्थलम् | सुवृत्तम् | दन्तः | स्निग्धः | तालुः | आताम्रः |

[175] वराहमिहिरस्य बृहत्संहितायां हस्तिलक्षणाध्यायो नाम सप्तषष्टितमोऽध्याये चतुर्थ-पञ्चमश्लोकौ च ।
कृते कामप्रचारस्तु कामरूपधरा गजाः । त्रेतायां द्वापरेऽन्यत्र वाहनत्वेन योजिताः

[176] कृते कामप्रचारस्तु कामरूपधरा गजाः । त्रेतायां द्वापरेऽन्यत्र वाहनत्वेन योजिताः । ।
त्रेतायां तद्गुणे किञ्चिन्मन्दत्वान्मन्द उच्यते । द्वापरेऽपि च ते सर्वे गच्छन्ति मृगतां यतः ॥
ततस्तत्र समुत्पन्नो मृग इत्यपि गीयते । कलौ तद्गुणसाङ्कर्यात्सङ्कीर्ण इति उच्यते । श्लो -३,४,५/सप्तमं प्रकरणम्/पा.ग.शा ।

[177] अत्र ज्ञापनीयः यत् अस्य ग्रन्थस्य सप्तश्लोकेषु केवलं सर्वेषां गजविधानां लक्षणान्युक्तानि । परं भद्रगजस्य यादृशं विवरणं दृश्यते न तथा अन्येषाम् । परं ग्रन्थान्तरे इति पुनः केचन श्लोकाः प्रदत्ताः । तत्साकं वैय्यासिक्ये इति पुनः केचन श्लोकाः दत्ताः ।

| | | | | | |
|---|---|---|---|---|---|
| कर्णः | विस्तीर्णः | कराङ्गुलीकः | रक्तोत्पलाकरः | कण्ठः | पृथुपीनः |
| वक्त्रम् | स्निग्धम् | वालः | विशालः | बिन्दवः | घनाकृतयः |
| करः | स्निग्धः | जङ्घाप्रदेशः | वराहस्यैव | वपुः | उत्तुङ्गः |
| इत्येतानि भद्रगजस्य लक्षणानि | | | | उत्तमाङ्गम् | बलयुतं, कर्कशं |

कोष्टकः - १६

(पुनः वैयासिक्ये इति भागे गजानामेते गुणाः वर्णिताः- गात्र-कर-पुच्छं च अस्थूलमसमम्; वक्षस्थलं तु विशालमुन्नतञ्च; वंशकस्तु धनुकारः; कुम्भौ तु स्थूलावुन्नतौ च; दन्तौ स्थूलौ; चरणमासनञ्च विपुलम्; जघनं वराहस्येव; कुक्षिः छागस्येव; नखाः- दन्ताश्च समाः स्निग्धाः; लोचने मधुपिङ्गले; गौरवर्णः; अग्रभागः बिन्दुयुतः; तालु-जिह्वा-ओष्ठाश्च ताम्रवर्णाः । ग्रहणोत्तरमाशुग्राही, सुशीलः, शिक्षितं न विस्मरति, कर्मशूरः, शूरः, विजयावहः ।) [178]

मन्दगजस्य गुणानाह - तस्य वदनकर्णौच विपुलौ; उदरं महत्; पेचकविषाणद्वयमपि च स्थूलम्; बलयुतः, लम्बमांसः; हर्यक्षः । [179]

(अग्रे तु भागद्वयं विद्यते । प्रथमं ग्रन्थान्तरे इति अपरं वैय्यासिक्ये इति । ग्रन्थान्तरे एवं दत्तम्- गात्रं-स्थूलं; पटु-श्रोत्रं, दन्तनखोदराणि च दृढानि; मांसभूयिष्ठः, पूर्णावलोकनतत्परः; दौर्मनस्यं, अलसः; निद्रालुता; मूर्खः, गम्भीरवेदी, दुष्टः, तमोगुणयुतः, मन्दगामी, शुभकर्मणि पूजितः इत्यादिगुणास्सन्त्यस्मिन् गजविधे । पुनः वैय्यासिक्ये इति भागे सप्तश्लोकेषु मन्दगजानां कानि लक्षणानीत्युदाहृतानि । पूर्वेक्तेष्वनेकेषु विषयेषु साम्यता वर्तते यथा निद्रालुः, तामसगुणीयः, आशुविस्मरणमित्यादि ।)

*(अन्ते मृगजातीयगजलक्षणमाह शास्त्रकारः । मृगगजस्य हस्त-पाद-कण्ठाश्च कृशाः; स्थूलनेत्रता; लाङ्गूल-मेढ्र-ओष्ठाः ह्रस्वाः; पृष्ठवंशः संक्षिप्तः । चपलः, उत्तानवेदी, कोपिष्टः, स्थूलवदनः, राजसः, ह्रस्ववालः, पित्तप्रधानशरीरी, दीर्घदन्तः,*

---

[178] पालकाप्यगजशास्त्रे पुनः अनुभद्रजातिगजलक्षणमित्यत्राह -
न कृशा न चोपदिग्घा मधुनिभदन्तेक्षणा धनुर्वंशाः । समवृत्तगात्रसुभगा ह्यनुभद्रास्ते गजा ज्ञेयाः ।
शिवतत्वरत्नाकरे अत्र यथोक्तं तथा धनुर्वंशस्य गजस्योल्लेखं करोति ग्रन्थकारः। एवं धनुर्वंशस्योल्लेखः न कुत्राप्यन्यत्रोपलभते ।
[179] पालकाप्यगजशास्त्रे सप्तमे प्रकरणे २०तमश्श्लोकः ।

*सुगात्रश्च ।*[180] *मृगगजस्तु प्रचण्डविक्रमः, चञ्चलः, शीघ्रतया सत्त्वहीनः भवति, उत्तानवेदी, रूक्षः, ताम्रतनुवर्णः, पित्तशुक्लशोणितैः समुद्भूतः ।*[181] *अस्मिन् अध्यायभागे पुनश्चतुर्थः कश्चनाकरः प्रयुक्तः वैय्यासिक्ये इत्यप्यायोज्य । अस्मिनुक्तविचाराः - गजस्य गात्रं, पादाः, नख-दन्ताः, कोशः, करः, गलेत्यादिनः दीर्घं भवन्ति । कपोलचुबुकौ ह्रस्वौ भवतः इत्याद्याः अत्रोपस्थापिताः ।)*[182]

अनुवर्तयन् विचारममुं शास्त्रकारः पुनः सङ्कीर्णगजानामुल्लेखं कृत्वा तेषां लक्षणानि कथयति । अयमग्रे चर्चितः मिश्रगजविभागे ।

(व्यास) गजशास्त्रे एतैस्साकं व्याख्याऽपि प्रदत्तास्तीति कारणेन इतोऽप्यधिकतया विचाराः लभन्ते । एते अंशाः ग्रन्थस्याष्टमाध्याये प्रदत्ताः । अस्मिन् भागे एतेषां गजानां विविधस्वभावाः, गतिः, मदः, सूक्ष्मता, पूर्वकायः, पृष्टभागाः गजविधशः विशदीकृताः ।

एवं क्रमेण अस्मिन्नेवाध्याये भद्र-मन्द-मृग-सङ्कीर्णानां गजानां स्वाभविकगुण-वर्णनानामुत्तरं तेषां मिश्रगुणयुतानां गजानां वर्णनमेवं कुरुते । कोष्टकः - १७

| गजविधः | पूर्वभागः | पृष्टभागः | विवरणम् |
|---|---|---|---|
| भद्रमन्दः | भद्रः | मन्दः | श्रेष्ठाः, दीर्घकालपार्यन्तं समृद्धिमृच्छन्ति राज्ञे पालकायवा |
| भद्रमृगः | भद्रः | मृगः | श्रेष्ठाः, शीघ्रगामिनः, समृद्धिमृच्छन्ति राज्ञे पालकाय वा; परमयोग्याः यदि मृगगजवन्नेत्रयुताः । |
| मन्दभद्रः | मन्दः | भद्रः | श्रेष्ठाः |
| मन्दमृगः | मन्दः | मृगः | मध्यमाः इति परिगणिताः |
| मृगभद्रः | मृगः | भद्रः | अधमाः इति परिगणिताः |
| मृगमन्दः | मृगः | मन्दः | अधमाः इति परिगणिताः |

[180] अत्र पुनः विशेषो नाम श्लोकद्वयं मृगजातिलक्षणे वैशम्पायनीये इत्यारभते ।

[181] एते अंशाः ग्रन्थान्तरे इति भागे सन्ति । एतत्समनन्तरं पुनः पालकाप्ये इति भागे श्लोकोऽयं दृश्यते -
कृशाङ्गुलीवालधिवक्त्रमेढ्रो लघूदरः क्षामकपोलकण्ठः ।
विस्तीर्णकर्णस्तनुदीर्घदन्तः स्थूलेक्षणो यस्स गजो मृगाख्यः ॥३६॥

[182] तत्र श्लोकाः - गात्रपादनखा दन्तौ कोशो मध्यं करो गलः । तनून्येतानि दीर्घाणि शीर्षं पृष्ठं च वालधिः ॥
कपोलौ चुबुकं चैव ह्रस्वानि च भवन्ति हि । समदौ च कटौ कुक्षिः कर्णौ च तनुकौ भृशम् ॥
अङ्गुली हनुकेशाश्च वक्षः कुब्जः प्रदृश्यते । यस्य श्यामो भवेद्वर्णः स्वच्छे स्थूले च लोचने ॥
आकार ईदृशः प्रोक्तो वनचारस्तु कथ्यते । एकाकी प्रचरत्येव गोप्रचारं च गच्छति ॥
पथानुवर्ती भीरुश्च चलचित्तो वने मृगः । घृतस्य कर्मकाले तु भवेदुत्तानवेदिता ॥
दुश्शीलता च चापल्यं लक्षयेन्मृगदन्तिनः ॥

अत्रैवमुक्तमस्ति यत् गजद्वयोः गुणप्रकटनं यः गजः करोति सः मिश्रजातीयगजः इति । अत्र पुनः द्वितीयः कश्चन विभागः कृतः इति दृश्यते यथा -

१. भद्रमन्दमृगसङ्कीर्णगजः  २. मन्दमृगभद्रसङ्कीर्णगजः  ३. मृगभद्रमन्दसङ्कीर्णगजः

अस्मिन् विभागे गुणत्रयस्य विश्लेषणं दृश्यते यथा उर्ध्वं, मध्यं, पृष्टभागः इति शरीरस्य त्रिषुभागेषु दर्शनीयाः गुणाः अत्र विधानकरणस्य मुलबिन्दुः अस्ति । प्रथमः सर्वदा श्रेष्ठाः, द्वितीयः मध्यमाः, तृतीयास्तु अधमाः इति परिगणिताः ।

पुनरत्र तृतीयो कश्चन गजभेदः दृश्यते यो हि

१. ऊर्ध्वं भद्ररूपाधो मन्दरूपमिश्रगजः

२. ऊर्ध्वं भद्ररूपाधो मृगरूपमिश्रगजः

३. ऊर्ध्वं मन्दरूपाधो भद्ररूपमिश्रगजः

४. ऊर्ध्वं मन्दरूपाधो मृगरूपमिश्रगजः

५. ऊर्ध्वं मृगरूपाधो भद्ररूपमिश्रगजः

६. ऊर्ध्वं मृगरूपाधो मन्दरूपमिश्रगजः

अत्र प्रायः गजानां पूर्वभाग-उत्तरभागयोः गुणानाश्रित्य विभागः कृतः इति दृश्यते । एषु प्रथम-द्वितीयश्चोत्तमविधौ, तृतीय-चतुर्थश्च मध्यम, पञ्चम-षष्टश्चाधमगजाविति परिगणिताः।

चतुर्थः कश्चनविभागक्रमः एवं दृष्टः यथा ।

१. ऊर्ध्वं भद्ररूपाधो मन्दमृगरूप सङ्कीर्णगजः

२. ऊर्ध्वं मन्दरूपाधो मृगभद्ररूप सङ्कीर्णगजः

३. ऊर्ध्वं मृगरूपाधो भद्रमन्दरूप सङ्कीर्णगजः

अत्र तु गुणद्वयोरेकत्र संयोगं पश्यामः । बर्हिष्टाद्द्रष्टुं केचन गजाः अन्तस्थात् विधद्वयोर्गुणान् दर्शयन्ति । एतदत्र एवं स्पष्टं ज्ञायते । यथापूर्वं प्रथमः उत्तमः, द्वितीयः मध्यमः तृतीयः अवरः । एतेंऽशाः गजानां करिणीनामपि भवितुमर्हन्ति । अत्र प्रभेदकरणे गजानां गुणगणनं मुखात् पृष्टपर्यन्तमेकत्र, उपरिष्टादधः इति विधद्वयेऽपि कृतो वर्तते ।

ज्ञातव्योऽत्र प्रमुखतया यत् बसवभूपलः शिवतत्त्वरत्नाकरे, एतत्भिन्नस्वभावाः अपि क्वचिद्वर्तन्ते गजानां इत्यपि ब्रवीति । काश्यपः १८ विधसङ्कीर्णगजानां ज्ञानं प्राप्तवानासीदिति । ये गजाः अन्येषां प्राणिनां गतिं, चिष्टां, स्वर-स्वभावाननुकुर्वन्ति ते अनूकाः इति कथिताः । शुभकरप्राणिनाम् चेष्टानुकरणशीलानां गजानां शुभानूकाः इति ये उत्तमाः इति परिगणिताः । ये निन्दितप्राणिनामनुकरणं कुर्वन्ति तेऽशुभानूकाः इत्युक्ताः ये पुनर्निन्दिताः । [183]

गजसत्त्वानि

अग्रिमः गजविभागक्रमः सत्वाधारेण । केचन तेषां बाह्यशक्त्याधारीकृतोऽयं विभागः इति कथयन्ति अन्ये तेषां मनस्थिति-स्वभावानुगुणेन विभागः कृतः इति वदन्ति । पालकाप्यगजशास्त्रे (त) गजस्य विभागत्रयमुक्तम् । अयं विभागक्रमः त्रिगुणाधारेण कृतो वर्तते । ते सात्त्विकगजाः, राजसगजाः तामसगजाः इति । एवं कथितास्सन्ति । [184]

*सुमनास्सुप्रभश्चण्डस्तेजस्वी द्दढविक्रमः ।*
*कुतूहली प्रतापी च क्रीडते हर्षणश्च यः ॥*
*कृतज्ञश्च भवेन्नागः सात्त्विको गजसत्तमः ।*
*दुर्मना दुर्गतिर्नागः सततं (राजसो) धेनुकामनाः।*
*आशावान् दुर्बलः क्रूरो विस्मायुत्तनिवेदिता ।*
*कृच्छ्रेण किञ्चिज्जानीते नर्म चास्य प्रणश्यति।*
*निद्रालुर्मूढसंज्ञश्च तामसो गज उच्यते ।*

पालकाप्यगजशास्त्रे (त) गजसत्त्वस्य परीक्षणं गजस्य शक्त्यनुसारमेव भवति । एतेषां निरीक्षणं पुनः किञ्चिद्दूरं भारवहनेन इति परीक्षानुसारेण तेषां सत्त्वनिर्धारः भवति । अत्र पुनः त्रिविधाः । [185]

---

[183] शिवतत्वरत्नाकरे सप्तमकल्लोलस्य एकादशस्तरङ्गे ४०-४३तम श्लोकाः ।

[184] पा.ग.शा(त) श्लोकः ६९ - ७२, नानासत्त्वयुक्तगजलक्षणम्;
(व्यास)पा.ग.शा श्लोकः १-४ सात्त्विकनिरूपणं नाम चतुर्दश प्रकरणम्

[185] पा.ग.शा. - अष्टमप्रकरणं - श्लो- ५५-६८ ।

| गजविधः | वोढव्यः भारः | क्रमणीयं दूरम् |
|---|---|---|
| उत्तमसत्त्वगजः | १८,००० पलम् * | १० योजनानि ** |
| मध्यमसत्त्वगजः | १४,००० पलम् | ७ योजनानि |
| हीनसत्त्वगजः | १०,००० पलम् | ५ योजनानि |

* - पलं नाम त्रयतोलानां भारः ** - योजनं नाम अष्टमैली दूरम् (शब्दार्थकौस्तुभः)

कोष्टकः - २०

{पा.ग.श (त) इत्यस्मिन् ग्रन्थे गजसत्त्वपरीक्षा इत्यस्मिन्नध्याये बलमिति शब्दः सत्त्व इति शब्दस्य स्थाने प्रयुक्तः ।}

एतेन ज्ञायते यदयं विभागक्रमः भारवहने गजानाम् उपायोगितानुसारं कृतो वर्तते इति । वोढव्यं वस्तु यत् किमपि वा भवितुमर्हतीति ज्ञातव्यः ।

भारवहनोत्तरं तेषां सहनशीलत्वं चिन्तनीयं भवति । द्वयोः गजयोः घट्टनेन स्थितस्य गजस्य सहनशीलत्वं ज्ञातुं शक्यते । शत्रुगजस्य घट्टनं सोढ्वा प्रत्याक्रमणं करणीयं घट्टितगजेन । यो गजः अधिकं सोढुं शक्नोति सः उत्तमः गजः इति परिगणितः ।

सार्धद्विपाददीर्घः, सार्धद्विपादविस्तीर्णः कश्चन इष्टिका-शिलास्तम्भः वा यो हि १५पाद उन्नतः दृढाधाराः (भित्तयः/स्तम्भाः) ग्रामाद्बहिः निखन्य स्थापनीयाः । यो गजः घट्टनेन तं पातयति सः अतिसहनशीलगजः इति परिगणनीयः । एते बहुमूल्ययुताश्च । अतः भारवहनं, सहन-शीलत्त्वञ्चात्र ' सत्त्व ' इति कथितम् ।

गजानां शारीरिक-मानसिकशक्त्यनुसारं (यदत्र सत्त्वमित्युक्तं) एवं विभागः कृतो वर्तते- १. सात्त्विकगजाः २. राजसगजाः ३. तामसगजाः इति विधत्रयमुक्तम् । सात्त्विकगजेषु चतुर्विधाः - (अ) देवसत्त्वगजः (इ) गन्धर्वसत्त्वगजः (उ) विप्रसत्त्वगजः (ऋ) क्षत्रसत्त्वगजः । राजसगजेषु (अ) वैश्यसत्त्वगजः (इ) शूद्रसत्त्वगजः (उ) सर्पसत्त्वगजः इति त्रिविधाः । तामसगजेषु द्वौ विधौ यथा (अ) पैशाचसत्त्वगजः (इ) राक्षससत्त्वगजः इति ।

कथमेवं सत्त्वं लभते इत्यत्र विवरणमेवमुपलभ्यते यन्मुक्तसञ्चारिणः गजान् संवीक्ष्य देवकन्यकाः, गन्धर्व-यक्ष-राक्षस-पिशाचकन्यकाश्च स्वरूपं परिवर्त्य करिण्यः भूत्वा एभिः दिग्गजैस्साकं सम्भोगमनुभूय तेषां गुणयुतान् गजशिशून् सुषुविरे । अतः ते गुणयुताः तथैव मनुष्याणामपि गुणान् धृत्वा ते जगति प्रविष्टवन्तः । अतः एवमनेकसत्त्वयुतानां गजानां जन्म समभवदिति । [186] गजशास्त्रग्रन्थयोः क्वचिद्भेदः दृश्यते । [187] अतः अत्रोभयोरपि ग्रन्थयोः विशेषः विपर्ययश्च दर्शितमेवम् । अत्र प्रथमं सात्त्विकगजानां लक्षणमुक्त्वा तद्भेदाश्च कथयित्वा राजसतामसयोः लक्षणं, भेदादिकञ्चोक्तम् ।

| सात्त्विकगजाः | | |
|---|---|---|
| सात्त्विकगजसम्बन्धिविषयाः एवं सन्ति - एते गजाः सुमनाः, प्रभायुताः, तेजस्विनः, प्रचण्डशक्तियुक्ताः, कुतूहलिनः, कार्ये-क्रीडायां वा हर्षचित्ताश्च । | | |
| सत्त्व विधः | गजशास्त्रे (त) | गजशास्त्रे (व्यास) |
| देवः | कान्तियुक्तः, अस्य शरीरस्य गन्धस्तु पद्म-श्रीगन्धसप्तवर्णेत्यादिपुष्प- वद्भवति, सदा-तुष्टः, कुतूहली, उन्नतः, सर्वेषां प्रीतिपात्रश्च । | अभिषेकाय योग्यः, पूजनीयः, सर्वेषां कार्यार्थमुपयोगकारी, पुष्टाङ्गः, रोगरहितः, स्थैर्यवान्, सदैव बलान्वितः । [188] |
| गन्धर्वः | सङ्गीतप्रियः, पुन्नाग-नागकुसुम-कमल-चन्दनेत्यादीनां गन्धः, शुभ-गतिः, सुन्दरः, दन्तः, नेत्रे च शुभाः । | बुद्धिशाली, कर्तव्येनिष्ठः, लम्पटः, चञ्चलः, स्वस्थाने स्थातुमिच्छुकः, श्रेष्ठः गजः । [189] |
| विप्रः | शुचिः, मध्वोः-पयसः-घृतस्य-फलिताम्रस्य वा सुगन्धयुतः, सामगानम् अभिनन्दन्ति, सर्वगज-हितमेवाभिलषति, सदा प्रशान्तः, | सदा जलेमज्जनमिच्छति, कोपिष्टः, कातरः युद्धेषु, सर्वदा भोजनप्रियश्च । [190] |

[186] पालकाप्यगजशास्त्रे (त) ब्रह्माद्यंश-वर्ण-छाया-गन्ध-सत्व-स्वरलक्षणं नाम अष्टमप्रकरणस्य नानासत्वयुक्तगजलक्षणम् नाम भागात् श्लोकसंख्या ६९तः ९५ पर्यन्तम् ।

[187] गजशास्त्र (त) ग्रन्थे सर्वेषामपि सत्वानां गजानुक्त्वा तत्पश्चात् व्यासप्रोक्तग्रन्थे इति प्रत्येकभागे दत्तं परं गजशास्त्र (व्यास) ग्रन्थे तत्र तत्रैवैवं व्यासप्रोक्ते गजशस्त्रे इति दत्तं सविवृतिः । अतः विभागः दर्शितः यदनयोः व्यासप्रोक्ते गजशास्त्रे कः विषयः विशेषेणोक्तमिति व्यासेन ।

[188] अभिषेकोचितःपूज्यः सर्वकार्यार्थसाधकः।अव्याहाररतो नित्यं वलीरेखाविवर्जितः॥अनामयः स्थिरश्शूरो देवसत्त्वो भवेद्गजः
पा.ग.शा (त) - श्लो ८५, ८६; अष्टमप्रकरणस्य नानासत्वयुक्तलक्षणम् ; पा.ग.शा (व्यास) पृष्टसङ्ख्या ४१२ ।

[189] मेधावी च क्रियादक्षः, कामुकश्चपलः पटुः । स्तम्भप्रेक्षणकः शस्तो गजो गन्धर्वसत्त्वजः ॥ अत्र किञ्चन वैशिष्ट्यं दृश्यते पा.ग.शा (व्यास) ग्रन्थे । अस्मिन् ग्रन्थे गन्धर्वसत्त्वगजः षष्टविधः इति परिगणितः । व्याख्याने तु देव-ब्राह्मण-क्षत्रियसत्त्वगजाश्च उत्तमगजाः, वैश्यसत्वस्तु मध्यमः, शुद्रसत्वः अधमः वर्तते । अयं षष्टः इति । अयं श्रेष्ठः क्रेतव्यः इत्यप्युपदिष्टम् । परं पा.ग.शा (त) ग्रन्थे अयं द्वितीयः विधः । तथाहि न उपर्युक्त उत्तममध्यमाधमत्वमुक्तम् ।

| | | |
|---|---|---|
| | स्नातुकामः, शुभगतिः वर्ततेऽस्य । | |
| क्षत्रः | यः गजः चन्दन-कमलेत्यादिवत् सुगन्ध-युक्तः, कर्मणि सदा कुशली, युद्धे सदा-भयरहितः, विविधानां शस्त्रापातेऽपि धीरः । | प्रशान्तचित्तः, वीरः, उत्साही, बल-युतः, न कातरः, धीरश्च भवति ।[191] |
| राजसगजाः | | |
| राजसगजानां गुणाः एवं सन्ति - एते गजास्तु दुष्टबुद्धियुताः, दुष्टगतियुक्ताः, सर्वदा करिणीः अपेक्षन्ते, आशावन्तः, क्रूरगुणयुताः, विस्मरणशीलाः च । | | |
| वैष्यः | शालि-बन्धूक-तिल-मालतीद्यादिकानां वर्णं तालु-जिह्वायां, क्लेशं सहते, मांसाभिलाषी प्रियवचनैः सान्त्वितः, कुपितश्चेदपि शीघ्रतया उपशमितः । | कुटिलबुद्धिः, दुष्टक्रिया-युक्तः, बुद्धिमान्, विचित्रस्वरः, युद्धेषु भीरुश्च ।[192] |
| शूद्रः | सर्वदा अवशिष्ट-शुष्क- दुर्गन्धाहारभुञ्जी, महाभीरुः, कोपिष्ठः, कृतघ्नः, कृपणश्चाधमः । | दण्डेनैव विचारणीयोऽधमः, मूढः, युद्धंनापेक्षते, युद्धे भीरुश्च ।[193] |
| सर्पः | दुर्गन्धितशरीरः मृद्-शैवल-मांसवद्वा, सर्प-वत्सदैव शब्दापयति, सदाकुपितः, महामूर्खः। | नविश्वस्थः, कुटिलगतिः, क्रूर-बुद्धिः, मदावस्थायां न खादति च ।[194] |
| तामसगजाः | | |
| तामसगजानां स्वभावाः एवं भवन्ति यत् बहुकष्टेन किञ्चिदिव जानन्ति, एते कठिणशरीरयुताः, सदा निद्रालवः, सज्ञावगमने मूढाश्च भवन्ति । | | |
| पैशाचः | निर्जनत्त्वमभिवाञ्छति, मृतशरीरधातोर्वागन्धः निशायामपि चरति, महामूर्खः, सर्वदाकोपिष्टः। | सदैव दुर्मार्गी, अविवेकी, कार्येषून्मत्तइव व्यवहरति।[195] |
| राक्षसः | मार्जार-कपि-गर्दभ-वायसादीनां मूत्रमलवद् गन्धयुक्तः, अत्यन्तदारुणः, मांसरुधिरापेक्षी, दुष्टः, कृतघ्नश्चायम् । | रात्रौ व्रजति सर्वत्र, मनुष्यहनने रतः, परं बलयुतः वेगवाञ्च ।[196] |

कोष्टकः - २१

मानसोल्लासेऽपि देवसत्त्व, गन्धर्वसत्त्व, विप्रसत्त्व, क्षत्रसत्त्व, शूद्रसत्त्व, सर्पसत्त्व, पैशाचसत्त्व, रक्षःसत्त्व इति अष्टविध 'सत्त्व' गजाः प्रोक्ताः । एषु प्रथमत्रिविधं

[190] जलावगाहनासक्तः कोपनः कातरो भृशम् । भोजने लम्पटो नित्यं कुञ्जरो विप्रसत्त्वजः ॥ पुनर्व्याख्याने प.ग.शा (व्यास) ग्रन्थे मानुषसत्त्वगजः इति शब्दः प्रयुक्तः यत्र भेदत्रयमुल्लिखितं यथा विप्र-क्षत्रिय-वैश्य-शूद्रेति। प्रथमे ग्रन्थे न तथैवमुल्लेखः।

[191] शान्तश्शूरस्सदोत्साही बली युद्धविशारदः । अभीरुराहवे धीरः कुञ्जरः क्षत्रसम्भवजः ॥

[192] कपटो दुष्टचेष्टश्च कुशलो विकलस्वरः। भीरुराहवकाले च कुञ्जरो वैश्यसत्त्वजः॥ अयं मानुषसत्त्वगजेषु तृतीयः विधः ।

[193] दण्डसाध्यस्तथा नीचो मूर्खश्च मलिनाशनः । आहवानिरतोऽशूरः शुद्रसत्त्वो भवेद्गजः ॥

[194] विश्वासघातकः क्रूरः गमने कुटिलक्रमः । न भुङ्क्ते च मदेऽत्यर्थे सर्पसत्त्वः करी मतः ॥

[195] उन्मार्गेण सदा याति विवेकरहितो भृशम् । उन्मत्त इव चेष्टायां द्विपः पैशाचसत्त्वजः ॥

[196] निशायं चरति स्वैरं मनुष्याणां वधेरतः। वेगवान् बलवान् हस्ती रक्षस्सत्वसमुद्भवः॥ पा.ग.शा.(व्यास)पृष्टसं४०७-४२९

सात्त्विकम् इत्युक्तं, अन्तिमद्वयं तामसमतः अधममित्युक्तम् अन्यद्द्वयं राजसमित्युक्तम् । [197]

*देवतांशगजाः*

अस्मिन् वर्गीकरणविधाने अंशाः निर्णायकपात्रमावहन्ति । गुणानामाधारेण गजानां विविधाः देवतात्मकांशाः इति निर्णीताः । गजशास्त्रग्रन्थयोरेवं दृश्यते वर्गीकरणम् । [198]

१. ब्रह्मांशकगजाः- सुन्दराः, श्वेतवर्णबिन्दवः दृश्यन्ते शुण्डस्योपरि, नेत्रयोरन्तभागे रक्तवर्णयुताः, बलयुतौस्निग्धौ च दन्तौ, बलिनः स्निग्धश्च । एते गजाः पूजार्थमुपयोगाः भवन्ति, नृपाणां जय-आरोग्याणि च वर्धयन्ति । यस्य गजस्य कण्ठः कक्षभागे च विस्तारःतृतः, कमलवच्छाया, रोमयुगलं देहे सर्वत्र दृश्यते । शौर्यादिगुणसम्पन्नाः । मेघगर्जनेन तुष्टाः । [199]

२. इन्द्रांशकगजाः - बिन्दवः, रेखाः वर्धमानस्य कमलस्य स्वस्तिकस्य वा चिह्नानि शरीरस्य पार्श्वयोः दृश्यन्ते । एषां गजानां नेत्राणि रक्तोत्पलसमं भवन्ति । एते गजाः युद्धे जयं, अन्येषां राजानाञ्च सम्पदमपि दास्यन्ति ।

३. धनदांशकगजाः - एतेषां गजानां ओष्टौ, जिह्वा, नयनं, रदनौ च ताम्रवर्णं भवन्ति । एते गजाः वित्तरत्नादिसम्पदं प्रयच्छन्ति । नृपालये भवितुमर्हाः पूजनायोऽप्युत्तमाः ।

४. वरुणांशकगजाः - कृष्णवर्णीयाः मेघवत्, सर्पिवन्मदस्राविणः, आसने शिरसि च सुभगत्वं वहन्ति । गम्भीरतया घनवद्गर्जनं कुर्वन्ति । मदजलं अधिकतया स्रावयन्ति,

---

[197] मानसोल्लासस्य द्वितीये विंशतौ, तृतीयाध्याये २६४तः २७३ पर्यन्तम् ।

[198] पालकाप्यगजशास्त्रे (त) इदमष्टमं प्रकरणं, किञ्च पालकाप्यगजशास्त्रे (व्यास) इदं नवमं प्रकरणमिति प्रोक्तम् ।

[199] अत्र विशेषो नाम उभयोरपि गजशास्त्रग्रन्थयोः इत्याह भगवान् व्यासो ब्रह्मांशकगजलक्षणम् इति वाक्यं सामान्यतया दृश्यते । परमत्र कश्चन व्यत्यासः दृष्टः यत् ब्रह्मांशकगजलक्षणोत्तरं पुनः प्रजापत्यंश्कः गजः इत्युल्लेखः दृश्यते । उभावप्यत्रैकमेव उत भिन्नं वेति न स्पष्टीकृतम् । पा.ग.शा (त) ग्रन्थस्याष्टमोध्यायः ब्रह्मांशादिगजलक्षणमित्यारभते । अस्मिन् तृतीयश्लोकतः पञ्चमश्लोकपर्यन्तं यथास्ति तथात्र दत्तम् । इत्याह भगवान् व्यासो ब्रह्मांश्कगजलक्षणम् ।
कक्षभागे तथा कण्ठे यः समः पृथुलोंसयोः ॥
मुखे कोकनद्च्छायो युग्मरोमविराजितः । बहुकालमदः शूरो मेघनादेन हृष्यति ॥
प्रजापत्यंशको नागो प्रजावृद्धिं करोत्यसौ । इति । अत्र पुनर्द्रष्टव्यः यत् नान्यत्रास्मिन् विभागे कुत्रापि वैय्यासिकवचनं दृश्यते इति । अयमेव विचारः सोमेश्वरस्य मानसोल्लासे बसवभूपालस्य शिवतत्वरत्नाकरे च एवमेव विशेषतयोक्तः । तत्रोक्ताः अप्यंशाः अस्मिन् भागे पार्थक्येन दत्ताः ।

युद्धे रिपुमर्दकाः स्वभर्तृभ्यः जयप्रदाश्च ।

५. चन्द्रांशकगजाः - कण्ठाः एषां त्रिवलियुताः, मधुनिभलोचनानि, दन्तास्तु केतक्याः छायामनुसरन्ति, पुष्करभागाः रक्तवर्णाश्च, पाण्डुवर्णीयाः बिन्दवः शरीरेषु वहन्ति, युद्धे सर्वदा जयदायिनः ।

६. अग्न्यंशकगजाः - एतेषु विद्यमानाः गुणाः एवं सन्ति - रोमाः अग्निज्वालावद्भवन्ति, शिरसिवालप्रदेशेषु, नेत्रेषु, तालुप्रदेशेषु च पिङ्गलवर्णरोमयुताः; अग्निरिव समरे भयङ्कराः परसैन्यं भस्म कुर्वन्ति, प्रचण्डशक्ति- गुणाधिक्येनच युक्ताः दोषवर्जिताः ।

७. विष्ण्वंशकगजाः - आननं समप्रमाणकं शुण्डान्तपर्यन्तम् क्रमेण हीयते । पुष्करः ताम्रवर्णः, अङ्गुलिरपि योग्यप्रमाणे भवति, उच्छ्वास-निःश्वासौ दीर्घौ भवतः, सुगन्धितश्च, बृंहणं मेघगर्जनवत्, आशरीरं समप्रमाणकं वलिरहितम्, समस्ते शरीरे कान्तिः समाना, शरीरे समानतया विद्यमानाः रोमाः, सुन्दराः, कुम्भौ तु वतुलाकारौ, समासनयुताः, दीर्घांसौ मांसभूयिष्ठौ, शुभकराः, नखाः स्निग्धाः, कूर्माकाराः, अर्धचन्द्रनिभाः, विशालः उरप्रदेशः, उदरं सुन्दरं, मेहनं अत्रस्तं, जघनं तु वराहजघनेन समनता भजते, शरीरे क्वचिच्छङ्ख-चक्र-गदाकारबिन्दवः दृश्यन्ते, एते अभिषेकाय योग्याः, पूज्याः, सर्वकार्यसाधकाश्च । हस्तिशिक्षायाः द्वितीयः अध्यायः उत्तम-मध्यम-अधमेति त्रिविधगजान् भणति । तेषां स्वरूपकथनं एवं कृतम् । प्रथममुत्तमगजाः ।

१. महेन्द्रांशाः - अत्युन्नताकर्षकशरीरिणः, शुभ-जवगतयः, मदाविष्टे महावीराः, चतुराः, युद्धे विजयशालिनः, शुभाननाः, दीर्घशुण्डधराः, स्थिरबुद्धियुताः, दीर्घायुभूयिष्टाः, अन्यजीविनः अपि रक्षन्ति, अनुद्वेगिनः, क्षमाशीलाः, श्वेत-कुमुदवद्भासुरवर्णाः, दोषरहितदेहिनः, सुन्दराक्षाः, परान्विजित्य राज्ञे जयमाप्नुवन्ति ।

२. वह्न्यंशाः - रक्ताक्षाः, युद्धे महावीराः, अरिसैन्यमग्निवद्दहति महाकोपेन, रक्तवर्णकेशयुताः, दीर्घशुण्डधारिणः, रक्तवर्णकदन्ताः, पतनशीलोदराः

३. यमांशाः - नीलवर्णदेहिनः, मृगयाभयङ्कराः, दीर्घदन्तिनः, जवगतयः, कोपाविष्टाः, वीर्यवन्तः, कर्मकुशलिनः, सत्कर्मरताः, चतुराः, उत्तमफलदायिनः, कोपे अनियन्त्रिताश्च ।

४. जलेशांशाः - सर्वदा जलेऽवगाहतत्पराः, मदस्राविणः, शीतच्छायाप्रियाः, शान्तस्वभावाः, नात्युन्नताः, चित्ताकर्षकाः, युद्दे शक्तिमन्तः, राज्ञे ऐश्वर्यदायकाः, पाण्डुवर्णकदन्तयुताः, आज्ञापालकाः-निष्ठाः, देशाय प्रगतिदायकाः, जवगतयः, युद्धे समर्थाः, मृगयेच्छुकाः, शुद्धशरीराः, शुभगन्धाश्च ।

५. पवमानांशाः - सदैव स्वस्थानभ्रमतत्पराः, क्रीडेच्छुकाः, वसन्तरुचयः, मधुरबृंहणस्वराः, पालने शुभदायकाश्च ।

६. कुबेरांशाः - कुमुदवदाननाः, श्याममेघेव वर्णाः, वक्रगतयः, मृदुत्त्वग्युतमुखाः, स्त्रीलोलुपाः, वीर्यवन्तः, सुस्मृतिधराः, न कदापि क्रोधाविष्टाः, हस्तिपस्याज्ञापालकाः, दीर्घशुण्डवालाः, अन्येषां दोषं सहन्ते, समृद्धि-सम्पद्प्रदायकाश्च ।

७. रुद्रांशाः - मुखे उरसि च त्रिवलियुताः, उन्नत-स्थूलदेहिनः, मृगयानासक्ताः, भयङ्कराः क्रोधे, जवगतयः, शौर्यगुणान्विताः, भस्मवर्णाः, जन्मना चतुराः, यश-कल्याण-विजयमायान्ति, शुण्डान्ते संमिश्रच्छायायुताः ।

८. यक्षांशाः - शुभगुणयुताः, शुभाननाः, शान्तचित्ताः, सर्वजनहिताकाङ्क्षिणः, अलङ्कारप्रियाः, मृगयोत्साहिनः, मिताहारभक्षकाः, सदाजलक्रीडासक्ताः, सुलभपाठिताः, कार्यकुशलाः, चतुराः, मेघवर्णाः, स्त्रीलोलु-शीतच्छायास्वादकाः, मृदुशरीरिणः, देशहितार्थं विधात्रा सृष्टाः।

९. गन्धर्वांशाः - सङ्गीतानुरागिणः, किञ्चिदिवालसाः, शक्तिविरहिताः, मृदुशरीराः, सामान्यौन्नत्ययुताः, मन्दगतयः, शुभाननमुख-दन्ताः, चित्ताकर्षकाक्षाः मृदुत्त्वचः, सदा-क्रीडनतत्पराः, वसन्तर्तत्वास्वादकाः ।

१०. किन्नरांशाः - अब्जगन्धाः, मनोहराक्षाः, सदास्त्रीसङ्गिनः, प्रशान्तमनाः, बुद्धिमन्तः, सुवाक्यैः प्रसादिताः, योग्यगतयः, औपवाह्यार्थमतियोग्याः, शुद्धशरीरिणः, पूर्णिमायां सञ्चरितुकामाः, चोदनेन सर्वकर्मकर्तारः, स्वामिनिष्ठः, ह्रस्वशरीरिणः, ह्रस्वदन्ताश्च, शुभचिह्नयुताः, शुभफलदायकाः ।

११. विष्ण्वंशाः - सर्वदाशुभाः, पार्श्वयोः शङ्खचक्रेत्यादिचिह्नधारिणः शुण्डाननयोः, महासमर्थाः, दृढदन्ताः, अमितशक्तियुताः ।

१२. ब्रह्मांशाः - दीर्घशुण्डाः, उन्नतशरीरिणः, प्रशान्ताः, सूचनापालकाः, दीर्घायुयुताः, कर्ण-मुखयोः रक्तवर्णकविन्दवः दृश्यन्ते, गणे नायकाः, सर्वकार्येषु विजयशालिनः, सर्वविधेषु शुभकराः, देशं प्रति कल्याणकारकाः, बुद्धिमन्तः, अनिद्रालवः, अतः राजभिः अङ्गीकृतः ।

१३. चन्द्रांशाः - मोहकभासुरवर्णाः, सुपक्वाहारप्रियाः, सदाशीतशरीरिणः, प्रशान्त-मानसाः, मुखे श्वेतवर्णरेखावलीधराः, दीर्घवालाः, किमपि कर्मकर्तुं समर्थाः, श्वेतधवल-कान्तियुतनखदन्ताः, करीणीभिस्साकं सुखेन सञ्चरन्ति, पुत्रपौत्रयशस्सम्पत्प्रदाः, हस्तिप-वचनावगन्तारः ।

१४. तापसांशाः - वने वासेच्छुकाः, एकान्तप्रियाः, शान्तमनाः, निमीलितनयानः सदाध्यान-शीलाः, सुखभोगेच्छाः, भुभुक्षां-पिपासां च सहन्ते, न स्त्रीलोलुपाः, न कदापि कर्मविरताः, चतुराः, विजिगीषवः आहवे, जलक्रीडासक्तः, सुलभशिक्षिताः, छायाभिलाषुकः, अल्पाहारेण तृप्ताः, स्मृतिधराः । एते न दण्डनार्हाः परं राजभिः गौरवार्हाः, पूजितव्याः यतो हि एते राज्ञे विजयमाप्नुवन्ति ।

१५. लोकपालांशाः - एते गजाः सत्यसन्धाः (स्वकर्मसु), सुस्वरयुताः, रक्तबिन्दुयुताः आनने, रक्तवर्णयुतशुण्डाग्राः, शक्तियुताः, दीर्घवालाः, अलङ्कारेच्छवः, अन्यपशून् प्रति सहानुभूतियुक्ताः करिणीभिस्साकं भवितुमभिलषन्ति, राज्ञः प्रधानगजः भवितुमर्हाः ।

१६. मानवांशाः - राजभिः एते गजाः गृहीत्वा पालनं करणीयं येन तैरपेक्षितं सर्वं साधितुं शक्यते । न चोन्नताः, ह्रस्वदन्ताः, मनुष्यैस्साकं क्रीडितुमभिलभिलषन्ति,

सदामनुष्यैस्साकं विविधकुचोद्येच्छुकाः, मनुष्ययोग्यरुच्याहार(यथान्न-पायसादिकम्) भोक्तुकामाः, प्रशिक्षण-सन्दर्भे स्वशक्तिप्रदर्शितुमुद्युक्ताः, तीव्रातपान् सोढुमसमर्थाः अतः एव श्रान्तशरीरिणः, सदाकर्णचालने निरताः, योग्याः गजाः अतः उपयोगायार्हाः ।

एते सर्वेऽपि षोडषविधगजाः उत्तमगजाः इति परिगणिताः । [200]

मध्यमगजाः -

द्वितीयः गजविधः मध्यमगजाः इति प्रोक्ताः ।अत्र केवलं षड्विधाः ।

१. पितामहांशाः - एते मन्दगामिनः, मन्दबृंहणमेषां, मन्दस्वराः, अलसाः, कर्म कर्तुं निरुत्साहिनः, अधिकातपवर्षादीनसहमानाः, सदैवबुभुक्षापिपासादूषिताः, महाकोपिष्ठाः, शीघ्रकोपिनः, दीर्घाश्वासैः सदा उच्छ्वसन्ति, परागस्नानं, पांसुस्नानं वाभिलषन्ति, दूषिते मृदि क्रीडितुकामाः, कृशशरीरिणश्च । वयः प्राप्तेऽपि मदजलं न स्रावयन्ति, सदैव एकाकी भवितुमिच्छन्तीति कारणेन गणेवासं नाभिनन्दन्ति, केचन लघुवयस्येव रोगबाधिताः अपि भवेयुः । अत एव एते गजाः सर्वेभ्यः शुभकर्मभ्यः दूरे एव स्थापनीयाः ।

२. शकुन्तांशाः - अयमष्टादशतमः गजः । अस्यापरं नाम विहगांशगजः इति । एते बहु बलहीनाः, अधिकक्षुत्तृड्युक्ताः सदैवातृप्ताः । अतः एव गणे विद्यमानैर्गजैर्वान्यप्राणिभिस्सह सदा कलहं कुर्वाणाः, तस्मादेव बहु निश्शक्ताः । अतिभारवहने कम्पमानाः, सदाकृशाः, अधिकमूत्रस्राविनः, मूत्रंतु अत्यसह्यकरं दुर्गन्धयुताश्च । कर्णचालने शब्दंकुर्वाणः, स्वनिगड घर्षणतत्पराः, लघुबृंहणं ददतः, स्वनिर्धारणासमर्थाः, व्याधियुक्ताः, दौर्मनस्याक्रान्ताश्च ।

३. मत्स्यांशाः - कालिङ्गक-वङ्गदेशेषु विद्यमानाः, अन्येषु गजगणेष्वेते गजाः उपलब्धाः । एते गजाः अनुपयुक्ताः सर्वे शुभकार्येषु यतो हि तेषां कर्मसु ते सदैव अप्रयत्नशीलाः । आशरीरे रोमयुक्ताः, भस्मवर्णाः, कृशशरीरिणः, अधिकं जलं पिबन्ति

---
[200] नारदमुनेः गजशिक्षायाः द्वितीयपटलस्य ५७ श्लोकपर्यन्तम् ।

परमत्यल्पमत्ति, भिन्नदुष्टगतयः कदाचित्, विकृतस्वरकराः, उपागतान् प्राणीन् घ्नन्ति । सदाक्षिणं चालयन्ति, दुष्टप्रवृत्तयः, मूर्खाः, आधोराणणैः कष्टयन्त्रिताः, आदेशावगमनेऽज्ञाः । यद्यपि सुशिक्षिताः, वञ्चकबुद्ध्याः कारणेन तेषां सहभागिता अल्पेति कारणेन शुभकार्येषु ते अप्रयोजकाः । अतः एतेऽपि गजाः सर्वेष्वपि कार्येष्वनुपयुक्ताः ।

४. लतांशाः - एते गजाः यद्यपि अरुग्णाः तथापि स्वशिरः कम्पन्ते । प्रकृत्या एते स्वशिरः कम्पमानाः स्वनेत्रे विचित्ररीत्या चालयन्ति । हस्तिपैः प्रयत्नमानेनापि एते स्वासामर्थ्यं मुक्ततया प्रकटयन्ति । अतृप्ताः ते शिक्षणात् बाहिः स्थातुमिच्छन्ति । एते गजाः मूर्खाः, दुर्बलाः, प्रशिक्षकैः कष्टेन पाठितान् सर्वानपि आदेशान् प्रशिक्षणोत्तरमेव विस्मरन्ति । अतः एते गजाः विक्रेतुं वा क्रेतुं वा अनर्हाः ।

५. सुमांशाः - एते गजाः सर्वदा अलङ्कृताः भवितुमिच्छन्ति मल्लिका-वकुल-कमल-चम्पा-अशोक-इत्यादि विविधापुष्पैः । एतान्यन्वेष्टुं वा ते सर्वदा प्रयुक्ताः परं कार्ये निरुत्साहिनः । प्रशिक्षणे तेषां मनः न लगते कदाचिदेव ते स्वकार्येषु यशस्विनः भवन्ति । यद्यपि ते सुगन्धैः पुष्पैः समावृताः दुर्बलाः गजाः स्वस्थाने एव भूत्वा वस्तुमिच्छन्ति । आतपे गन्तुं नेच्छन्ति । मन्दगतयः, सदा सुखेन कालं क्षपयितुमिच्छन्ति ।

६. धेन्वंशाः - शुभाशुभगुणान्विताः एते गजाः दीर्घदन्तिनः, आशरीरं केशयुताः, धेनुवद्दीर्घपुच्छाः, सदा खिन्नगात्राः, धेनुवत्बृहन्नयनाश्च । अनपेक्षितप्रमाणयुक्ताननाः परं चतुराः । यद्यपि प्रशान्तमनाः, मन्दगतयः, अशूराः, निश्शक्तिनश्च । एते बहुधा अधिकं भुञ्जन्तः, स्वेच्छाचारिणः इव व्यवहरन्ति शिक्षितेऽपि । शुभकार्यार्थमेते निन्द्याः। उत्तम-गजाः सर्वेष्वपि कार्येषु यद्यप्युपयुक्ताः भर्तृभ्यः राजभ्यश्च शुभफलमेवापादयन्ति, एते मध्यमगजाः तावन्तः सुचारुगुणैः नयुक्ताश्चेदपि भर्तृभ्यः राजाभ्यश्च अहितमशुभं वा न प्रयच्छन्तीति ज्ञातव्यः । [201]

---

[201] गजशिक्षायाः द्वितीयपटलस्य ७७ श्लोकपर्यन्तम् ।

तृतीयः कश्चन गजविधः ये अधमगजाः इति परिकीर्तिताः । अत्र पुनः षड्विधाः यथा राक्षसांशाः, असुरांशाः, पैशाचांशाः, सिंहांशाः, शार्दूलांशाः, मर्कटांशाश्चेति ।

१. राक्षसांशाः - स्थूलहस्तपादयुताः, रक्तनेत्राः, घट्टयितुमिच्छन्ति दन्तैः, अन्यान् जन्तून् मारयितुं हिंसितुकामाः, दुर्धर्षाः, वेगगतयः, रात्रौ सञ्चारप्रियाः, मांसाशिनः । एते सान्त्ववाक्यानि न शृण्वन्ति, कदाचित् हस्तिपानपि मारयति, क्रूरबुद्धयः राक्षसाः इव ।

२. असुरांशाः- मद्यपानमभिलषन्ति, बलयुताः, वञ्चकाः, दीर्घदेहि-स्थूलदन्ताः, वधकार्यतत्पराः । शक्तिसम्पन्नाः, मनुष्य-मृग-धेनु-पक्षीणाञ्च गन्धं न सहन्ते, दर्पयुताः, कुपिताः, निन्द्यलक्षणयुताः, वधासक्ताः, पुरं नाशयन्ति अतः वने एव त्याज्याः ।

३. पैशाचांशाः - एषां देहः कृशः, वालः ह्रस्वः, दन्तः कृशः, चौर्यासक्ताः, भययुक्ताश्च

लघुबालान् हिंस्रन्ति, पातयन्त्यन्यान्, सर्वत्र भ्रमणगुणाः, रक्तमांसमिच्छन्ति सर्वदा, कर्कशस्वराः, भस्मदेहयुताः, सान्त्ववाक्यानि न शृण्वन्ति, पर्वतेषु अरण्येषु वा परित्यक्तव्याः ।

४. सिंहांशाः - एते गजाः सिंहवद्गर्जन्ति, सटायुक्तमुखाः, भयङ्कराकृतयः, वनप्रदेशेष्वटन्ति, हठात् वेगगामिनः, निशाचराः, लाङ्गूलमुत्थाप्यैव चरन्ति, नेत्रन्तु अग्निवज्ज्वलति, सिंहस्यैव नेत्रे, सिंहवत्बलान्विताः, पीनोदराः, पृष्टं मांसलं, शौर्यविक्रमशक्तिमन्तः; नगरसञ्चारमनाभिलषन्तः वनसञ्चारेण प्रमोदिताः, अवशाः असाध्याः, वर्जयितुं योग्याः ।

५. शार्दूलांशाः - एतेषां गजानां दन्ताः दीर्घाः, वक्रनखयुताः, वञ्चकाः, गुप्तमनस्काः; भाययन्त्यन्यान् प्राणिनः, वनजीवनमिच्छन्ति, मद्यरक्तमांसप्रियाः, अतिकोपिष्ठाः, विवृतं धावन्त्येते, बलयुताः, शार्दूलस्य देहे यथा शरीरे रेखां धरन्ति; एते राजेभ्यः वर्ज्याः ।

६. मर्कटांशाः - चञ्चलचित्तयुक्ताः, भ्रमन्नेत्राः, सदैव भोक्तुकामाः, सदा धावितुमुद्युक्ताः, प्राणिनां सन्ताडने सदारताः, सदैव कृशदेहिनः, दीर्घवालधारिणः, शैर्घ्यगुणयुक्ताः, नाभिलषन्ति शिक्षणं, हूंकारेण भायनतत्पराः । [202]

अंशाधारेण मानसोल्लासेऽपि गजवर्गीकरणमेवं दृश्यते - ब्रह्मांशकगजाः, प्रजापत्यंशकगजाः, इन्द्रांशकगजाः, धनदांशकगजाः, वरुणांशकगजाः, शशाङ्कांशक-गजाः, अग्न्यंशकगजाः, अग्नि-मरुदंशकगजाः, विष्ण्वंशकगजाः इति । [203]

इदमेव वर्गीकरणं शिवतत्त्वरत्नाकरेऽपि दृश्यते । [204]

दिग्गजाधारेण वर्गीकरणम् -- दिग्गजाः अष्टाविति ज्ञाताः । ते यथा ऐरावतः, पुण्डरीकः, पुष्पदन्तः, वामनः, सुप्रतीकः, अञ्जनः, सार्वभौमश्चेति । तेषामाधारेण कृतं वर्गीकरणमत्र चर्चितम् । अत्र दिग्गजविधानवर्गीकरणं अन्वयः इत्युक्तः । [205] आदौ ते गजाः पक्षयुताः भूत्वा स्वपत्नीभिस्साकं भूतलेऽपि अभ्रमन् । [206]

१. ऐरावतान्वयगजाः-ऐरावतः स्वपत्नी-अभ्रम्व्यामष्टौ पुत्रानुत्पादयामास येषां नामानि -

मेघः, पद्मोदरः, अरिष्टः, चपलः, रुचिरः, अङ्गदः, अरुजः, पद्मगुल्फः चेति । ते तु दीर्घशुण्डाः, श्वेतवर्णीयाः, चतुर्दन्तयुताः, रोम-अक्षि-वालधिप्रदेशेष्वपि श्वेतवर्णीयाः, उन्नतशरीरिणश्चासन् ।

२. पुण्डरीकान्वयगजाः - पुण्डरीको नाम दिग्गजः स्वपत्न्यां कपिलायां हन्निरित्थः,

सुप्रदिष्टं, प्रमर्दनं, जीमूतञ्चेति चतुरान् पुत्रान् जनयामास । ते तु स्वजनकः इवातुलपराक्रमिणः, कुब्जकेशाः, महाकुम्भयुताः, कोपिनः, सारसवन्नेत्रयुक्ताः, आशुण्डः अखण्डतयायताश्च । (व्याख्यायां पुनः श्वेतवर्णभासुराः, गरुद्युगलसमेताः, आशरीरे क्षुद्रह्रस्वनिबिडरोमयुताः, कमलदलवत् रक्तवर्णनयनाः इत्यप्युक्तम्।)

---

[202] गजशिक्षायाः द्वितीयपटलस्य श्लोकाः १०० पर्यन्तम्।
[203] मानसोल्लासस्य द्वितीयविंशतौ तृतीयाध्याये श्लोकाः २३७तः - २६३ पर्यन्तम् ।
[204] शिवतत्वरत्नाकरे सप्तमकल्लोलस्य एकादशस्तरङ्गः,श्लोकाः ४४तः ७० पर्यन्तम् ।
[205] पालकाप्यगजशास्त्रस्य (त) द्वितीयप्रकरणस्य दिग्गजसन्तानोत्पत्तिः इति भागः । श्लो ४४ तः ६० पर्यन्तम् ।
[206] सपक्षाः कामरूपास्ते विचेरुः पृथिवीतले । स्थानेषु रमणीयेषु करिणीभिः समन्विताः ॥ अयं प्रथमः श्लोकः यो हि पालकाप्य गजशास्त्रस्य (त) ग्रन्थे अनुपलब्धः परं पालकाप्य गजशास्त्रं (व्या.स) इत्यस्मिन् प्राप्तम् ।(पृ.सं. १५१)

३. पुष्पदन्तान्वयगजाः - अस्य पत्नी ताम्रकर्णी । एतयोः पञ्चपुत्राः - विषह्यं, सारसं, रिष्कं, विचित्रः, विचारी इति नामाङ्किताः । स्थूलबिन्दुयुताः, धनुर्वंशसम्बन्धिनः, कृष्णरोमशरीरिणः, कृशदेहिनः, विशालस्कन्धभागाः, दीर्घशुण्डाश्च ।

४. वामनान्वयगजाः - अङ्गना नाम पत्नी अस्य । शीघ्रगामी, जलविहारमिच्छुकः,

दीर्घशुण्डयुतः, अक्षिणी अग्निवर्णवत्, स्निग्धः, नीलमेघः इति पुत्रः एताभ्यां जातः । (आयत-शुण्डादण्डः, अग्निज्वालेव, वारुणकान्तियुक्तः, उन्नतशरीरी, दन्तचतुष्कसमेतः इति व्याख्यायाम्)

५. सुप्रतीकान्वयगजाः - सुप्रतीकस्य पृथु, सम्प्रहारी, सम्पातीति त्रयः पुत्राः अनुपमायाम् । नेत्रे कपोतनेत्रवत्, एते दीर्घहस्ताः, कैरववत्कान्तियुक्ताः, महाकायाः, वीराः, सूक्ष्मरोमैर्युक्ताश्च ।

६. अञ्जनान्वयगजाः - अञ्जनो नाम गजस्य पत्नी अञ्जनावती । एताभ्यां समुत्पन्नाः अञ्जनावदुन्नताः स्निग्धवालाः, श्वेतकेशाः, सुपुष्कराः, उन्नतजङ्घास्थानाः, त्रयः पुत्राः येषां नाम दिव्यः अप्रमेयः अवरुक् इति ।

७. सार्वभौमान्वयगजाः - शुभ्रदन्तीति पत्न्यां सार्वभौमाय मेघः, पुष्पधरः, असह्यः, सहपद्मः, महार्णवः इति ५ पुत्राः अभवन् । नेत्र-कर्णाश्चैषां लघु, पीवरगण्डस्थानं, स्थूलशुण्डमस्तकौच ।

८. कुमुदान्वयगजाः - पिङ्गलेति पत्नी; महापद्मः, ऊर्मिमालीति पुत्रद्वयमस्य । ताम्रवत्-रक्तनेत्रः, उन्नतदन्तः, असित-विस्तीर्णश्च पुष्करः, कुमुदवत्कान्तियुतकुम्भस्थलम् ।

यद्यपि सोमेश्वरविरचितमानसोल्लासस्य बसवभूपालग्रथितशिवतत्त्वरत्नाकरस्य च अन्वयानुसारेण वर्गीकरणं कृतं वर्तते भेदाः अपि अनेके दृष्टाः । उभयोरपि ग्रन्थयोः तुलनेऽमी अंशाः भिन्नास्सन्तीति स्पष्टं ज्ञायते । कोष्टकद्वारेण अनयोः भेदानेवं ज्ञातुं शक्यते ।

| अन्वयः | मानसोल्लासे [207] | शिवतत्त्वरत्नाकरे [208] |
|---|---|---|
| ऐरावतः | श्वेतवर्णः, वालेऽपि श्वेतरोमयुतश्च । | आशरीरे, वाले, नेत्रयोः श्वेतरोमाः । |
| पुण्डरीकः | कोपप्रतापः, महशिरः, युद्धे विशारदः। | बकवन्नेत्रं, शीघ्रकोपी, बृहच्छिरः, युद्धविशारदः । |
| पुष्पदन्तः | कृष्णदेही, समप्रमाणकशरीरं, कृष्णरोमः, कृशोदरश्च । | घनवर्णः, आकर्शकशरीरं, घनवर्णक-केशाः, कृशोदरश्च । |
| वामनः | अग्निवर्णः, स्वर्णकान्तिः, वेगवान्, जलाभिलाषी च । | अग्निवर्णकशरीरं, सुर्वणाक्षः, वेगवान्, तरणासक्तः, स्थूलः, विस्तारश्च । |
| सुप्रतीकः | भयङ्करः परं चतुरः, कुमुदवत्सुन्दरः, लघुकेशश्च । | शीघ्रकोपी, कुमुदवच्छरीरं, कोकिलस्यैव नेत्रं, चतुरः, मृदुरोमश्च । |
| अञ्जनः | मृदुवालः मृदुदन्तयुक्तः, स्थूलोन्नतौ ऊरुप्रदेशावस्य । | सुन्दरवालः, सुन्दरकपोलः, शुभ्रः उदर-करवर्णः, बृहत्पृष्टश्च । |
| सार्वभौमः | भीतः परं स्थूलः, ह्रस्वकर्णः, ह्रस्वकरश्चायम् । | श्वेतवर्णः कर्णयोः पृष्टभागे, ह्रस्वकर्ण-करः, स्थूलशरीरश्च । |
| कुमुदः | कुमुदवत्सुन्दरः, स्थूलशरीरी, मृदुरक्ताक्षः। | कुमुदवर्णः, बृहद्देही, तीक्ष्णरक्ताक्षः, शुभः, विस्तारितकराग्रश्च । |

कोष्टकः - २२

शिवतत्त्वरत्नाकरग्रन्थानुसारेण गजानां पुनः चतुर्भेदाः दृष्टाः तेषां कार्योत्साहाधारेण । [209]

१. अन्वर्थवेदी - निर्भीताः, धैर्यशीलाः, शूराः, समर्थाः, अनुशासिताः सर्वकार्यार्थं शुभाः ।

२. गम्भीरवेदी - घातकबुद्धयः, अलसाः, निद्रालवः, मूर्खाः, तमोगुणप्रधानाः एते ।

३. उत्तानवेदी - बुद्धिशालिनः, कोपिष्ठाः, चञ्चलाः, त्वराप्रकृतिरेषां, सदाक्रीडासक्ताः।

४. प्रत्यर्थवेदी - जवगतयः, धावन्ति च यं कमपि वा अनुसर्तुमनाः एतादृशाः गजाः ।

*<u>गजवर्णः -</u>*

गजानां वर्गीकरणमग्रे तेषां बाह्यस्वरूपाधारेण । एतेषु प्रथमः तेषां वर्णः । यद्यपि गजाः कृष्णवर्णीयाः भस्मवर्णीयाः वा दृश्यन्ते गजानां वर्गीकरणसमये

[207] मानसोल्लासस्य द्वितीयविंशतौ तृतीयाध्यायस्य २७४तः - २८१ पर्यन्तम् ।
[208] शिवतत्त्वरत्नाकरे सप्तमकल्लोलस्य एकादशस्तरङ्गः ८३ तः ९० पर्यन्तम् ।
[209] शिवतत्त्वरत्नाकरस्य सप्तम कल्लोले, एकादशस्तरङ्गः - श्लोकाः ९१तः ९४ पर्यन्तम् ।

ग्रन्थकाराः विविधवर्णभाजः गजाः इति कथयन्ति ।

मातङ्गलीलायां वर्णविषयः कश्चिदुपस्थापितः । गजानां वर्णाः चत्वारः । ते यथा कपिल-पीत-कृष्ण-श्वेतश्चेति । प्रथमविधः रक्तस्य पित्तमिश्रणेन सञ्जायते, द्वितीयः रक्त-कफविमिश्रणेन, तृतीयस्तु पित्तमात्रेण, चतुर्थः कफमात्रजातः । ते पुनः मयूरपिञ्छेन, सुवर्णेन, मेघेन, चन्द्रबिम्बेन वा साम्यतां भजन्ते । अत्र ज्ञातव्यः पुनः यत्पृथिव्यां कृष्णवर्णात्मकगजाः केवलं दृष्टाः, अन्ये सर्वेऽपि देवलोकमात्रं दृष्टाः । [210]

गजशास्त्रग्रन्थयोः कश्चन भागः गजवर्णमुद्दिश्य वर्तते । [211] अत्र गजानां वर्गीकरणं तेषां वर्णानुसारं कृतम् । सामान्यतया गजाः त्रिवर्णाः- श्वेत-रक्त-कृष्णश्चेति । तेषां त्वक्, रोम, नख, वालवर्णं वीक्ष्य वर्णस्य निर्धारणं क्रियते । वर्णाधारितवर्गीकरणं गजस्वभावादिकं वा एवमस्ति -

१. शुद्धवर्णाः - रक्तवर्णाः, पीताः, कृष्णाश्च । कफवर्णवद्वा शशिबिम्बवद्वा भवन्त्येते ।

२. मिश्रवर्णाः - कृष्णश्वेतविमिश्रिताः, रक्तश्वेत, रक्तकृष्णविमिश्रिताः । पूर्णतया पीताः रक्ताः गजाः वा अनुपलब्धाः ।

३. अन्तर्वर्णाः - अन्तः श्वेताः - बर्हिष्टाद्रक्ताः, अन्तस्थात् श्वेताः-बर्हिष्टात् कृष्णाः, अन्तस्थात् रक्ताः बर्हिष्टात् श्यामाः/कृष्णाः वा ।

गजानां वर्णनामाधारेण त्रयः विधाः इति अभिज्ञाताः । ते शुद्धवर्णाः, मिश्रवर्णाः, अन्तर्वर्णाश्चेति । तेषां वैशिष्ट्यं पुनः कोष्टकद्वारेण ज्ञातुं प्रयासः कृतः ।

| क्र | वर्णः | गुणविशेषाः |
|---|---|---|
| १ | शुद्धः | हरित्, रक्तः, कृष्ण इति । कफयुक्तः शुभदः - श्वेतः, पित्तात् रक्तः; वातात् कृष्णः; । शरीरस्य चर्म-केश-नख-वालाः । [212] |

[210] मा.ली, अष्टमः पटलः १५तमः श्लोकः ।

[211] वर्णविषये कृतयोः क्वचिद्भेदाः दृश्यन्ते । उपरोक्ते वर्णविषये उभयोरपि ग्रन्थयोः सव्याख्या संयोजनं दृश्यते । परं श्लोकचतुष्टयं पा.ग.शा (त) ग्रन्थे दृश्यते (अस्य अष्टमप्रकरणादयं विषयः सङ्गृहीतः) । परं पा.ग.शा (व्यास) इत्यस्मिन् ग्रन्थे श्लोकत्रयं व्यासोक्ते गजशास्त्रे इति विलिख्य पुनः श्लोकचतुष्टयं दत्तम् । पुनरत्र शुद्धवर्णगजलक्षणम्, मिश्रवर्णगजलक्षणम्, अन्तवर्णलक्षणमिति विभागत्रयमप्यत्र दृष्टम् । (इदं दशमं प्रकरणमित्युक्तम्) ।

[212] (व्यास) गजशास्त्रे - अन्ये चारुणपीतकालधवलैर्वर्णैश्चतुर्धाः क्रमात् ।
कृष्णो वातभवः कफाच्छशिनिभः पित्ताच्च हेमप्रभः ॥ (पृ.सं.३८९)

| | | |
|---|---|---|
| २ | मिश्रः | हरित्+कृष्णः; श्वेत+रक्तः, कृष्ण+रक्त इत्येते ।[213] |
| ३ | अन्तः | अन्तश्श्वेत-रक्तः कृष्णस्य, अन्तश्श्वेत-कृष्णः रक्तस्य, अन्तर्रक्त-कृष्णः श्वेतस्य । |

कोष्टकः - २३

श्वेतः, पीतः, रक्तः, कृष्णः इति चतुर्विधवर्णः ।[214] एते गजाः (कलियुगे) न भवन्ति भूमौ, इत्युक्ते एतद्वर्णाकाः गजस्तु स्वर्गे दिग्दन्तिभिस्साकं जीवन्तीति । अतः कलियुगे विद्यमानास्सर्वे गजाः, करिण्यश्च प्रायशः पूर्णतया कृष्णवर्णाः एव भवन्तीति । काले सम्प्राप्रे ते सर्वेऽपि रक्तबिन्दुभिरञ्चिताः भवन्तीति ।[215]

*गजगन्धलक्षणम्*

अयं विभागः गजानां गन्धानामाधारेण कृतो वर्तते । अत्र शुभगन्धगजाः अशुभगन्धगजाः इति प्रकारद्वयम् । कुजलस्य गन्धाय गजस्यस्वेदः, मूत्रं, लालारसः वा परीक्षणीयाः । येषां सुगन्धः भवति ते भर्तुः सम्पदायुश्च वर्धन्ते परमेषां दुर्गन्धः ते पुनः भर्तुः सम्पदं विनश्य, तस्मै दुःखं दैन्यञ्च विन्दन्ति । शुभगन्धगजस्य सरोजस्य, मल्लिकादीनां सुगन्धेन वा समानतां भजते । अशुभगन्धगजस्य अविमांसं-काक-कूर्माणां वा गन्धेन समत्वं भजते । गन्धानुसारेण गजाः चतुर्विधाः[216] -

१. गन्धर्वगन्धगजाः - एषां गन्धः मत्स्यानां वा तालवृक्षरस इव भवति ।

२. यक्षगन्धगजाः - एषां गन्धः अशोक-मालतीपुष्पवद्भवति ।.

३. दानवगन्धगजाः - एषाम् अगरुधूप-सिन्धुवारपुष्पवद् भवति गन्धः ।.

४. देवगन्धगजाः - पद्मेन्दीवर-कुरण्टकपुष्पवत् सप्तपर्णपत्रवद्भवत्येषां गन्धः ।

---

[213] (व्यास) गजशास्त्रे - अन्ये ते कफवातपित्तगुनकैः व्यामिश्रवर्णा गजाः ।
जायन्ते जननाय संमदकरा जात्या जगत्याममी ॥

[214] हरित्कुङ्कुमवर्णाभः पद्माभो रक्त एव च ॥ कृष्णोंजननिभश्चैव व्यामिश्राख्यो गजो मतः । भवन्ति शङ्खवैडूर्यविद्युज्ज्वलाघनप्रभाः ॥ इति (व्यास) गजशास्त्रे (पृ.सं.३९०), दशमं प्रकरणम् ।

[215] पालकाप्यगजशास्त्रे पुनरयं श्लोकः अन्ते वर्तते यत् (व्यास) गजशास्त्रे न दृश्यते -
इन्द्रनीलसमाभाश्च हरितालनिभाश्च ये । अतिस्निग्धाश्च रक्ताश्च कुशपुञ्जसमप्रभाः ॥ ४१ ॥ नवमप्रकरणम् ।

[216] पालकाप्यगजशास्त्रे अष्टमप्रकरणस्य गजगन्धलक्षणम् । उभयोरपि ग्रन्थे श्लोकास्समानाः । परं (व्यास) गजशास्त्रे द्वादशकं प्रकरणं गन्धलक्षणं ब्रवीति । अस्मिन् नवश्लोकास्सन्ति ।

हंसदेवः मृगपक्षिशास्त्रे दन्तावलाः - सुगन्धिदेहाः, भद्रगजः - शुभगन्धशरीरः; पद्मी - पुष्पगन्धी; स्तम्बेरमः - शुभगन्धः इत्येतान् शुभगन्धिनः गजाः इति ब्रवीति; केवलं मृगविधमात्रं दुर्गन्धिः इति कथितः । [217]

एवं पुनः गन्धाधारेण केचन गजाः गन्धगजाः गन्धहस्तिनः वेत्येवोक्ताः । एते सद्गुण-युक्ताः इति भावोऽत्र । सुगन्धस्य कारणं प्रायः एषां स्वेदः, मदः, मूत्रं, मलं वा स्यादिति । [218]

शिवतत्त्वरत्नाकरे गन्धहस्तीत्यस्य गजविशेषः दृश्यते । [219] अस्मिन् भागे कथितं यन्मदयुक्तगजेभ्यः जातः गन्धगजः इति । उत्तमः गन्धगजः व्यालः इत्युक्तः । नीरोगिणः, वसन्तर्तौ जातस्य, यस्य शरीरस्य सर्वेभ्यः अङ्गेभ्यः मदजलं स्रवति सोऽपि गन्धगजः ।

*<u>गजच्छाया</u>*

मातङ्गलीलायामयं विचारः उपस्थापितः । इयं छाया गजस्य जीवितमेव व्यत्यस्ती कुर्यात् यथा सूर्यः एव मेघैराच्छादितो भूत्वा म्लानः भवेत्तथा । पृथिव्या, जलेन, वह्निना कृताः छायाः शुभाः इति कथिताः परं वायुराकाशयोस्तु बहुनिन्द्येति कथितम् । [220]

छायानिरूपणप्रकरणम् -

गजशास्त्रस्य एकादशतमोऽध्यायोऽयम् । अस्मिन्नध्यायभागे पञ्चश्लोकास्सन्ति । अत्र गजानां पञ्चविधच्छायाः उक्ताः । अत्रोक्तेषु प्रथमत्रिविधच्छायाः अत्युत्कृष्टाः यतो हि ते भर्त्रे समृद्धिं प्रयच्छन्ति । अन्ते स्थितौ द्वावपि गजौ नीचौ यौ भर्तुः कष्टं

[217] हंसदेवस्य मृगपक्षिशास्त्रस्य षष्टश्रेण्याः श्लोकसङ्ख्या क्रमशः २७२, २९२, ३१४, ३२९, ३०३ ।
[218] गजशास्त्रानुबन्धः इति पुस्तकभागे यद्यप्यस्मिन् विषये अन्येऽपि विषयाः उक्ताः, तेऽत्रानुक्ताः। (पृष्टसङ्ख्या १४२)।
[219] शिवतत्वरत्नाकरस्य सप्तमकल्लोलस्य एकादशस्तरङ्गस्य श्लोकाः ११३तः १२२ पर्यन्तम् ।
[220] मातङ्गलीला अष्टमः पटलः श्लोकसङ्ख्या १६ ।

विनाशञ्च आनयतः ।[221] द्विविधगजच्छायाः दृष्टाः यथा शुभच्छाया अशुभच्छायेति । शुभच्छायाः त्रिधाविभक्ताः, अशुभच्छायाः द्विधा । यथा -

| गजविधः | छाया | गुणाः | फलम् |
|---|---|---|---|
| शुभ-च्छाया-गजाः | पृथ्वीच्छायाः | अनेके सुन्दर-स्पष्टनील-रक्त-श्वेत-कृष्ण-चिह्नानि गजशरीरस्य विविधभागेषु भवन्ति। | राज्य-लाभः |
| | सलिलच्छायाः | आशरीरे समानतया नीलवर्णः भवति । | यशःप्रदा |
| | अग्निच्छायाः | आशरीरे रक्तवर्णः भवति । | धनदा |
| अशुभ-च्छायाः | वायुछायाः | आशरीरे भस्मवर्णः भवति । | दुःख-अकीर्ती च |
| | नभच्छायाः | सर्वत्र शरीरे विविधवर्णैयुक्तं कौरूप्यं भवति | |

कोष्टकः - २४

<u>*गजावर्तलक्षणम्*</u>

आवर्तनं नाम गजशरीरे विद्यमानाः केशगुच्छाः । एते गजशरीरस्य सर्वेषु भागेष्वप्युपस्थिताः । चिह्नानामेतेषामावर्तनानामाधारेण शुभाशुभगजाः इति विभागः कृतः । (व्यास) पालकाप्ये गजशास्त्रे षोडषाध्याये असौ चर्चितः । ते शुभावर्तस्थानानि, शुभावर्तस्वरूपाणि, अशुभावर्तस्थानानि, अङ्गदोषाशुभावर्तपवादः चेति ।

*पिङ्गूषे पुष्करे चैव वक्षस्युभयपक्षयोः ।*

*तथांसफलके चैव तथा रन्ध्रोपरन्ध्रयोः ॥*

*भुजयोः कक्षयोश्चापि वालवृन्ते तथैव च।*

*फाले लाङ्गूलवंशे च मण्डूक्ये वक्त्रसंस्थिते॥*[222]

एते शुभावर्ताः भर्त्रे शान्तिमारोग्यविजयसाफल्यञ्चानयन्ति । शुभावर्त-स्वरूपाणीत्यस्मिन् भागे विविधानामार्वतानां प्रचिन्तनं दृश्यते । तत्र श्लोकाः

*शङ्खाब्जकुम्भमत्स्याभैः वर्धमाननिभैस्तथा ।*

*प्राकारादर्शवृषभदीपप्रासादतोरणैः ॥*

*वेदीयूपनिभैश्चैव शक्तिपट्टशसन्निभैः ।*

---

[221] पालकाप्यगजशास्त्रस्य अष्टमप्रकरणस्य छायागजलक्षणमिति भागः। (व्यास) गजशास्त्रे त्वयं एकादशकं प्रकरणम् ।
[222] (व्यास) गजशास्त्रे षोडषावर्तलक्षणं नाम 'षोडषकदशकं प्रकरणम्' - श्लोक सं २,३ च ।

*शरासचामराकारैः अङ्कुशछत्रसन्निभैः ॥*

*तनुभिर्बिन्दुभिर्भव्यवलिभिः सद्विवर्तनैः ।*

*वलीनां सङ्गमाद्वापि लक्षयेदाकृतीर्बुधः ॥* [223]

यदि वा गजस्यावर्तः दक्षिणभागे भूत्वा दक्षिणपार्श्वं प्रति कुटिलं भवति तर्हि सः शुभावर्तः अन्यथा सः अशुभः । तथैव वामभागे भूत्वा वामपार्श्वं प्रति कुटिलं भवति चेदावर्तः, सः विशेषः इति भावयित्वा शुभः इति परिगणनीयः । अन्यथा ते अशुभाः ।

एते पुनः अशुभावर्तस्थानानि -

*गात्रापरे कटे गण्डे गले हृदि हनौ तथा ।*

*तथा मेढ्रे तथा कुक्षे प्रोथभागे नखेषु च ॥*

*अण्डपाते च वृषणे जङ्घातत्परपेचके ।*

*कुष्ठीवतोश्च विज्ञेयो द्व्यङ्गुलौ मस्तके तथा ॥*

*वाहित्थेप्रतिमानेच कृष्णान्तेच निगालके।*

*आवर्तास्त्वप्रशस्तास्स्युः कुलकोशक्षयावहाः॥* [224]

चतुर्थो भागः अङ्गदोषाशुभावर्तापवादः ।

*यस्याङ्गुलिः प्रशस्ता वै हस्तदोषनिवारणे ।*

*दन्तस्थात् हस्तिनो हस्तः दन्तौ च मुखजात् पुनः ॥*

*मुखं च नेत्रयोर्दोषात् नेत्रं तु मुखजांस्तथा ।*

*नखः स्फिग्गतदोषांश्च शिप्जवूर्वोपरि स्थितान् ॥*

*अपरो वालजांशचिव वालधिः केशसंस्थितान् ।*

*कोशो निहन्ति निर्दोषः सर्वाङ्गोपाङ्गसंस्थितम् ॥*

---

[223] (व्यास) गजशास्त्रे षोडषावर्तलक्षणं नाम 'षोडषकदशकं प्रकरणम्' - श्लोक सं ५, ६, ७ च ।

[224] (व्यास) गजशास्त्रे षोडषावर्तलक्षणं नाम 'षोडषकदशकं प्रकरणम्' - श्लोक सं १०, ११, १२ च ।

*यस्याङ्गुलिः प्रशस्ता वै हस्त्यलक्षणवानपि ।*

*स बाह्यस्थैस्तथान्तःस्थैः दोषैर्न प्रतिहन्यते ॥*

*दन्तदोषस्तु हृस्यैव मुखजं हन्ति लक्षणम् ॥* [225]

एवमेव शिवतत्त्वरत्नाकरेऽपि षड्विधावर्ताः दृष्टाः यथा त्त्वग्ज-दशनभग्नज-केशज-पक्षजातज-वालज-रोमजश्चेति । केशजावर्तः द्विविधौ यथा शस्तः (यो हि मृदु-आकर्षक-समानतया वर्णयुक्तः, पीतवर्णीयान् केशान् धरन्ते इति कारणेन शुभाः), दन्तभग्नजश्चेति यौ द्वावपि भर्त्रे भूमिं प्रयच्छति । रोमजावर्तः केशावर्तौ च विजयमाप्नुवतः । दन्तभङ्गभवार्थः पत्नीं पुत्रं च दापयति । अत्यन्तं योग्यं नाम दक्षिणावर्तः, परं वामावर्तः सामान्यतः तिरस्कृताः । [226]

गजगतीनामाधारीकृत्यापि गजाः शुभाशुभाः इति परिगणिताः । [227]

| | |
|---|---|
| शुभगतिः | मल्लस्य, सिंहस्य, शुकस्य, व्याघ्र-शार्दूलस्य वा, वृषभस्य गतिश्चेत्, समासन- युक्ता, समपदा समदेहायुता चेत् । लघुपादः भवति चेदपि यदि समत्वेन चलति चेत्, वेगेऽपि न कष्टमनुभवति चेत्, मत्तश्चेदपि मुदितश्चेदपि समीचीनं चलति चेत् । |
| दुष्टगतिः | यदि चलनं वृकस्य, गोमेधिकस्य, गर्दभस्य नकुलस्य वा भवति चेत् । |
| विगर्हिता गतिः | पृष्टभागे, लाङ्गूले गात्रे यदि वा विषमता, वैकट्यं, वेगेऽपि यदि मन्दः, यद्यासनं आन्दोलिकावत्तोलयति चेत् । |

कोष्टकः - २५

ग्रन्थान्तरे इति पुनः श्लोकद्वयं दत्तम् व्यासप्रोक्ते इति च, परमेक एव श्लोकः प्रदत्तः । [228]

[225] (व्यास) गजशास्त्रे षोडषावर्तलक्षणं नाम 'षोडषकदशकं प्रकरणम्' - श्लोक सं १३तः १७ पर्यन्ततम् । पालकाप्यगजशास्त्रस्य ग्रन्थेऽपि क्वचिद्भेदान् विहाय अन्ये सर्वेऽपि श्लोकाः समानास्सन्ति प्रकरणभेदेन ।

[226] शिवतत्वरत्नाकरे सप्तमे कल्लोले एकादशस्तरङ्गे श्लो-१९२तः २०० पर्यन्तम् ।

[227] पालकाप्यगजशास्त्रे (त) गजगतिलक्षणादि नवमप्रकरणे श्लो१तः ५पर्यन्तम् । पुनः पालकाप्यगजशास्त्रे (व्यास) गजलक्षण-निरूपणं नाम पञ्चदशकं प्रकरणम् । एतस्य भागस्य व्याख्या कापि न दृश्यते ।

[228] पालकाप्यगजशास्त्रे (मै) इति ग्रन्थे पुनरयं श्लोकः प्रदत्तः -
वल्मीक-स्थाणु-गुल्म-क्षुप-तरु-मथनस्येच्छया हृष्टदृष्टिः यायाद्गात्रानुलोमत्वरितगतिपरो वक्त्रमुन्नम्य चोच्चैः ।
कक्ष्या सन्नाहकाले जनयति च मुहुः कम्पनं बृम्हितं वा तत्कालं वामदन्तं जयकृदथ रदं वेष्टयन् दक्षिणं वा ॥
पालकाप्यगजशास्त्रे (त) पुनः एतस्मात् पूर्वमयं श्लोकः वर्तते -

## *३.३.- गजदोषाः - गजानां शुभाशुभलक्षणानि च*

गजानां जातीनां तेषामुपयोगितां च सङ्चर्च्य अग्रिमं चिन्तनं भवति गजानां शुभाशुभलक्षणानि तेषां दोषाश्च । गजाः एवं विविधगुणोपेताः विविधाधारानुगुणेन एवं वर्गीकृताः । परं तत्र दर्शनीयाः गुणाः ते न केवलमुपयोगिनः भवेयुः परं तेऽशुभपरिणामं न वितरेयुः भर्त्रे राज्ञे वा । ते पुनः सर्वकार्योपयोगिनः सन्त्विति कारणेन ते दोषमुक्ताः अपि भवेयुः । अतः अयमध्यायभागः गजानां शुभाशुभविचारं चर्चयन् तेषां दोषानपि चिन्तयति ।

### *वराहमिहिरः बृहत्संहितायां*

गजानां भद्र-मन्द-मृग-सङ्कीर्णेति विभागमुक्त्वा तेषां शुभाशुभभणितिरग्रिमं कथनम् । पञ्चश्लोकेषु गजविभागं, विभागानुसारं मदवर्णमप्युक्त्वा गजानां शुभाशुभत्वं तत्तल्लक्षणानि च कथयति । [229] यस्य गजस्य न्यूनं नाम १८ नखाः, अत्यधिकं नाम २० नखाः भवेत् । यदि एतदतिरिच्यं भवति चेत् सः गजः अशुभः इति परिगणितः इत्याद्यंशाः अत्र चर्चिताः । [230]

### *मातङ्गलीलायाम् -*

नीलकण्ठः स्वकृतौ मातङ्गलीलायां गजानां शुभाशुभ्यत्वं विषदतया विवृणोति । [231] राजवाहनं भवितुं गजस्य शिरप्रदेशौ, रदद्वयम्, आसनं, तथा वंशभागः

---

सारङ्ग-सिंह-शुक-वानर-मल्ल-हंस-शार्दूलकस्य सदृशी शुभदा गतिः स्यात् ।
[दुष्टागतिस्तु सदृशी कृकलासकस्य या वै खरस्य नकुलस्य वृकस्य चापि ॥]

[229] वराहमिहिरस्य बृहत्संहितायाः हस्तिलक्षणाध्यायो नाम ६७तमोऽध्यायः ।

[230] अस्याध्यायस्य श्लोकसङ्ख्याः ६, ७, ८ गजानां शुभलक्षणविचारं भणन्ति । ते यथा -

ताम्रोष्ठोतालुवदनाः कलविङ्कनेत्राः स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः ।
चापोन्नतायतनिगूढनिमग्नवंशास्तन्वेकरोमचितकूर्मसमानकुम्भाः ॥ ६ ॥
विस्तीर्णकर्णहनुनाभिललटगुह्याः कूर्मोन्नतद्विनवविंशतिभिर्नखैश्च ।
रेखात्रयोपचितवृत्तकराः सुवाला धन्याः सुगन्धिमदपुष्करमारुताश्च ॥ ७ ॥
दीर्घाङ्गुलिरक्तपुष्कराः सजलाम्भोदनिनादबृंहिणः । बृहदायतवृत्तकन्धरा धन्या भूमिपतेर्मतङ्गजाः ॥ ८ ॥

पुनः अशुभलक्षणानि गजानामाह -

निमर्धाभ्यधिकहीननखाङ्गान् कुब्जवामनकमेषविषाणान् ।
दृश्यकोशफलपुष्करहीनान् श्यावनीलशबलासिततालून् ॥ ९ ॥
स्वल्पवक्त्ररुअमत्कुणषण्ढान् हस्तिनीं च गजलक्षणयुक्ताम् ।
गर्भिणीं च नृपतिः परदेशं प्रपयेदतिविरूपफलास्ते ॥ १० ॥

[231] मातङ्गलीलायाः द्वितीयेपटले शुभलक्षणाधिकारे १७ श्लोकाः तृतीयपटले अशुभलक्षणाधिकारे सप्तश्लोकाश्च सन्ति ।

(पृष्ठास्थि) च उन्नतास्सन्तु । अत्युत्तमगजस्य पुष्करभागौ, मेढ्रः, जिह्वा, तालु, ओष्ठ, गुदश्च इत्येते रक्तवर्णाः भवन्ति । विंशतिनखयुक्ताः, कुम्भस्थलोन्नताः, रक्तवर्णकाः, अवलिताः कर्णाः, मृदूदराः, मधुनिभदन्ताः, सुपुष्टशरीराः, करवालौ च समानतया स्थूलाः, दीर्घाः, सुन्दराश्च, स्निग्धशरीराः, श्यामवर्णकाः, शङ्ख-पद्मादि चिह्नयुक्ताः, स्तनवदुन्नतपृष्टदेशाः, दृढमेढ्रयुक्ताः गजाः योग्याः इति परिगणिताः ।

एवं शरीरस्य विविधाङ्गानि योग्यप्रमाणे, उपयोगहेतुश्च भवन्ति चेत्, शुभबिन्दवः शरीरे, गन्धयुक्तः, कूर्मादीना प्राणिनां चिह्नं शरीरे धरन्ति चेत्, दक्षिणस्थस्य दन्तस्याग्रः वामस्थदन्तात् लम्बितश्चेत्, चातुर्ययुक्तः, अष्टाङ्गविधप्रहरणे निष्णातश्चेत् सः गजः शुभः इति परिगणितः । मृग-सिंह-शुक-वानर-मल्ल-हंस-कदम्बस्य वा गन्धर्व-किन्नर-गरुड-वराह-व्याघ्र-नृप-शरभ-चक्रवाक-सर्पस्य वा चलनं शुभमित्युक्तम् । फेनायितं, पोतायितं, गर्जितं, हसितमिति तेषां शुभरवाः । पिपासया, बुभुक्षया, दुःखभयाभ्यां क्रियमाणाः स्वराः अशुभाः इत्युक्ताः ।[232] शुण्डेन यदि वा मृदङ्गस्य शब्दं, दुन्दुभिस्वरं श्रोत्राभ्यां, मुखेन वेणुवन्नादं करोति चेत्, हंस-सारस-मयूर-कोकिल-व्याघ्र-सिंह-वृषभस्य वा रवं ये अनुकुर्वन्ति ते कथिताश्शुभाः ।

अस्मिन्नेवाध्याये अशुभगजानामपि विवरणं ददत् ग्रन्थकारः, उष्ट्र-वायस-जम्बुक- वराह-वानराणां शब्दं ये अनुकुर्वन्ति तथैव यदि वा सर्वैरपि शुभगुणैर्युक्ताश्चेदप्यति-न्यूनाङ्गुलीयुताः, अत्यधिकाङ्गुलीयुताश्चेत्ते गजाः अशुभाः एव । दृश्यवृषणाः, वामनाः, मण्डूकोदराः, विकृताङ्गाः, अतिकृशाः, यदि कर्णौ न समानौ, यदिवा त्वग् कठिना, ह्रस्वशुण्डाः, बिन्दु-ग्रन्थियुक्ताः गजाः, वक्रलाङ्गूलाः इत्याद्यंशयुक्ताः गजाः दुष्टाः । यस्य दृश्यवृषणत्वं सः राजा पुत्रेण मित्रेण वा हतो भवति । यो गजः दक्षिणकर्णविहीनः चातुर्वर्ण्यं नाशयति । यदि वा वामकर्णः विनष्टः सः कर्मकरान् विनाशयति राजापि व्याधिपीडितो भवति । यदि वा रदौ दोषयुतौ, त्वक्, तालु, नखेत्यादीनां दुष्टत्वं दृष्टं चेत्ते निवारणीयाः तेषां कर्तनेन निष्कासनेन वा ।

---

[232] जिह्वामूलसमुद्भवं निगदितं फेनायितं स्याद् रुतं तत् पोतायितमोष्ठतालुजनितं तत् कण्ठजं गर्जितम् ।
तत् प्रोक्तं हसितं कपोलकरजं सर्वं तदेतच्छुभं क्षुत्तृट्छोकभयोद्भवं निगदितं निन्द्यं भृशं दन्तिनाम् ॥ १३/२/मातङ्गलीला

यो गजः रात्रौ विहरति प्रातःकाले अटति पक्षिणां रवं श्रुत्वा तमनुसरन्, सकृदेव स्व पुरतो विद्यमानौ पादावुत्थापयति, आधोराणणैरप्यनियन्त्रिताः ते परित्याज्याः । [233]

अत्र पुनः गर्भिणीकरिणीं सपुत्रं करिणी चापि तपोवनं प्रेषणीयेति ग्रन्थकारः भणति । [234]

*गजशास्त्रग्रन्थयोः*

गजशास्त्रग्रन्थयोः गजानां शुभाशुभत्वं दोषाश्च वर्णिताः । [235] गजदोषाः बहवस्सन्ति । [236] ते यथा दन्तत्रययुक्ताः {गजशास्त्रे (व्यास) अधमाधमाः इत्युक्ताः, वर्ज्याः, न क्रेतव्याः इत्युक्तम्}, अधिकप्रमाणयुताङ्गिनः, दृश्यमुष्काः, करीण्याम् अनासक्ताः, पादाधिक्याः गजाः, सततं जलं स्राविणः स्वशुण्ड-मेहनाभ्यां, येऽन्येषां गजानां यजमानं वा दुर्बुद्ध्या वीक्षन्ते, दुष्टस्वरूपयुताः, पूर्ववैरं स्मरन्तः कदापि तस्य यजमानस्य हननायोद्युक्तः, शरीरस्य पूर्वभाग-उत्तरभागयोः प्रमाणे वैचित्र्ययुक्ताः, गण्डस्थलरहिताः, विशालगण्डस्थलयुताः, व्यालगजाः (क्रूरमुखिनः), वालदण्डविहीनाः, वालदण्डाधिकाः, कोशाधिकाः, कोशविहीनाः, हस्तहीनाः, हस्ताधिकाः, अङ्गुल्यधिकाः, अङ्गुलिहीनाः, श्रोत्राधिकाः, श्रोत्रविहीनाः, नाभ्यधिकाः, नाभिहीनाः, नासाधिकाः, नासाहीनाः, मूकाः, बधिराः, कुब्जाः, छायारहिताः, पिशाचाः, सर्वत्रकेशमयाः गजाः, विषमकेशाः इत्यादि ३७ विधाः गजदोषाः उक्ताः । यदि गजेष्वेते दोषाः ते राजानं हन्तीत्यप्युक्तम् । एताभिस्साकं पुनः यस्य गजस्य

---

233 मातङ्गलीलायाः तृतीयोध्यायः, अशुभलक्षणाधिकारो नाम ।

234 पोतान्वितावा करिणी सगर्भा लब्धा भवेद् वाहनकोशनाशः। तपोवने वा स्ववनेऽथवापि नीत्वार्पयेद् दिग्गजदेवपूजाम्॥ मातङ्गलीला सप्तमः पटलः, तृतीयः श्लोकः ।

235 गजशास्त्रे (त) गजदोषविषये नवश्लोकास्सन्ति परं गजशास्त्रे (व्यास) अयमेव विषयः सप्तश्लोकेषु विषदीकृतः । (व्यास) गजशास्त्रे प्रत्येकस्यापि विवरणं दृष्टं वर्तते ।

236 गजशास्त्रे (त) दत्ताः नवश्लोकाः एवं सन्ति ।
त्रिदन्ता अधिकाङ्गश्च समुष्का ये च निस्पृहाः । अतिपादाश्च ये नागा गर्भिणीव सदोदकाः ॥
पूतनामातृकश्चैव मायिको मत्कुणस्तथा । गात्राभ्यामपराभ्यां च कटाभ्यामपि वारणः ॥
ताभ्यामेकेन वा हीनो व्याळहस्ती तथैव च । वालदण्डेन कोशेन हस्तेनाङ्गुळिना तथा ॥
श्रोत्रान्तरेण नाभ्या च नासया च मतङ्गजः । अधिकोऽप्यथवा हीनो मूकश्च बधिरस्तथा ॥
छायाहीनश्च कुब्जश्च पैशाचश्च मतङ्गजः । प्रवेष्टयोरप्रविष्टरोमकूपोपलक्षितः ॥
कचव्याप्तशरीरस्य विषमैर्लोमभिर्युतः । एतल्लक्षणसंयुक्तो राजानं हन्ति वारणः ॥

महापार्ष्णीयुतौ पादौ, नयनं कृष्णवर्णं, दृष्टिपरुषाश्च गजाः महादोषाः इति कीर्तिताः । [237]

गजशिक्षानामकग्रन्थे गजानां दोषाणामाधारत्वेन शुभाशुभत्वं वा वर्ज्यावर्ज्याः इति वा कोऽपि कथनं न दृश्यते ।

मानसोल्लासे श्लोकचतुष्टये गजशुभाशुभत्त्वमुक्तम्। [238] -

*सुस्निग्धौ रदनौ वृत्तौ दक्षिणश्च समुन्नतः ।*

*अकृष्टं  तालु ताम्रं च दशाष्टौ नखराः शुभाः ॥*

*अपाण्डु मेहनं शस्तं वालयुक्तश्च वालधिः ।*

*अच्छिद्रौ विस्तृतौ कर्णौ मधुपिङ्गविलोचने ॥*

*बृंहितं मेघगम्भीरं लोहितं पुष्करं वरम् ।*

*अङ्गुली वर्तुळा दीर्घा गौरश्यामा तनो च्छविः॥*

*शुभं लक्षणमेतत् स्याद् गजानां जयकारिणाम्।*

*तस्माल्लक्षणसंयुक्ता गजाग्राह्या महीभुजा ॥*

तथैव अशुभान् गजान् श्लोकद्वये उक्त्वा शुभाशुभानूकस्य विवरणं ददाति कृतिकारः ।

*अतो यदन्यत् तत् सर्वं विरूपं विकृतं च यत् ।*

*न्यूनाधिकं तु यद्रूपं तत्सर्वमशुभं विदुः ॥*

*हीनलक्षणसंयुक्ता गजास्त्याज्या महीभुजा।*

*दुर्भिक्षशोकभयदा लोचनोद्विग्नकारिणः॥* [239]

---

[237] अयं विषयः गजशास्त्रे (व्यास) अनुपलब्धः परं गजशास्त्रे (त) मध्ये उपलब्धः । श्लोकावेवं भवतः ।
यस्य पादौ महापार्ष्णी कृष्णो नयनयोश्च । यस्यास्ति योनिर्विकृता कोशश्च स न शोभनः ॥
अन्ये च दारुणफलाः सर्वैश्चाशुभलक्षणैः । युक्ताश्च दृष्तिपरुषा महादोषाः प्रकीर्तिताः ॥

[238] **मानसोल्लासस्य द्वितीयविंशतौ तृतीयाध्याये श्लो २२६ - २२९ ।**

ये गजाः शुभप्राणिनाम् अनुकरणं कुर्वन्ति ते शुभानूकाः इति कथिताः । ये निन्दितानां प्राणिनां चेष्टामनुकुर्वन्ति ते अशुभानूकाः निन्दितानूकाः वेति कथिताः ।

बसवभूपालस्य शिवतत्त्वरत्नाकरेऽपि सुन्दरकायाः, सर्वेषामपि धातूनां समप्रमाणकाः, उज्ज्वल-नखाः, सिन्धूरवर्णीयाः, मधुनिभदन्ताः, दृढदन्ताः, शौर्ययुताः, युद्धोपयोगिनश्च, भूमिस्पृशशुण्डाः, अवक्रवालः, मृदु-दीर्घमेढ्राः, पद्मनेत्राः, कोकिलवत्स्वराः शुभगजाः इति परिगणिताः ।[240]

करिण्यः अपि शुभाशुभाः इति परिगणिताः । यासां मस्तककुम्भौ वृत्ताकारौ, स्पष्टस्तनयुगलं, केशाश्च, कोकिलवत् शुद्धनयनं, सुन्दराननं, विशालोरः, विशाले कर्णे, युक्तगतिः, पद्मवर्णयुक्त-दन्तः, ताः शुभगजाः इत्यङ्गीकृताः ।[241]

एतैस्साकं अस्मिन्नेव ग्रन्थे श्लोकसङ्ख्या १५५तः १६७ पर्यन्तं विशिष्टः विचारः प्रस्तुतः । शरीरस्य अनेकैरवयवैः विद्यमानैः विशेषगुणैः का सिद्धिर्भविष्यतीति दत्तम् । अत्र पुनः शुभाशुभत्वं गजस्य बाह्यगुणानवलम्ब्य उक्तास्सन्ति ।

---

[239] मानसोल्लासस्य द्वितीयविंशतौ तृतीयाध्याये श्लो २३० - २३१ ।

[240] शिवतत्वरत्नाकरे सप्तमकल्लोले ११तमस्तरङ्गे श्लोकसङ्ख्या ९८-१०२ ।
सुस्निग्धं श्यामकान्तिं ससुरभिवदनं सप्तधातुस्थिराङ्गं सुव्यक्तोत्तुङ्गकुम्भं शशिधवलनखं सान्द्रसिन्धूरबिन्दुम् ।
मध्वाभोत्तुङ्गदन्तस्थिरतररदनं धैर्यवन्तं द्विपेन्द्रं संप्राप्तो भूमिपालः सजलधिपरिखां शास्ति पृथ्वीमशेषाम् ॥
मध्वाभदक्षिणसमुन्नतदन्तकोशाः सुस्निग्ध चारुनयना अतिदीर्घहस्ताः
सम्पूर्णविंशनखाः पृथुपीनकुम्भा निश्छिद्रबिन्दु रुचिरोज्ज्वलकर्णतालाः ॥
क्षोणीमण्डलकुण्डलीकृतकरायामोऽभिरामो दृशः क्षौद्राम्भोहगन्धदक्षिण महादन्तोऽभिरामेक्षणः ॥
स्फूर्जद्विंशति सन्नखः परभृतव्याहारचारुस्वनो निश्छिद्रश्रवणाञ्चलो नूपकरी स्याद्बिन्दुजालोज्ज्वलः ॥
आभूमिदीर्घऋजुवृत्तसरोमबालश्चूतप्रवालऋजुकोमलकोशदण्डः ॥
रक्तारविन्दनयनः कलकण्ठनादः सोऽयं करी शुम्भकरः खलु पार्थिवानाम् ॥

[241] शिवतत्वरत्नाकरे सप्तमकल्लोले ११तमस्तरङ्गे श्लोकसङ्ख्या २१३ - २१९ ।
हस्तीनीनां प्रवक्ष्यामि साम्प्रतं शुभलक्षणम् । सुवृत्तौ मस्तकौ यस्याः सुविभक्तौस्तनावपि ॥
सुकेशी कलविङ्काक्षी श्वेतस्निग्धमुखी च या । महोरस्या महाश्रोणी सुभगा चारुगामिनी ॥
रक्तोत्पलदलाभासा यस्याश्च दशनावली । हस्तिनी तादृशाकारा यूथपं जनयेद्द्विपाम् ॥
यस्यैषा हस्तिनी राज्ञः स स्त्रीसौभाग्यवान् भवेत् । गन्धमाल्यानुलेपैश्च चारुभिर्विविधात्यक्षैः ॥
धूपादैर्मधुपर्कैश्च वशां पूर्वसु पूजयेत् । यादृशं लक्षणं पूर्वं नागानां प्रतिपादितम् ॥
तदेव लक्षणं तज्ञो हस्तिनीष्वपि योजयेत् । शूरमारोहकं कुर्याद्दृशगं च विशेषतः ॥
शूरत्वं वाहकत्वं च तदायत्तं गजे यतः । स जितः कल्पितः शूरः शूरारूढः प्रतापवान् ॥

# चतुर्थोऽध्यायः

शास्त्रेषूक्ताः गजविषयकाः अंशाः -

४.१ - गजवनानि ४.२ - गजग्रहणम् ४.३ - हस्तिशिक्षा ४.४- हस्तिशाला

गजानामावसथस्थानं सर्वदा अरण्यमेव ।[242] तेषां जननादारभ्य मरणपर्यन्तं तेऽरण्ये एव जीवितुमिच्छन्ति । गजानां प्रसवः मनुष्यावरणेषु अद्यापि फलकारी नास्ति । तेषां जन्म अरण्ये भवेत् । सामान्यतः वनगजानां जन्म-पालन-वर्धनाधिकं सर्वमप्यरण्ये भूत्वा मृतिरप्यरण्ये एव जायते । परं मानुषाचारकारणादेतेऽरण्ये प्राप्तजन्मानः मनुष्यैः गृहीताः पालिताश्च स्वपरिसरे । ते पुनः अत्र कार्यार्थं योजिताः । मनुष्यबन्धने विद्यमानाः करिण्यः यदा गर्भिण्यः भवन्ति तदा तासां पोषणं पालनं च विशेषतया क्रियते । यदा तासां प्रसवकालः समायाति ताः अरण्यं प्रेषिताः यत्र वनगजास्सर्वे तस्याः साहाय्यं कृत्वा प्रसवं कारयन्ति । कानिचनदिनानन्तरं ताः सपुत्राः मनुष्यबन्धने प्रत्यानीताः प्रायः।

गजाः यद्यपि अरण्यवासिनः ते न सर्वेष्वरण्येषु प्रतिवस्तुमिच्छन्ति प्रतिकूलत्वात् । तेभ्यः वैविध्यपूर्णसस्यराशिः सदैवावश्यकः । सामान्यतः भारतीयगजानामाहारप्रमाणं अल्पमेव भवति । पञ्चटन्परिमितेभ्यः पुरुषगजेभ्यः साधारणतया दिनस्याहारापेक्षा २०० कि.जि भवति । तदर्धभाराभ्यः करिणीभ्यः १००के.जि. आहारः अलम् । परं करिणीभ्यः याः गजशिशुभ्यः क्षीरं पाययन्ति ताभ्यः प्रायः १५० के.जि. आहरमवश्यकं भवति ।[243]

आधुनिककालस्य गजवासकेन्द्रारण्यानां सामान्यसमीक्षणेन ज्ञायते यदादेशे कानिचनैव निर्दिष्टान्यरण्यानि गजानां वासयोग्यानीति । प्रधानतया गजानां वासयोग्येषु

---

[242] इममेव विचारमाधार्य संस्कृत पथः नाम प्रो.बि.ए.दोडमनि महोदयस्य अभिनन्द्रग्रन्थे गजक्षेत्राणि प्राचीनभारते इति कश्चन प्रबन्धः प्रकाशितः । परमत्र तदरिक्तविचाराः अप्युपस्थापिताः ।

[243] गजसंहिता, पृष्टसङ्ख्या १९ ।

वनेषु नित्यहरिद्वर्णारण्यान्यान्यारण्यानि यानि दक्षिणभारते तथा पूर्वोत्तरप्रान्तेषु सन्ति तान्येव अधिकानि । देशस्यान्येष्वरण्यभागेषु प्रायः गजाः न दृष्टाः एवेति सामान्यतया कथयन्ति । परं संस्कृतसाहित्ये विद्यमानानां गजसम्बन्धि शास्त्रग्रन्थानां च चिन्तनं अस्माद्भिन्नं दृश्यते ।

गजास्तु सर्वदा अरण्यवासिनः । लघ्वरण्यानि न, परं बृहदारण्यान्येवाश्रित्य स्वजीवनं यापयन्ति । कारणं तु स्पष्टम् । तेषां बृहच्छरीरं पालयितुं दिनस्य बहुभागं क्षपयन्ति ते । स्वोदरपोषणायैव अधिकः समयः तेषां व्ययितः भवति । स्वेष्टाहाराः यत्र लभन्ते ते महान्तः पर्वताः, औष्ण्यवलयविद्यमानारण्यानि, समुद्रतटप्रदेशाः वा सन्तु परं तेषामावसथस्थानानि भवितुमर्हन्ति । तेष्वप्यरण्येषु अनेकविधसस्य-वृक्ष-पर्णानि-शाखा-घासेत्यादयः विपुलं लभेत । स्वदीर्घशुण्डैस्ते उपर्युपरि प्रसारिताः शाखाः अपि प्राप्य महावृक्षानपि निपातयन्ति ।

गजेषु सामान्यतः भेदद्वयं दृश्यते । आफ्रिकाखण्डीयाः एष्याखण्डीयाः इत्याधुनिक-प्राणिशास्त्रकोविदैरुक्तम् । आफ्रिकाखण्डीयगजास्तु लोक्सोडाण्टा इति वैज्ञानिकनाम्ना आकारिताः । एषियाखण्डीयाः एलिफाण्टिडे इति नाम्नाकारिताः । आफ्रिकाखण्डीयाः सामान्यतया आफ्रिकाखण्डस्य मध्यभागे एव स्थिताः । परं गजशास्त्रानुसृत्य, आधुनिकप्राणिशास्त्रानुसारमपि प्रायः चैना देशं अरब्देशान् विहाय अन्यत्र पूर्णतया एष्याखण्डे एष्या-खण्डीयाः गजाः दृष्टाः ।

सहस्राधिकाः गजाः भारतीयोपखण्डे (दक्षिण-एष्याप्रदेशे) दृश्यन्ते । भारतीय-गजानां प्रभेदः आधुनिककालीनभाषायाम् एलिफस् मेक्सिमस् (Elephas maximus) इति । भारतं विहाय भारतं परितः विद्यमानेष्वन्येषु देशेष्वपि गजास्सन्ति । अतस्तेषां प्रभेदं किञ्चिद्भिन्न- नाम्नाकारिताः यथा - सुमात्रा-देशस्थाः गजाः Elephas maximus sumatranus, श्रीलङ्कादेशीयाः गजाश्च Elephas maximus maximus इति । प्रभेदः यः कोपि वा भवतु गजास्तु अरण्यवासिनः गजाः एव पालिताः भवन्ति । अतः वर्गीकरणे तेषामुपयोगितानुसारमेते अरण्यवासिनः, पालिताश्चेति विधद्वयं इति पृथक्

कर्तुं शक्यते । यद्यप्यादेशे गजाः पालितास्सन्ति, अरण्यगजाः दक्षिणभारते तथा ईशान्यभारतस्य भागेष्वेव केवलं दृश्यन्ते । पूर्वमियं स्थितिर्नासीदिति अनेके गजशास्त्रग्रन्थाः तेषु दिवसेषु गजानामरण्यानि गजाः वा कुत्र कुत्रावसन्निति निर्दिशन्ति । अतः अयमध्यायः गजानाम् आवस्थस्थानानां चिन्तनं करोति । प्राचीनभारतस्य विविधेषु स्थानेषु, देशेषु तत्तत्काले विद्यमानानां गजानां स्थानानि कानि कान्यासन्निति एतद्द्वारा ज्ञातुं शक्यतेऽस्माभिः ।






(भारतीय गजः) (आफ्रिकागजः)

भारतीयगजाः कथं दृश्यन्ते पुरतः पार्श्वतश्च , आफ्रिकागजाः कथं दृश्यन्ते पुरतः, पार्श्वतश्च






प्राचीनेषु रामायणादिग्रन्थेषु गजस्थानविषयकः उल्लेखाः दरीदृश्यन्ते । उदाहरणार्थं

| विषयः | श्लो.सं | सर्गः | पृ.सं |
|---|---|---|---|
| गजानां वासस्थानानि, तेषां विधाश्च (अयोध्या) | २०, २३-२५ | ६८, ७० | ८२, ९१ |
| प्राग्जोतिष्यपुरस्य गजाः (किष्किन्धाकाण्डः) | ३४ | ४२ | ३४९ |
| गजविहीनः दक्षिणभारतस्य किञ्चनवनम् (किष्किन्धा) | ९ | ४८ | ३८२ |

कोष्टकः - २६

*मातङ्गलीलायां*

अस्यां गजवनविषयकांशाः अनुक्ताः । यद्यपि कृतौ अङ्गाधिपतिरिति सम्बोधयति, देशस्य केषु भागेषु गजाः सञ्चरन्तीति न भणति । अयं गजग्रहणविषयेऽपि गजानामावसथानामरण्यानाम् उल्लेखमपि न करोति ।

*गजशास्त्रग्रन्थयोः*

गजवासविषयकारण्यानामुल्लेखः वर्णनञ्चात्रापि दृश्यते । गजशास्त्रस्य चतुर्थेऽध्याये गजलक्षणसहितमेतानि चर्चितानि । प्राच्यवनं, चेदीरूक्षकं, दशार्णकम्, आङ्गिरेयकं, कालिङ्गकम्, अपरान्तं, सौराष्ट्रं, पाञ्चनदं चेत्य अष्टौ गजवासयोग्यानि वनानि, तेषां क्षेत्रं, तत्र विद्यमानानां गजानां स्वरूपादिकानां विवरणमत्र ज्ञातुं यतामहे । अस्मिन् कोष्टके एतेषां वनानां सीमाप्रदेशाः निर्दिष्टाः, आधुनिककाले ते वनप्रदेशाः कस्मिन् राज्ये भवेयुरिति विषयोऽप्यत्र योजितः ।[244] कोष्टकः - २७

| क्र | वनस्य नाम | पूर्व-दिशि | दक्षिणदिशि | पश्चिमदिशि | उत्तरदिशि | आधुनिक काले (प्रायः) |
|---|---|---|---|---|---|---|
| १ | प्राच्यवनम् | कैलास पर्वतः | प्रयागः | गङ्गायमुनयोः उत्पत्तिस्थानम् | लौहित्यनदी -तटपर्यन्तम् | उत्तराञ्चल- उत्तरप्रदेशाः |
| २ | चेदी-रूक्षकम् | दशार्णः | उन्मत्तगङ्गा | मेखलानदी | त्रिपुरस्थलम् | प्रायः असमप्रान्तः |
| ३ | दाशार्ण-कम् | दशार्ण देशः | बलपर्वतः | वेत्रवतीनदी | श्रीपर्वतः | बिहारक्षेत्रम् |
| ४ | आङ्गिरे-यकम् | पारियात्रपर्वतः- ब्रह्मवती नद्योर्मध्ये | | विदिशादेशः | रेवानदी | मध्यप्रदेशः |
| ५ | कालिङ्ग-कम् | वारिधिः | सह्यपर्वतः | - | विन्ध्यपर्वतः | ओरिस्सा प्रान्तः |
| ६ | अपरान्तम् | कृष्ण गिरिः | सागरः | अस्तमय-पर्वतः | रेवानदी | महाराष्ट्र प्रान्तः |
| ७ | सौराष्ट्रम् | अवन्ती प्रमद पुरम् | अर्बुद पर्वतः | द्वारका | रेवानदी | गुजरात् प्रान्तः |

[244] पालकाप्यगजशास्त्रस्य (व्यास) गजशास्त्रस्य च चतुर्थं प्रकरणम् ।

| | | | | | | |
|---|---|---|---|---|---|---|
| ८ | पाञ्चनदम् | कालेयं वनम् | सिन्धुनदी | कुरुक्षेत्रम् | हिमालयाः | पञ्जाब् प्रान्तः |

एषु वनेषु वर्तमानानां गजानां वर्णनमेवं विद्यते -

प्राच्यवनगजलक्षणम् - दृढशिरोभागाः, दन्तौच, विपुलावर्ताः शरीरे शिरसि च, स्थूलोदराः, विशालचिबुकाः, दीर्घहस्ताः, श्वेतमिश्रितकृष्णवर्णीयाः । युद्धे, मृगया, वाहनार्थञ्च योग्याः, जवाः, चतुराः, शान्तचित्ताः, शीघ्रयन्त्रिताः, श्रवणसुखस्वराश्च ।

चेदीरूक्षकवनगजलक्षणम् - किञ्चिदिव वामनाः, परं शक्तियुताः, सुन्दराः, कष्ट-नियन्त्रिताः, श्वेतमिश्रितकृष्णवर्णीयाः, शीघ्रगामिनश्च ।

दशार्णकवनगजलक्षणम् - उन्नताः, शुभलक्षणैर्युताः, सुयोग्याः, पिङ्गलवर्णाश्च ।

आङ्गिरेयकवनगजलक्षणम् - सुन्दराः, कृष्णवर्णाः, उन्नताः, शक्तिसम्पन्नाः, मार्दवाः, सुन्दराक्षाः, स्वशुण्डं दन्ताभ्यां गृह्णान्ति, अधिकमौल्ययुताः ।

कालिङ्गकवनगजलक्षणम् - न उन्नताः, न कुब्जाः, कृष्णवर्णीयाः, स्थूलाः, बलयुताः, सुखेन मन्दं व्रजन्ति, सूक्ष्मकेशाः, मधु इव नेत्रं च ।

अपरान्तवनगजलक्षणम् - उन्नताः, सुन्दराः, बलयुताः, मृदुत्त्वक्युतगजाः, कृष्णवर्णाः, युद्धे मृगयार्थं च योग्याः, अधिकमौल्ययुताश्च ।

सौराष्ट्रवनगजलक्षणम् - । कृष्णवर्णाः, अल्पबलयुताः, ह्रस्वतनुनखवदनाः, अल्पायुषः ।

पाञ्चनदवनगजलक्षणम् - अतिकृष्णाः, कष्टनियन्त्रिताः, शक्तियुताः, केचनाशुभगुणयुताः, शिरस्यावर्तसम्पन्नाः, स्थूलदेहिनश्च ।

एषु वनस्थानेषु प्राच्यकालिङ्गकामपरान्तवनानि उत्तमवनानि, चेदीरूक्षक-दाशार्णाङ्गिरेयवनानि मध्यमवनानि, सौराष्ट्रक-पाञ्चनदवने अधमेत्युक्तानि ।[245] एतानि विहाय पुनरष्टवनान्युक्तानि यानि हिमालयं परितं सन्ति यत्र गजाः उपलब्धाः । एते उपवनोद्भवाः गजाः गुणहीनाः, अग्राह्याः इति कथितम् ।[246]

---

[245] पालकाप्यगजशास्त्रग्रन्थयोः गजावासवनोपवनलक्षणं नाम चतुर्थं प्रकरणम् । श्लो.सं १ तः १८ पर्यन्तम् । (क्वचिद्व्याख्यासहितम्)

| क्र | हिमालयात् | देशः | अस्मिन्वने स्थितानां गजानां गुणाः |
|---|---|---|---|
| १ | पूर्वदिशि | किरातः | विकृताः, दुर्विज्ञेयाश्च । *विकृतशरीराः, ह्रस्वहस्तयुताः, अरण्यवासिभिरपि अग्राह्याः, गुहास्वपि वसन्ति, कार्यार्थमयोग्याः, अनुपयुक्ताश्च* । ## |
| २ | आग्नेय-दिशि | लीला | ह्रस्वमुखाः, विषमाः । *ह्रस्वाननाः, स्थूलदेहिनः, दुष्टाः, दुष्टकार्यलुब्धाः, कष्टेन ग्रहीतव्याः, कर्मार्थमनर्हाश्च* । ## |
| ३ | दक्षिण-दिशि | विशाल द्वीपः | राक्षसाः, ह्रस्वाकाराः, विरूपाक्षाः, विकटाश्च । *गाढवर्णाः, मस्तकेरोमयुताः, ह्रस्वविकृतावयवयुताः, अनियन्त्रिताः, मनुष्य, गो, मृगाणाञ्च मारणे आसक्ताः, राक्षसगुणयुताः, वर्ज्याः* ## |
| ४ | नैऋत्य-दिशि | बर्बरः | ह्रस्वाः, ह्रस्वदन्ताश्च । *ह्रस्वदेह-वदनाः, निर्बलाः, पराक्रमशक्ति-रहिताः, दुष्टाः, अतः अग्राह्याः* । ## |
| ५ | पश्चिम-दिशि | विह्वलः | ह्रस्वकराः, दीर्घपादाश्च । *लघुदेहिनः, ह्रस्वहस्ताः, दीर्घचरणाः, दुर्लक्षणाः, अनर्हाः, अग्राह्याः* । ## |
| ६ | वायव्य-दिशि | वातिकः | कृशाङ्गाः, धूसरवर्णाश्च । *पीनदेहिनः, धूमवर्णाः, बलहीनाः इति कारणेन अयोग्याः, अग्राह्याः* ।## |
| ७ | उत्तर-दिशि | - | म्लेच्छजातिगुणान्विताः, अज्ञानिनः, अल्पायुषाश्च । *अज्ञानिनः, मूर्खाः, सुरापानेच्छुकाः, म्लेच्छगुणयुताः, शीघ्रकोपिनः, अल्पायुषः, वर्ज्याः* ।## |
| ८ | ऐशान-दिशि | भू-धरेन्द्रः | पैशाचकाः, भस्मवर्णाः, सर्वकर्मसु गर्हिताश्च । *कृशदेहिनः, भस्मवर्णाः, क्रूरिणः, बालानां हन्तुकामाः, स्वेच्छाचारिणः, स्नेहध्वंसकाश्च* । ## |

## -एवमेतेष्वष्टोपवनेष्वावासथगजानामयोग्यत्वमग्राह्यत्वञ्चोक्तं गजशास्त्र-व्याख्यायाम् ।

कोष्टकः - २८

एतानि वनानि विहाय पुनः अन्येष्वपि वनेषु गजाः समुपलब्धाः । एषां देशानां नामानि, एषु स्थितानां गजानाञ्च वर्णनं पुनरन्यस्मिन्नध्याये पुनर्विवृतम् ।[247] अयं भागः गजग्रहणप्रकरणात्पूर्वं स्थापितः, सर्वत्र श्लोकेषु उत्तम-मध्यम-अधमगजाः इति निर्दिष्टाः । इदानीं प्रत्येकं जानीमः ।

१. काम्भोज-लाटपुर-सिन्धु-वनायुज-अङ्गेत्येतेषु देशेषु विद्यमानाः गजाः विनयशालिनः, सितवर्णयुक्तकुम्भस्थल-नख-अङ्क-रदाः, एषां वालः अदीर्घः गात्रमपि,

[246] पालकाप्यगजशास्त्रग्रन्थस्य चतुर्थं प्रकरणम् (श्लो.सं १९ तः २७ पर्यन्तम्) ।
[247] गजशास्त्र (त) ग्रन्थे इदं देशभेदभिन्नगजलक्षणगजग्रहणकथनं नाम षष्ठं प्रकरणम् । अस्मिन् देशभेदभिन्नगजलक्षणं इत्यस्मिन् भागे १४ श्लोकास्सन्ति । गजशास्त्र (व्यास) मध्येऽपि इदं षष्टं प्रकरणमेव । एषां विवरणं दृश्यते कुत्रचित्भेदाः अपि ।

एषां शुण्डः, अण्डकोशश्च मृदु परं दीर्घाश्च । एते गजाः रजोगुणयुक्ताः । *(एते गजाः उत्तमाः, कामाधिक्यगुणाः इति कथयति व्याख्या ।)*

२. अनूप-वङ्गाल-पुलिन्द-हूण-नेपालक-अवन्ति-विदर्भेषु जाताः गजास्तु रक्तवर्णयुताङ्क-दन्त-मुख-शरीर-अक्षिणः, शूराः, प्रशान्तमानसाः, कफप्रधानाः इति भणिताः । *(सर्वेऽपि गजाः आकर्षकस्थिरगात्राः, वृत्ताकारमस्तकयुक्ताः । एते युद्धेभ्यः, विविधकार्याणां निर्वहणार्थं योग्याः। दुर्गुणहीनाः, उत्तमाश्चेति कथयति व्यख्या।)* [248]

३. सौराष्ट्र-घूर्णिक (गूर्जर)-कलिङ्ग-यवन्त-वत्स-काश्मीरे जाताः गजाः श्वेतवर्णमुख-गण्ड-अण्डकोशेषु, तामसवृत्तयः, गन्धशरीरिणः, नख-दन्ताश्च भिन्नाः एषाम् । *(उपर्युक्तशरीरभागष्वेषां श्वेतबिन्दवः भवन्ति, अण्डकोशः रोमावलियुक्ताः, मदावस्थायां कामविकारात् नख-दन्ताः किञ्चित् स्फुटितं भवेत्, तथापि नशिथिलाः, भुजगवत्तमसाविष्टाः, मध्यमाः इति व्याख्या) ।*

४. मत्स्य-बर्बर-त्रिगर्त-मालव-अश्मन्तेति देशेषु चरन्तः गजाः दृढाः, तामसिकप्रवृत्तयः, पीताक्ष-नख-पुष्कराः, श्वेतह्रस्वरद-मेहनयुताश्च । *(दृढकायाः, शूराः, वचनपालकाः, सर्पवत् तामसिकाः, सद्गुणिनः, कृष्णवर्णशरीरकाः, कामाधिक्यं नास्त्येषु, उत्तमाः इति व्याख्या ।)*

५. सौवीरदेशे, बाह्लीकदेशे, दशार्णदेशेषु जातानां गजानां गन्धः कालागरुगन्धेन तुल्यः भवति । एषां मुखं, दन्तमूलेशु कपिलवर्णरोमैर्युताः । एते कफशरीरिणः परं युद्धे महापराक्रमशीलाः । *(अत्युत्तमाः, एषां मूल्यमधिकम् मनोहराः इति व्याख्यायाम् ।)*

६. गीर्वाण-बाहुक-मराल-तहारीति देशेषु जाताः गजाः विचित्रतनुभिः शोभन्ते । तेषां रदावपि भिन्नतां भजेते । एषामण्डकोशः, पुष्करभागश्च कृष्णवर्णीयौ, नखास्तु कृष्णवर्णीयाः, देहः पीतवर्णः भवति । एते कोमलाः परं रजोगुणयुक्ताः, आशरीरं बिन्दुभिर्युक्ताः । *(कामाधिक्याः, कार्येषु-समयेषु च उत्तमगुणभुयिष्ठाः, बाल्ये एतेषां*

---

[248] (व्यास)गजशास्त्रे पालकाप्यगजशास्त्रम् (त) इति ग्रन्थात् क्वचिद्पाठभेदः दृश्यते । अत्रत्यः श्लोकः एवमस्ति - पुलिन्दबङ्गालसुमन्दहूणनेपालकावन्तिविदर्भजाताः । शोणाङ्कवृत्तान्ताननकायनेत्राः शूराः कफोद्रिक्तसुशान्तचित्ताः ॥

*दन्तद्वयं ह्रस्वाकारं-श्वेतवर्णश्च भवति परं प्राप्तयौवने रक्तमिश्रितश्वेतवर्णयुतं भवतीति व्याख्यायाम् ।)*

७. मत्स्य-राष्ट्रकर-हाटक-भोटदेशे विद्यमानाः गजाः तिलगन्धिनः, वक्राः, शीघ्रगामिनः, कृष्ण वर्णीयाः, दीर्घदिहिनः, दीर्घशुण्डाः, दीर्घरदान्विताश्च । *(परं व्याख्यायामुत्तमाः, अधिकमूल्याः, कृष्णवर्णमेढ्रवन्तश्चेति)*

८. कर्णाटक-आन्ध्र-मलयाल-विकुन्त-पाण्ड्य-पाश्चात्य-तौलव-कोङ्कण-गौडदेशेषु प्राप्त- जन्मानः गजाः कृष्णवर्णीयाः, शुभ्रदन्तयुताः, शुभ्रनखाः, पराक्रमिणः, वयोनुगुणं वृद्धाः भवन्ति ।*(भारं वहन्ति, मृगयार्थं सहकारिणः, शौर्ययुताः, अनुन्नताः, नह्रस्वाश्चेति व्याख्या ।)*

९. शैलाह्वया-हिरल-सह्यक-शाल्वलदेशेषु केचन जीवन्ति । [249] ते तु शीतकरदन्त-शरीरयुक्ताः, अतिसात्त्विकाः, सुन्दराः, जम्बूफलवर्णाः, रोमाः दन्ताश्च शुभकराः ।

१०. केरलदेशेस्थितानां गजानामेते गुणाः - सूक्ष्मबिन्दुयुक्ताः, सुन्दराननकर्णाः, स्निग्धरक्तवर्णीय नयनानि-तनु-दन्ताश्च, मनसा हितमेव वाञ्छति, शूरविक्रमाश्च । *(हस्तिप-भर्तुश्चापेक्षानुसारं व्यवहन्ति, सात्त्विकाः, पुनरेते न उन्नताः, न ह्रस्वशरीरिणश्च)*

११. नीलवाल-महाराष्ट्र-गुर्जराष्ट्रदेशस्य [250] गजाः श्वेतदन्त-नखयुताः, चञ्चुमल्लवंशे उत्पन्नाः । *(न उन्नताः, न ह्रस्वाः, कार्ये योग्याः इति व्याख्या)*

१२. कार्णखौमेति देशजातानां दीर्घाः केशाः, मध्ये मध्ये त्रुटितदन्ताः कृशाश्च । *(एते अल्पमदाः, स्वदेशयुद्धादिकर्मसु कुशलाः इत्येवं कथयति व्याख्या ।)*

१३. कुरु-शौरदेश-कुकुरदेशीयाः महाजविनः, अतिबलाः, शूराः, सदारोषभरिताः ।

---

[249] पालकाप्यगजशास्त्रे (त) अयं श्लोकः उपलब्धः यो हि अन्यस्मिन् पुस्तके श्लोकस्योत्तरमास्ते । अत्र विद्यमानः श्लोकः एवं वर्तते - शैलाह्वया-हिरळ-सह्यक-शाल्वलेषु ये चोद्भवन्ति शितशीतरदान्तकायाः ।
हय्यङ्गवीनरुचिरा ह्यतिसात्विकास्ते जम्बूकलाभतनवः शुभरोमदन्ताः ॥
(व्यास) गजशास्त्रे अयमेव श्लोकः एवं वर्तते -
तैलाह्वयाहिरलसह्यकशाल्वलेषु ये चोद्भवन्ति शितशीतनखाङ्ककायाः ।
हय्यङ्गवीनरुचिरा अतिसात्त्विकास्ते जम्बूफलाभतनवः शुभरोमदन्ताः ॥

[250] अयं श्लोकभागः नास्ति पालकाप्यगजशास्त्र(त) ग्रन्थे ।

१४. जाङ्गलदेशे जाताः गजाः धीराः, दीर्घकेशाश्च भवन्ति ।

१५. अनूपजाः गजाः पित्तदेहिनः, कृशदेहिनः, मन्दमेहनाश्च ।

व्याख्यायां पुनः उत्तम-मध्यम-अधम-सङ्करगजदेशाः पट्टिकारूपेण एवं निर्दिष्टाः । [251]

| एते ३२ देशस्थाः गजाः उत्तमकुलजाः इति प्रकीर्तिताः । | | | | | | |
|---|---|---|---|---|---|---|
| तरन्तल | सरवाह | प्रज्ञापयोधर | यवन | सुसुल्लास | सूतखण्ड | शाल्वल |
| शैलूक | अहिरल | सुसह्यक | चिञ्चुल | बाहब | गुर्जर | केरल |
| दशार्ण | हूण | बाह्लीक | सुखदल | सौवीर | विदर्भ | अवन्ति |
| नेपाल | युगन्धर | कोसल | सुमन्द | बङ्गाल | पुलिन्द | पाग्ज्योतिष |
| प्रौण्ड्र | सिन्धु | पाञ्चाल | जाङ्गल | | | |

कोष्टकः - २९

| *एते १० देशस्थाः गजाः मध्यमकुलजाः इति प्रकीर्तिताः* | | | | | | *तहारि* | *बाहुक* |
|---|---|---|---|---|---|---|---|
| *गीर्वाण* | *मराल* | *अङ्गû* | *वनायुज* | *वरसिन्धु* | *लाट* | *काम्भोज* | *अनूप* |

कोष्टकः - ३०

| एते १६ देशस्थाः गजाः अधमकुलजाः इति प्रकीर्तिताः । | | | | | | | |
|---|---|---|---|---|---|---|---|
| गान्धार | भोट | करहाट | मत्स्यराष्ट्र | शूपवर्म | कुरु | कुक्कुर | शूरसेन |
| कार्णकौम | पारसीक् | चञ्चुमल्ल | कनोप | बहुदान | गुर्जराष्ट्र | नीलवाल | महाराष्ट्र |

कोष्टकः - ३१

| एते ४० देशस्थाः गजाः सङ्करकुलजाः इति प्रकीर्तिताः । | | | | | | | |
|---|---|---|---|---|---|---|---|
| अश्मन्त | मालव | त्रिगर्त | बर्बर | मत्स्य | काश्मीर | यवन्त | वत्स |
| कलिङ्ग | घूर्णिक | सौराष्ट्र | गौर | आरट्ट | सुसुमल्ल | शूरसेन | चौर्य |
| वङ्ग | विदेह | सुधेष्ण | कोङ्कण | समुद्र | चौरजीव | गौरम | जालूक |
| केकय | खचर | यवरल | विकुन्त | पाण्ड्य | पाश्चात्य | आन्ध्र | कर्णाटक |
| मलयाल | तौलव | टङ्कण | गौड | सगर | मगध | चेकितान | कालेय |

कोष्टकः - ३२

नारदीयगजशिक्षायाम् - गजवनविशेषः न स्पृष्टः अत्र। अस्यां यद्यपि गजग्रहणविषयः उक्तः केषु वनेषु गजानां सञ्चारः इति न कथितम्, परमेते गजाः कुत्र कुत्र दृश्यन्ते इति कथयितुं केचन श्लोकाः आधारभूतास्सन्ति । द्वितीयपटलस्यैते श्लोकाः तत्

---

[251] (व्यास) गजशास्त्रे षष्ठे प्रकरणे ।

स्पष्टीकुर्वन्ति ।

*विन्ध्यस्य सानुभागेषु तटेषु हिमभूभृतः ।*

*काश्मीरदेशे काम्भोजनेपालक्षोणिषु क्वचित् ॥*

*बाह्लीककेकयाङ्गादौ वङ्गकोसलभूमिषु ।*

*कलिङ्गमत्स्यसौवीरोत्कलभूमितले क्वचित् ॥*

*काननेषूत्तमेष्वेवं मध्यमे भल्लभूतले ।*

*गङ्गायमुनयोर्मध्ये लाटकाननभूमिषु ॥*

*द्राविडेष्वपि कर्णाटेष्वटवीवीर्थिषु क्वचित्।*

*गम्भीराकृतयो नित्यं दानधाराप्रवर्षिणः॥* [252]

कौटिलीयार्थशास्त्रं यद्यपि हस्त्यध्यक्षस्य विषये गजवनानामुल्लेखं करोति, न तावद्गजावसथवनानां परिचयं ददाति । भारतस्य केषु काननेषु गजोपलब्धिः इति न भणति । मानसोल्लासग्रन्थेऽपि पूर्वोक्तवत् गजानामष्टवनान्युक्तानि । [253] एषु कालिङ्गकवनं, वेदिरूक्षकं, दाशार्णं वनं श्रेष्ठारण्यानि, आङ्गिरेयकं प्राच्यवनञ्च मध्यमे, अपरान्तवनं-पाञ्चनदं-सौराष्ट्रवनमित्येतान्यधमवनानीति परिगणिताः । गजानां जन्मस्थानानि-इत्युक्तमेतानि । शिवतत्त्वरत्नाकरे उपर्युक्तविधानेन मानसोल्लासम् एवानुसृतं वर्तते क्वचिद्स्थानभेदेन । [254]

नारायणदीक्षितेन विरचिते गजग्रहणप्रकरणं नाम ग्रन्थेऽपि गजवनविषयकचिन्तनं कृतम् । अस्मिन् ग्रन्थे सिन्धुनद्यारभ्य गङ्गायमुनानद्योस्तटपर्यन्तं

[252] १८तमश्लोकतः २१श्लोकपर्यन्तम्, द्वितीये पटले, नारदीयहस्तिशिक्षायाम् ।

[253] अस्य ग्रन्थस्य द्वितीयप्रकरणस्य 'राष्ट्रनिरूपणं' नाम तृतीयाध्याये श्लो.सं. १७१तः श्लो.सं. १७९ पर्यन्तं गजानामष्टवनप्रदेशाणां वर्णनं कृतम् । तानि वनानि तु प्राच्यवनम्, वेदिकारूक्षकवनम्, आङ्गिरेयंवनम्, कालिङ्गकवनम्, दाशार्णकवनम्, अपरान्तवनम्, सौराष्ट्रवनम्, पाञ्चनदवनमिति । यथा विवरणं स्थूलरूपेण वक्तव्यञ्चेदाधुनिककाले प्राच्यवनं नाम उत्तराखण्ड-उत्तरप्रदेशस्य भागाः; वेदिकारूक्षकवनं नाम उत्तरप्रदेशात् मध्यप्रदेशस्य केचनभागाः; गौडबङ्गालप्रदेशौ आङ्गिरेयकं वनम्; ओरिस्सा-आन्ध्रप्रदेशौ समुद्रपर्यन्तं कालिङ्गकं, श्रीशैलतः मलयालप्रदेशपर्यन्तं विद्यमानं वनं, सह्याद्रिपर्वतप्रदेशतः भृगुकृच्छपर्यन्तमपरान्तम्, द्वारावतीतः आवन्तीक्षेत्रपर्यन्तं विद्यमानं वनं सौराष्ट्रं गुजरात्-मध्यप्रदेशस्थितम्, पञ्जाबप्रान्तस्थं क्षेत्रं पाञ्चनदं वनम् ।

[254] शिवतत्व्रत्नाकरस्य सप्तमकल्लोलस्य ११तम तरङ्गस्य श्लो.सं. ९ तः १४ पर्यन्तम् ।

विद्यमानं काननं, वृन्दावनतः रैवतपर्वतपर्यन्तं, नर्मदावनक्षेत्रं, मध्यमवनभागतः गिरिव्रजारण्यभागक्षेत्रं, पूर्वसमुद्रभागप्रदेशं, कनकसरिततिरप्रदेशं, केरल-कोङ्कण-गोकर्ण-कर्णाटप्रदेशं, पश्चिमसमुद्रतः-बर्बरदेशपर्यन्तं विद्यमानं क्षेत्रं, पाञ्चाल-विराट-मथुराप्रान्तप्रदेशं, कुरु-केकय-काश्मीर-तुहिनगिरि-शृङ्गप्रदेशं, गान्धार-चन्द्रभागानदीतीरं, नैमिषवनं-बदरारण्यभूमिं, गण्डकवन-कोसल वन-भूमिस्थानं, नेपाल-वङ्ग-मगध-अङ्ग-उत्तरान्ध्रविपिनमिति बहूनां स्थानानामुल्लेखः कृतः। [255]

४.२ - गजग्रहणं

१. वनगजगमनावगमनम्

२. गजग्रहणकालः, जनाः, परिकराश्च

३. गजग्रहणविधाः

४. गृहीतगजानयनविधाः क्रमाश्च

५. गृहीतानां मानसिककाषाय्यम्

६. आनीतानां भोजनपरिकल्पनम्

७. गजशान्तिक्रमः

*गजग्रहणम्*

गजग्रहणं नाम कला अस्मिन् देशे आबहुकालात् प्रसिद्धास्ति । प्रायः गजग्रहणस्याति प्रसिद्धप्रसङ्गो नाम आदिपूज्यस्य गणेशस्य जननम् । लोकविश्रुतकथाधारेण स्मर्तव्यं चेत्, शिवेन मारितः पार्वत्यासृष्टबालकः । शिवः स्वशिवगणान् वदति यो उत्तरस्यां दिशि स्थापितशिरः स्वपिति तस्य शिरः

---

[255] गजग्रहणप्रकारस्य तृतीयाश्वासस्य श्लो.सं३८२तः ३९४पर्यन्तम् विविधमहीरुहाणां, वनक्षेत्राणाञ्च विवरणं दृष्टम् । श्लोकास्ते एवं सन्ति - सर्वोत्तमसानुतले हिमालये विन्ध्यशैले च । पूर्वाद्रावस्ताद्रौ नीलाद्रावपि च मलयगिरिकटके ॥
अपि च महेन्द्रादितटे विकल्यभूमीमृतश्च सानुतले । दर्दुरगिरिसानुतटे कदम्बगिरिसानुभूभागे ॥
अन्ये च ये च गिरयो ब्रह्मावर्तस्थले पुण्ये । आर्यावर्ते श्रेष्ठा विलसन्ति तथैव दक्षिणावर्ते ॥
तेषामपि भूमिभृतां निकटतले भान्ति कुञ्जरास्तुङ्गाः । चलदचलसन्निभास्ते नानाशुभलक्षणा बहुशः ॥
सिन्धुशतद्रुविपाशातरङ्गिणीतीरभागेषु । गङ्गायमुनानद्योस्तटभूमौ विपुलकाननोद्देशे ॥
अथ वृन्दावनभागे रैवतभूमिभृतश्च विपिनतले । अपि नर्मदावनान्ते रेवानद्याश्च तीरभागेषु ॥
मध्यमवनभागतले गिरिव्रजारण्यभागेषु । पूर्वाम्बुराशितीरारण्यतलेष्वपि महागर्ते ॥
कनकसरितश्च तीरे गभीरगहने लसन्ति करिनिवहाः । शुभलक्षणसम्पन्ना राष्ट्रक्षेमाभिवृद्धिदा नित्यम् ॥
केरलवनकान्तारे कोङ्कणदेशे च पुण्यकान्तारे । गोकर्णवनोद्देशे कर्णाटस्यापि कान्तारे ॥
पश्चिमपयोधितीरे बर्बरदेशस्य कान्तारे । पाञ्चालेषु विराटेष्वपि मथुराप्रान्तभागेषु ॥
कुरुकेकयकाश्मीरप्रदेशभागेषु तुङ्गगिरिकुञ्जे । गान्धारवनोद्देशे तटभूमितले च चन्द्रभागायाः ॥
नैमिशवनेषु पुण्येष्वथ बदरारण्यनिम्नभूमितले । गण्डकवनान्तराले कोसलवनभूमिवीथिषु ॥
नैपाले च वनान्ते वङ्गवनेष्वपि च मागधेष्वेवम् । अङ्गोत्तरान्ध्रविपिनेष्वेवं सारेष्वरण्यभागेषु ॥

आनेतव्यमिति । तस्य वचनानुसारेण शिवगणाः तथाविधगजस्य शिरसमानयन्ति तत्सङ्कर्त्य । सः एव गजवदनो भूत्वा शिवगणपतिरभूदिति कथाऽत्र स्मरणीया । रामायणकालादारभ्यापि गजानां ग्रहणं बहुधा भवन्ति स्मेत्युल्लेखाः बहुत्र दृश्यन्ते । यद्यपि कदाचित् सामान्यज्ञानमित्येव कथयितुं शक्यते यत् रामायणे महाभारते च गजानामुपयोगः अनेकत्र पश्यामः इति कारणेन, तेषां ग्रहणस्य कश्चन क्रमः पालिताः आसन्निति ज्ञायते एव । एतैस्साकं गजानां ग्रहणार्थमनेकान् विधान्, ग्रहणोत्तरं तेषां भावः, ग्रहणोत्तरं तेषां पालनमुपचाराश्च भृशं वर्णिताः बहुषु सन्दर्भेषु । [256]

(उदाहरणत्वेन एषु स्थानेषु गजबन्धनविचाराः प्रदत्ताः । कोष्टके दर्शितम् - यथा ग्रहणविचारः, सर्गः, श्लोकः, पृष्ठसङ्ख्या इति)

| | | | |
|---|---|---|---|
| करिणीनां उपयोगः वनगजानां बन्धनाय (अयोध्याकाण्डे) | ५० | १०० | २७६ |
| वनगजः कश्चन घासैः पिहितं कूपं गच्छतीत्यस्योल्लेखः (सुन्दरकाण्डे) | २० | ४७ | ३५१ |
| वनगजस्य बन्धनविचारः (सुन्दरकाण्डे) | ५४ | ४८ | ३६७ |
| बद्धानां गजानां क्लेशः (उत्तरकाण्डे) | २५ | ४५ | ३४७ |

कोष्टकः - ३३

गजाः वन्यमृगाः । तेषामुपयोगः बहुषु स्थानेषु बहुषु क्षेत्रेषु आबहुकालादस्तीति सर्वैरपि ज्ञायते एव । अयमेव विषयः बोधयति यत्तेषां ग्रहणं, पालनं, प्रशिक्षणं च तदारभ्यैव बभूवेति । ऐरावतो नाम गजः समुद्रमथनकाले सृष्टः । ऐरावतं इन्द्रः स्ववाहनरूपेण प्राप्तवान् । अयमेव विचारः हस्तिनामुपरि संयमनं साधितमिति विषयं प्रकटयति । यस्य कस्यापि जीविनः ग्रहणं, पालनं, पोषणं, शिक्षणं, प्रशिक्षणं, उपयोगश्च तस्योपरि नियन्त्रणमेव बोधयति । एतत्साकं तेषां ग्रहणार्थं तेषां चर्यावलोकनं, प्राप्तिस्थानज्ञानम्, तेषामिष्टखाद्याध्ययनं, वन्यस्वभावाः, ग्रहणपूर्वक्रियाः, ग्रहणाय सज्जता, ग्रहणक्रमः, ग्रहणोत्तरक्रियाकलापाः (तत्रापि ग्रहणस्य सद्यः काले क्रियमाणाः उपचाराः, ग्रहणोत्तरेषु दिनेषु कर्तव्याः क्रियाकलापाः, पोषणं, शिक्षणस्यारम्भः इत्यादि) - एवं सर्वमपि ज्ञातव्यं भवति । अतः अस्मिन् देशे अयं

[256] वाल्मीकिरामायणम् - अरण्यकाण्डः द्वितीयः सर्गः, श्लोकः - ७ (पृष्ट सङ्ख्या ७)

गजशास्त्रविषयः विशिष्टज्ञानत्वेन स्वीकृतः आसीत्, क्रमपूर्वकं तस्य पालनमप्यासीदिति स्पष्टतया कथयितुं शक्यते ।

गजाः वन्यमृगाः इति कारणेन तेषां प्राप्त्यर्थं ग्रहणमवश्यकम् । तदर्थं गजग्रहणमेव विशेषविषयत्वेनाधीतमस्माकं पूर्वजैः । सामन्यतया गजशास्त्र-सम्बन्धितेषु सर्वेष्वपि ग्रन्थेषु गजग्रहणस्योल्लेखः दरीदृश्यते । विशेषो नाम गजग्रहणप्रकारो नाम कश्चन ग्रन्थः एवोपलभते यो हि ग्रहणविषयमेवाधिकृत्य परिपूर्णतया चिन्तयति । अत्र प्रथमतया द्रष्टव्यः ग्रन्थोनाम कौटिलीयार्थशास्त्रम् । गजग्रहणं त्त्वत्र बहुविस्तारेण वर्णितः।

कौटिलीयार्थशास्त्रे हस्त्यध्यक्षः इत्यस्मिन्नध्याये [257] ग्रहणविषयकाः एते अंशाः चर्चिताः । मूलरूपेण अमीऽंशाः आलोचनीयाः इति कथयति कृतिकारः -

१. कति गजाः ग्रहणीयाः ?

२. गजग्रहणोत्तरं तेषामुपयोगिता का ?

३. गजान् ग्रहीतुं उपलब्धाः जनाः वस्तुनः कति ?

४. गृहीतानां गजानां पालनार्थमुपलभ्यमानानि सौकर्याणि

५. गजग्रहणस्थानानि (वनस्थानानि)

६. गजग्रहणविधाः

७. गजान् ग्रहीतुं योग्यः कालः

८. ग्रहणार्थं योग्यदिवसाः । इत्येतेषां पूर्वज्ञानांशैः गजग्रहणमारब्धव्यम् ।

प्रथमसोपनमिव गजानां स्थानं, तेषामटनमार्गः, गजगणे विद्यमानानां गजानां सङ्ख्या तत्रापि कति करिणः, करिण्यः गजबालाः, सामान्यतया तेषां वयः, इति सर्वेऽप्यंशाः विविधैः मूलैः ज्ञातव्याः । गजयूथस्य चरणं बहुभिः विधैः ज्ञायते यथा तेषां

[257] कौटिलीयार्थशास्त्रे अध्यक्षप्रचारो नाम द्वितीयाधिकरणस्य ३१त्तमोऽध्यायः ।

विसर्जनैः, तेषां शयनस्थानैः, तैः विदारितवृक्षैः, विक्षुब्धनदीतटैः, पादचिह्नैः, पादाघातविध्वस्तसस्यैः, विविधवृक्षसङ्घघट्टनैः, यदि तत्स्थानं परितः एव चेत् तेषां बृंहणादिकशब्दैर्वेति । एतैस्साकं विद्यमानेषु गजेषु तत्र कश्चित् यूथात् बर्हिष्ठः, दुष्टगजः, दन्ती, गर्भिणी, समदः, बन्धनात् विमुखीभूतो वेत्यपि सम्यक् ज्ञातुं शक्यते । [258]

गजशास्त्रकोविदाः शुभलक्षणैर्युतान् योग्यान् गजान् अनीकस्थस्य सूचानानुसारं गृह्णीयुः । गजग्रहणाय योग्यकालः सामान्यतया घर्मकालः, योग्यवयः सामान्यतया २०वर्षाणि । परं बिक्ककाः, मुग्धाः, दन्तैर्हीनाः, रुग्णाः, धेनुकाः, हस्तिन्यः वा न ग्रहणीयाः इति सूचयति । ये गजाः औन्नत्ये सप्तारत्नि, विस्तारे नवारत्नि, दशारन्तिपरिधिपरिमिताः ४० वर्षीयाः ते गजाः अत्युत्तमाः । ३० वर्षीयाः मध्यमाः, २५ वर्षियाश्च अधमाः इति परिगणिताः । विशेषो नामात्र गजग्रहणविधानानि अनुक्तान्यपि गजग्रहणोत्तरक्रिया-

कलापाः भृशं वर्णिताः ।

*<u>नीलकण्ठस्य मातङ्गलीलायां</u>*

अस्यां गजग्रहणविचारः सम्यगुपस्थापितः । [259] प्रथमे श्लोके गजग्रहविधाः, उत्तममध्यमाधमविधग्रहणक्रमाः उल्लिखिताः । गजग्रहणं वारीकर्म, वशाविलोभनं, अनुगतिः, आपातः, अवपातश्चेति पञ्चविधं । अत्र आदितः उत्तरोत्तरं गजानां ग्रहणं वर्ज्यमित्युक्तम् ।

१. वारीकर्म - प्रथमस्तु वारिकर्म यत्र गजानां कृते कश्चन बन्धः निर्मितः स्थूलैः दारुभिः । अस्य परिमितिः कोशविस्तारः भवेत् । तत्र कश्चन मार्गः निर्मातव्यः यत्तु गजानामन्तः प्रवेष्टुमवकाशं कल्पयेत् । प्रवेशद्वारं पुनः स्थूलैः स्तम्भैः स्थापनीयम् । अन्तः गजेष्टाहारान् यथा इक्षुदण्डान् च संस्थाप्य भेरी-पटहादिभिः ते तस्मिन् प्रेषणीयाः ।

[258] कौटिलीयार्थशास्त्रे हस्त्यध्यक्षो नाम ३१त्तमोऽध्यायः ।
[259] मातङ्गलीलायाः दशमः अधिकारः गजग्रहाधिकारः इति । अस्मिन्नधिकारे १४ श्लोकास्सन्ति ।

सर्वेषामपि प्रवेशोत्तरं तस्य प्रेवेशद्वारं बन्धनीयम् । द्वित्रिदिनोत्तरं अन्तः प्रविश्य हस्तिग्रहणचतुराः विविधैः बन्धकवस्तुभिः अपेक्षितगुणयुतान् गजान् विचीय, तान् प्रबध्य, अन्यगजैर्युक्तान् गजान् मोचयेयुः । गृहीतान् गजान् कण्ठे, उदरे, पृष्टभागे च सम्यक् प्रबध्य, पृष्टभागे स्थितौ पादावपि सनिगडौ कृत्वा शिक्षितैर्गजैः ते पुनः तस्मात् बन्धनात् नेतव्याः शिक्षणार्थम् । [260]

२. वशाकर्म - त्वग्निर्मिताच्छादनादिभिराच्छादिताश्शिक्षितगजानारुह्य रज्ज्वादिभिः गजगणः प्रवेशितव्यः करिणीभिस्सह । करिण्यः षट्पञ्चान् गजान् परितः यदा गच्छन्ति तदा गजारूढाः प्रच्छन्नारूढकास्तान् गजान् स्वरज्जुभिः प्रबध्येयुः । अत्र करिण्यः विविधैरोषधीभिर्लिप्ताः गजान् वशीकर्तुं समर्थाः कृताः । गजाः करिणीः वशीकर्तुमप्यनेके ओषधयः उपयोक्तव्याः। [261]

३. अनुगतिः - तृतीयक्रमोऽयम् । भेरीत्यादिभिः वाद्यैः गजान् प्रधाव्य गजग्राहकाः स्वजनैः गजान् भाययित्वा अनुसरन्तः श्रान्तान् गजशिशून् चातुर्येण गृह्णीयुः ।

४. आपातः - भूमौ पर्याप्तप्रमाणके गर्ते बद्धुं योग्यग्रन्थियुक्तरज्जवः प्रच्छन्नेन स्थापिताः । गर्ताः पांशुभिर्वाच्छादिताः । तस्मिन्स्थाने इक्षुदण्डाः, उत्पलनालानि, वंशखण्डाः, कदलीकाण्डाः इत्यादीनि गजेष्टखाद्यानिच संस्थाप्य गजाः तत्स्थानं भोक्तुमागच्छेयुरिति प्रतीक्षणीयम् । यदा तत्र प्रविष्टाः ते गजाः तत्रादनतत्पराः तदैव ग्रन्थियुक्ताः रज्जवः यासाम् अन्तभागः स्थूलवृक्षेभ्यः प्रबद्धाः, ते ग्रन्थियुक्ताः कर्षणीयाः यत्र ते गजाः बद्धाः भवेयुः ।

५. अवपातः - चतुर्हस्तगभीरं, द्विहस्तविस्तारं, पञ्चहस्तपरिमितं गर्तमेकं खनित्वा

---

[260] उपर्युक्तस्याधिकारस्य पञ्चश्लोकेषु प्रथमं गजग्रहविधानमुक्तम् ।

[261] उपर्युक्तायाधिकारस्य श्लोकत्रये अयमुक्तम् । अत्र गजाः करिणीर्वशीकर्तुम् करिण्यः गजान् वशीकर्तुं यथोपयोगायौषधयः उक्ताः अष्टम-नवमश्लोकयोः । यथा -

वरागरुक्षीरमहीरुहत्वङ्गालेयकसेव्यलोध्रैः
स्नातासुशीतैः कलशस्थिताद्भिर्वशा गजानां तु विलोभिनी सा ॥ ८ ॥
क्षौद्रोशीरनतैश्च मद्यसहितैर्हरतीन्द्रमूत्रेण वा
लेपोऽयं तु वशावराङ्गनिहतो वश्यो गजानां वरः ।
तद्वद् बिल्वककुक्कुटाण्डककरञ्जोद्भूतबीजैस्तथा
लेपोऽयं च वशं नयेद्गजवरान् सम्मिश्रितैर्धन्वनैः ॥ ९ ॥

तत्सर्वमपि वंशैर्घासैश्च उपर्युपरि प्रपूर्याच्छादयित्वा वा गजान् गर्तेषु प्रपात्य बन्धनीयाः ।

*गजग्रहणक्रमः गजशास्त्रयोः -*

गजशास्त्रग्रन्थयोः गजग्रहणमुक्तम् सप्तमप्रकरणे । अत्र प्रथमं गजयूथमार्गं तत्प्राप्तिस्थानञ्च कथं ज्ञातव्यमिति विशदीकृत्य, गजग्रहणकालः कः इत्युक्तम् । [262]

गजानां मल-मूत्रयोः विसर्जनादिभिः, प्राणिनां शरीरस्योपरि एषां लेपनेन, गजानां पदचलनेन, मार्गं परितः वृक्षाणां, घासादीनां निष्पीडनैः, तेषां शयनस्थानचिह्नैः, बृंहणैर्वा गजानां स्थानं गजगणस्योपस्थितिर्वा ज्ञातव्या । करिणी/गजाश्वान् वारुह्य सचिवैः, कर्म-करैस्साकं पाश-जालेति विविधैः परिकर्मभिः क्षितीशेन सह गजग्रहणाय प्रस्थातव्यम् । [263] सामान्यतया गज-ग्रहणाय ग्रीष्मर्तुः प्रशस्तः । गजबन्धनाय पञ्चविधाः प्रकल्पिताः यथा १. वारिबन्धः २. वशाबन्धः ३. अनुगतबन्धः ४. आपातबन्धः ५. अवपातबन्धः इति । पञ्च-विधेष्वन्तिमप्रकारद्वयं निन्दितं यतो हि गजाः ताभ्यां विनश्यन्ति प्रायः (यथा व्याख्या) ।

१. वारिबन्धः - एतन्निमित्तं प्रथमं वारिस्थानं विनिश्चीय तेषामिष्टंघासं तत्र क्षेपणीयम् । तत्स्थानं परितः परिखाः निर्माय तत्रैकस्मिन् गजागमनार्थं द्वारमेकं निर्मातव्यम् । तस्मिन् स्थाने सल्लकी-कदली-इक्षुदण्ड-घास-वंशकाण्ड-हरित्पर्णादिक-पिप्पली-नलिनी-नाल इत्यादीन् गजस्य इष्टाहारान् प्रतिदिनं ते यत्राहारान्विषन्नागच्छन्ति तत्रैतत्सर्वमपि संस्थापनीयं संवर्धनीयं च । वर्षपर्यन्तमस्य रक्षणं कृतञ्चेत् तत्स्थलं ज्ञात्वा सयूथगजाः तत्भक्षितुकामाः तत्रागच्छेयुः । गजागमनात् प्राक् सः प्रदेशः वृक्षशाखाभिः परिवेष्टनीयः । क्वचिद्द्वारमेकं निर्मातव्यम् कुञ्जराणां प्रवेशार्थम् । कुञ्जराणां प्रवेशोत्तरं तद्द्वारं निर्बन्ध्य तत्र प्रविष्टान् गजान् सुलभतया ग्रहीतुं शक्यम् ।

---

[262] आलानबन्धनमन्त्रसहितमत्राहत्य द्वाविंशति श्लोकाः उक्ताः ।

[263] अत्र रामायणस्य कश्चन श्लोकभागः अवश्यं चिन्तनीयम् । यत्र रावणः स्वानुभवमेवं प्रकटयति । यत् यदा सः वन्यगजग्रहणाय पद्मवनमगच्छत् रज्जुभिर्बन्धनैश्च तदा तत्रत्याः वन्याः गजाः स्वगणे एवं चर्चितवन्तः यदस्माकं वह्निनायुधैर्वा हानिः, भितिर्वा नास्ति; परमस्माकं अकरुणशीलाः, क्रूरबन्धुभिरेव समस्या वर्तते यो हि पूर्वं बद्धाः पालिताः, शिक्षिताश्च । श्लो - ६-८, १६ सर्गः युद्धकाण्डे ।

[264] (व्यास) पालकाप्यगज-शास्त्रे अयमेव विचारः एवमुक्तः । [265]

*गजान्वेषिणः गजचाराः एतैर्गजमूत्रशकृन्मिश्रणेन स्वशरीरं प्रलिम्प्य वनेष्वटन्ति गजास्तानभितः गुप्तम् । गजास्तेषां मूत्रशकृतः गन्धैरेवाकर्षन्ति ते । प्रायः अयं गन्धः गजशिशूनां स्यादिति, करिण्यः, करिणः वेत्येतान् प्रच्छनान् पुरुषान् गजाः करिण्यः वा यदोपागच्छन्ति दृढैर्रज्जुबन्धनैश्च तान् गृह्णन्येते वनवीराः ।*

*द्वितीये विधाने - अरुष्कवृक्षाणां सपत्रकाण्डैः गजग्राहकाः स्वशरीरं पूर्णतया आच्छादयेयुः । ते गजाः ये मदावस्थायां सन्ति उपागच्छन्तस्सन्ति वा अरुष्कवृक्ष-गन्धेनाकृष्टाः । सामान्यतया चत्वारितः विंशतिवर्षवयःपर्यन्तं ये गजाः मदावस्थायां भवन्ति ते गजाः सुलभतया गृहीताः भवन्ति ।*

(अधोदत्तानि कानिचन चित्राणि यानि गजग्रहणविधानं ज्ञापयन्ति । एषु सर्वेषु चित्रेषु गजानां बन्धनार्थं निर्मितं दुर्गं, तदन्तः हस्तीनां प्रेषणं, पालितानां गजानां साहाय्येन गजग्रहणचतुरैः ग्रहीतानां गजानां रज्ज्वादिभिश्च बन्धनं द्रष्टुं शक्यते ।)




[264] अयमेव गजग्रहणक्रमः आधुनिकभाषायां 'खेड्डा' इति कथ्यते । इदं खेड्डा कार्यतन्त्रस्य प्रगतशतमाने मैसूरुसंस्थाने कृतस्य सचित्रविवरणं दृश्यते यस्य चित्रमत्रापि योजितम् । एतत्साकं कन्नडभाषायाः वन्यजीविविषयसम्बद्धं चलच्चित्रं 'गन्धदगुडि' नामकं वर्तते । अस्मिन् चलच्चित्रेऽपि अस्य वारिबन्धक्रमस्य काश्चन दृश्यावल्यः द्रष्टुमुपलभ्यन्ते ।

[265] पालकाप्यगजशास्त्रस्य सप्तमं प्रकरणम्- गजग्रहणप्रकारकथनम् (पृ.सं ३१२) । विशेषो नाम अत्र विद्यमानाः श्लोकाः सोमेश्वरस्य मानसोल्लासेऽपि सन्ति । अत्र क्वचिद् दृश्यते इत्याह भगवान् व्यासो वारिबन्धविचक्षण: इति ।







२. वशाबन्धः -सप्ताष्टौ वा करिण्यः रज्जुबन्धनादिभिस्साकं, प्रच्छन्नैः गजबन्धकान् योजयित्वा गजगणं प्रविशेयुः । मदावस्थायां विद्यमानाः करिण्यः गजानन्यान् लोभेन बद्धुं साहाय्यं कुर्वन्ति ।

३. अनुगतबन्धः - काममोहिताः करिणः करिणीः अनुगच्छन्ति । पालिताः शिक्षिताः वा करिण्यः गजगणं प्रविश्य गजान् रज्जुभिः यथा बन्धयेत् तथा व्यवस्थापयन्ति गजग्राहकाः।

४. आपातबन्धः -सल्लकीकदलीयुते लघुगर्ते गजानां पातनस्य ग्रहणस्य च विधानमिदम् ।

५. अवपातबन्धः - एवमेव महागर्ते गजानां पातनं, ग्रहणमस्मिन् विधाने ।

आलानबद्धमन्त्रः इति कश्चन भागः दृश्यते अनयोः । अत्र गजेभ्यः आशीर्वादः दीयते यत् स्वास्थ्यपूर्णः, शक्तिसामर्थ्ययुतः, राज्ञे विजयं ददत् शतवर्षपर्यन्तं जीवेति।[266]

<u>*गजशिक्षायां गजग्रहणम्*</u>

उमापत्याचार्यटीकासहिते नारदविरचितगजशिक्षाग्रन्थे गजग्रहणविषये आहत्य ७३ श्लोकास्सन्ति ।[267] अत्र चतुर्णामेव विधानानां गजग्रहणविचारः उपलभ्यते अन्येषां पञ्चानामपेक्षया । अत्र आपातबन्धः, अवपातबन्धश्च एकीकृत्य गर्तबन्धः इति नामाङ्कितः । पूर्वोक्तानां ग्रन्थानां गजग्रहणविधानानां नामस्वपि विपरीतता ज्ञायते ।

१. दुर्गबन्धः - गजानां मार्गेषु आवरणं संस्थाप्य तेषां निर्दिष्टबन्धनशालायां सम्प्रेषणम्।

२. वारिबन्धः - पातुं नदीं जलस्थानं वागतानां गजानां पथच्युतिं कुर्वन्तः तेषां ग्रहणम्।

३. करिणीबन्धः - शिक्षिताभिः करिणीभिः गजानामनुलालनं ग्रहणञ्च ।

---

[266] आलानीयः ततस्तम्भे मन्त्रणानेन वारणः । यथापूर्वं स्वशालायां कीर्तिशौर्यप्रतापवान् ॥ ३५ ॥
अनिरुद्ध प्रवेशस्त्वं स्तम्भे तिष्ठ शरच्छतम् ।
आरोग्यबलवान् भूयो राज्ञश्च विजयावहः ॥ ३६ ॥

[267] गजशिक्षा पञ्चमपटलः, श्लोकसङ्क्या १९ - २५, व्यक्तिटिप्पण्याम् - ६० - ६४ ।

४. गर्तबन्धः - खनितगर्तेषु गजान् पातयित्वा तेषां ग्रहणम् ।

यद्यपि ग्रहणाभिधाने पूर्वोक्तेभ्यः ग्रन्थेभ्यः वैशिष्ट्यं नास्ति, तथापि विधाने केचन विचाराः अध्येतव्याः । प्रथमं ग्रहणविधानं दुर्गबन्धः अत्युत्तमं यतोह्यत्युत्साहिनः, शक्तियुताः, चतुराः गजाः ये बन्धनात् मोक्षमिच्छन्ति तन्निमित्तं स्वसामर्थ्यं प्रदर्शयन्ति तेषामध्ययनं शक्यं तेषां बन्धनार्थमपि प्रयत्नः योग्यः । अत्र न कस्यापि

गजशरीरस्याङ्गस्य हानिर्जायते । गजगणः दिनद्वयं निराहारः भवेदित्येकैव समस्यात्र ।

द्वितीयविधानं तु गजानां ग्रहणं जले । अतः अस्य नाम वारिबन्धः इति । अयमत्यन्ततया सुरक्षितं विधानं यत्र गजानां न कापि हानिर्भवति ।

परमत्र पूर्णतया गजगणः एव गृहीतः ये उपयोक्तुमर्हन्ति तेषां चयनं कृत्वान्यान् सर्वानपि त्यक्तुमत्र अवकाशः कल्पितः । अत्रारण्यवासिनः गजविहारपथद्रष्टॄणां (उन्नताद्वृक्षात्) पात्रं प्रमुखं भवति । अत्र शताधिकगजाः एकदैव ग्रहीतुं शक्यते । परमस्य कृते महान् कालावकाशः अपेक्षितः यथोपमासम् । अत्र बहूनां जनानामावश्यकता वर्तते इति कारणेन अतिव्ययसाध्यम् । अत्र गजगत्यवगमनायारण्यस्य विशाल-प्रदेशस्यावलोकनम् अत्यवश्यम् ।

एतस्यापेक्षया करिणीबन्धः वशाबन्धो वा उपयोगाय भवेत् यत्र समर्थान्, मध्यवयस्कान्, तरुणान् गजान् ये मदान्वितान् करिणीभिः ग्रहीतुं शक्यते । अत्र दशपञ्चगजान् बन्धितुं अधिकः समयो वा जनाः वा नावश्यकमुपर्युक्तविधानामपेक्षया । मदान्वितान्, उत्तमान्, चतुरान्, समर्थान्, बलयुतान्, गजान् करिण्यः सुलभतया

मोहयन्ति, ग्रहणायानुकूल्यं कल्पयन्ति ।

अन्तिमं विधानं नाम गर्तबन्धः अवटबन्धो वा । अत्र महान् कश्चन क्लेशो वर्तते यत्र हि ते गर्ते पातनीयाः । विविधाः गजप्रियाः सस्यविशेषाः मासं यावत् रोहिताः । तेसस्यविशेषाः गजेभ्यः मुक्ततया प्रदर्शिताः मध्ये गर्तमेकं निर्माय तत्र ते पातनीयाः । यथा गजेषु सन्देहोऽपि न जायेत तथात्र रोहण-गर्तनिखननादियत्नः करणीयः भवति ।

अयमपि क्रमः कालभक्षी एव । पातनोत्तरं ते गजाः रक्षिताः गृहीताश्च । गजानां मानसिकक्लेशस्य, व्रणस्य वावकाशः अत्र वर्तते ।

एवं गजग्रहणं गजाध्ययने बहुमुख्यं पात्रं वहति । अत्र तु उत्तमोत्तमाः गजाः चेतव्याः सर्वविध-गजेषु । एतैस्साकं गजाः न हिंसितव्याः, गजशावकाः न ग्रहणीयाः, गर्भिण्यः न पीडनीयाः, दोषयुक्ताः नावश्यकाः इत्याद्यंशाः अत्र परिगणनीयाः । ग्रहणीयाः गजाः वशाभिस्साकं मुदु-मधुरवचनैः व्यवहर्तव्याः ये तु मनुष्यैस्साकं फलप्रदां मैत्रीमारभेरन् यदैव ते नूतनाः मानुषलोकेषु । [268] यः कोपि कार्यमिदं निर्वहेत्तस्य तु महान् वर्तते कार्यभारः । अत्र पुनः गजाः शुभाशुभाः इत्यपि परिगणय्य, शुभगजाः एव विचीय ते रज्जुभिः बन्धनीयाः इत्यति-क्लिष्टकरमपि कार्यं विद्यते ।

*<u>सोमेश्वरस्य मानसोल्लासे -</u>*

सोमेश्वरस्य मानसोल्लासे गजग्रहणविचारोऽपि चिन्तितः । [269] यथापूर्वं हस्तिबन्धनाय पञ्चविधानानि तूक्तानि परं तेषां विशदीकरणे अत्राधिकं विवरणं दृश्यते । प्रथमद्वितीय-विधानयोर्विवरणे नास्ति कोऽपि व्यत्यासः । परमनुगतबन्धादारभ्य विवरणमधिकं दृष्टम् । [270] आपातबन्धस्यापि क्रमः समस्यापि अत्रोक्तः । [271] अग्रे अवपातोऽप्युक्तः । [272]

---

[268] समुद्भूतं यदा तेषां पारतन्त्र्यं वनोदरे । तदा प्रभृति ते सर्वे वारणाः शान्तमानसाः ।
तिष्ठन्याज्ञासु यन्तॄणां मानुषस्नेहबन्धिताः ॥ ७३ ॥ गजशिक्षा, पञ्चमः पटलः

[269] सोमेश्वरस्य मानसोल्लासे द्वितीयप्रकरणस्य राष्ट्राध्यायो नाम तृतीयाध्याये गजविषयकविचाराः चर्चिताः । यथा पूर्वोक्तम् अस्याध्यायस्य १८१ श्लोकतः १९५ श्लोकपर्यन्तं गजशास्त्रयोः उक्ताश्श्लोकाः यथावद्दत्ताः । परं तस्मादित्युक्ते १९६ तः २२० श्लोकपर्यन्तं स्वविरचितमिति दृश्यते । अत्र विशेषतः आपातावपातबन्धनविधाने उक्तौ अन्यविषयैस्साकम् ।

प्रथमं गजानां प्राप्तिस्थानमुक्तम् श्लोकद्वये । वनेषु गजानां प्रवासस्थानानि एतैः चिह्नैः ज्ञातव्याः - १.गजानां मूत्रशकृद्भ्यां २. गजलिण्डैरनुलिप्तान्यारण्यवासिभिः३.गजचरणचिह्नैः४. गजैरुध्वस्थवृक्षशाखाभिः ५.भूमौ तेषां शयानादिचिह्नैः ६.गजबृंहणैश्च ।

पञ्चसुविधानेषु त्रीणि विधानानि तु योग्यानीत्युक्तानि । प्रथमं, द्वितीयं तृतीयविधानानि तु योग्यानि अत्र गजस्य न कापि हानिः भविष्यतीति कारणेन । परमन्ते विद्यमानेऽन्ये द्वे विधाने तु अयोग्येऽतः निन्दिते इत्युक्ते । आपातबन्धावपातबन्धेतिविधद्वयाद्वा गजाः सामान्यतया व्रणिताः भवेयुः, अस्थिखण्डनमपि भवितुं शक्यते इति कारणेन ।

[270] अनुगतबन्धः - वनचारिणां साहाय्येन सुप्तस्य गजयूथस्य स्थानं निश्चेतव्यम् । शिक्षितगजैस्साकं साङ्कुशाः गजग्रहणकुशलाः येषां हस्ते घासः, ते एतं पूर्णतया समन्ततः गच्छेयुः । अन्येऽनुचराः विविधवाद्यानि वादयितुंताननुसरेयुः । एतैस्साकं अश्वारोहिणः, गजारोहिणः, करिणीरोहिणश्च ये यूथाकर्षणकार्ये तत्पराः तत्र तत्र भवेयुः । वाद्ययुक्ताः जनाः जलस्य समीपं, वृक्षस्योपरि च योजनीयाः । परेद्यवि प्रभाते यदा गजाः उत्तिष्ठन्ति निद्रायाः, सङ्गीतवाद्यैः तान् संक्षोभ्य तान् ततः जलप्रेदेशं प्रति धावनीयम् । गजग्रहणचतुराः तं यूथमनुसरन् ये पथविभ्रष्टाः ताननुसरेयुः रज्जुभिः बन्धनार्थम्, सङ्गीतवाद्यैः भायनार्थम् । अत्र ते स्वपिपासानिवारणार्थं जलस्थानं प्रविशन्ति । तत्र विद्यमानाः जनाः पुनः यदा वाद्यानि

*गजग्रहणप्रकारे* - अत्र पुनः गजग्रहणप्रकारः इत्ययं विशिष्टः ग्रन्थोऽपि अन्वेषणीयः भवति । यथा नाम्नैव ज्ञातः अयं ग्रन्थः गजग्रहणविषयमेकमेव प्रधानतया परिचर्चयति ।[273] सामान्यतया सर्वेऽपि गजशास्त्रप्रधानग्रन्थाः पञ्चविधगजग्रहणं वदन्ति । परमस्मिन् ग्रन्थे गजानां दशविध-ग्रहणमुक्तम् ।[274] ते त्वेवं विधाः -

१. वृतिबन्धः - पञ्च-षट्कान् गजान् ग्रहीतुं योग्यः । पञ्चाशज्जनाः अत्रावश्याः ।

२. वृक्षबन्धः- वृक्षाणां साहाय्येन शताधिकगजान् ग्रहीतुं शक्यम् । ५-६दिनान्यवश्यकम् ।

३. रज्जुबन्धः शृङ्खलाबन्धः पङ्कबन्धः आलवालबन्धो वा - जले, मृदि वा बन्धनक्रमः ।

४. वारिबन्धः सलिलबन्धो वा- द्विवर्षपर्यन्तमप्यस्य सिद्धता प्रचलेत् । गजगणग्रहणयोग्यः क्रमोऽयम् ।

५. अनुगतबन्धः करिणीबन्धो वा - यथापूर्वं करिणीसाहाय्येन गजानां बन्धनक्रमोऽयम् ।

६. लघुगर्तबन्धः - अत्र त्रिहस्तप्रमाणकगर्ते पातयित्वा ग्रहणम् । नीचविधानमिदम् ।

७. निम्नावपातबन्धः - अत्र षढस्तप्रमाणकगर्ते पातयित्वा ग्रहणम् । इदमपि नीचमेव ।

८. चोदनबन्धः/प्रचोदनबन्धः/कर्दमबन्धः/प्रेरणाबन्धः- पङ्कमायोज्य तत्र बन्धनक्रमोऽयम् ।

---

वादयन्ति तदा पुनर्भीताः धावन्ति । अन्ते यदा ते श्रान्ताः भूत्वा तृट्बाधिताः, निश्चलगात्र-कर्ण-वालाः भवन्ति तदा ते बन्धनीयाः घासहस्तकरिणीनां साहाय्येन । गजानेतान् रज्जुभिर्बन्धनीयम् कण्ठ-उरसि-देशेषु ।

[271] आपातबन्धः-६० हस्तदीर्घविस्तारं गर्तमेकं खनितव्यम् । नारिकेल-वल्ली-विविध-वृक्षाणांशाखात्वग्भिश्च सम्पूर्य, गज-प्रवेशस्थाने मृदुमृदा-वालुकेन वाच्छादनीयः सः प्रदेशः। यदा गजाः तत्स्थानं प्रविशन्ति तदा तेषां पादाः तत्र स्खलनति, पतन्ति च।तदा गजस्य देहस्य पूर्वभागः रज्जुभिः प्रबध्य सः यथा पुनः अधः न गच्छेत्तथा प्रयत्नः रचनीयः। यदि वा सः तस्मात् स्वं रक्षितुमुद्युक्तः भवति चेन्मरणमपि कदाचिज्जायेत। गजशास्त्रविचक्षणाः अमुं ग्रहणक्रमम् नाङ्गीकुर्वन्ति।श्लो-२१३-२१६ ।

[272] अवपातबन्धः - चतुर्हस्तदीर्घं द्विहस्तविस्तारं पञ्चहस्तगम्भीरं गर्तमेकं निर्माय तत् वल्लीभिः, घासैः, अङ्कुरैस्सहाच्छादनीयम् । यद गजः स्थानमिदं प्रविशति तदा सः तद्गर्ते पतति । तदा तत्र बद्धुमवकाशः कल्पितः भवति । परमत्र गजस्य पादस्य अस्थिभङ्गः अपि भवितुमर्हति । तस्योरस्स्थाने व्रणः अपि भवितुमर्हति । कदाचित् सः दन्तोऽपि त्रुटितः भवेत्, मरणमपि सम्भवेत् । श्लो - २१७ -२२०

[273] अयं ग्रन्थः तिरुपतौ स्थितस्य श्री.वेङ्कटेश्वर विश्वविद्यालयस्य प्राच्यसंशोधनसंस्थातः प्रकाशितः । नारायणदीक्षितेनायं ग्रन्थः विरचितः । अस्मिन् ग्रन्थे आहत्य ८८१ श्लोकाः ५ आश्वासेषु विभक्ताः । प्रथमाश्वासे २९ श्लोकेषु गजानां शुभत्वं, कर्मणि च योजनम्, तेषां पालनं, युद्धे तेषामुपयोगिता चोक्ताः । द्वितीये ३४५ श्लोकेषु दशविधगजग्रहणविचाराः उक्ताः । तृतीये गजानां प्राप्तिस्थानं देशाश्च विषदीकृताः । चतुर्थे गजशिक्षणं २४१ श्लोकेषु, पञ्चमे २१७ श्लोकेषु गजानां वार्षिकमौल्यमापनमुक्तम् । (यथास्य ग्रन्थस्य परिचये ।)

[274] श्लोकसङ्ख्या ३०तः ३७५ पर्यन्तम् । गजग्रहणप्रकारः ।

९. वनबन्धः उद्यानबन्धो वा- वनाद्धावयित्वोपवनमत्र बन्धनमक्रमः, यो श्लाघ्य इत्युक्तम् ।

१०. पाञ्चालिकाबन्धः गृहबन्धो वा - गजशिशूनां बन्धनमनेन क्रमेण । अव्रणोपायः ।

गजग्रहणस्यान्यदपि किञ्चन विचित्रं विधानं दृश्यते नाटकेषु । भासस्य प्रतिज्ञा-यौगन्धरायणमिति नाटके आद्यङ्के घोषवती नाम स्ववीणया कौशाम्बीशः उदयनः नीलकुवलयतनुर्नाम कञ्चन विशिष्टं गजं ग्रहीतुं प्रयतते । परं सः कृत्रिमः गजः प्रद्योतस्य चित्तसृष्टः आसीद्योहि उदयनस्य ग्रहणाय निर्मितः आसीत् । पुनः चतुर्थाङ्के नलगिरिः इति मदान्वितं गजं ग्रहीतुं भद्रगिरिः इति करिण्याः साहाय्यं प्राप्य स्ववीणया साकं वासवदत्तामपहरत्युदयनः कौशाम्बीम् । (आधुनिककाले त्विदं काल्पनिकमिति कथयितुं शक्यम् । यतो हि वीणारवश्रवणेन गजाः मोहिताः भवन्तीति विश्वसितुं कष्टमिति धिया ।)

यद्यपि गजग्रहणविषये एवं बहुविधेनोक्तं तथापि हस्त्यायुर्वेदे पालकाप्यः ग्रहणात् सम्भाव्यमानान् दोषान् सम्यक् कथयति । रोमपादे स्वचिन्तनं प्रकटयन् पालकाप्यः बन्धनादुपजायते भीतिः, स्वातन्त्र्यं हरति गजानां, बाधिताः बहुभिः रोगैः, पीडिताः दुःखभयाभ्यां, आक्लिष्टाः ताडनबन्धनाभ्यां, दूयन्ते स्वसखाविरहेण, तुदिताः परुषवचनाङ्कुशवचोकर्मभिश्च, विषादिताः स्वेच्छाहारप्रवृत्तिदूषणात्, सदातन्द्रिताः रात्रौ अस्थानशयनकारणेन, पीडिताः नित्यं शरीरमनःक्लेशयुत कर्मभिः, यन्त्रिताः स्वेच्छारति- कर्मणेति बहुदुःखिताः भवन्ति । अतः गजाः बहुभिः रोगैः (निवारितुं साध्यमसाध्यमित्येतैः) सम्पीडिताः । अतः पालकाप्यस्य स्पष्टवचनं ब्रवीति यत् वन्यगजाः अग्राह्याः, मनुष्यकर्मभ्यश्च निवार्याः इति । [275]

हस्त्यायुर्वेदमहाग्रन्थस्य पूर्वबद्धाध्याये गजशिशुग्रहणस्य दोषान् सम्यक् वदति पालकाप्यः । [276] यदा गजशिशवः गृहीताः बद्धाश्च ते मानसिकं क्लेशमनुभवन्ति । ये

[275] पालकाप्यस्य हस्त्यायुर्वेदे वनानुचरिताध्यायो नाम प्रथमाध्याये ।

[276] पालकाप्यस्य हस्त्यायुर्वेदस्य क्षुद्ररोगस्थानम् नाम द्वितीयस्थानस्य १३तमः अध्यायः । अयं सुदीर्घः कश्चनाध्यायः यो हि पद्य-गद्येषु युक्तः षट्पुटपरिमितं लम्बितम् । अत्र वने उपलभ्यमानानामनेकवृक्षाणां घासादीनां दीर्घवर्णनं दृश्यते ।

सुखेन सञ्चरन्तः आसन्वने ते यदा बद्धाः स्वप्राकृतिकावासवञ्चिताः इति कारणेन व्याधिग्रस्ताः भवन्ति बन्धने । अत्र बन्धनेन तेषां दुःखं, वनजीवनस्मरणमित्यादिकं कथं भवतीतिति सर्वं सुष्ठु वर्णितम् । वने विद्यमानान् सर्वानपि विविधर्तुषु प्राप्स्यमानान्विविधजातीनामोषध-वृक्षघासादीनामाहारविशेषान्, जलादिषु क्रीडादींश्च स्मरद्भ्यस्तेभ्यः बन्धने दत्ताल्पजलाहाराश्च न रोचन्ते ।

हंसदेवस्य मृगपक्षिशास्त्रे अधिकं न उक्तं गजग्रहणविषये । स्थानद्वये गजग्रहणविचारः उक्तः । प्रथमम् - यदा गजस्य मदस्रावः आरभते तदा एते राजभिः ग्राहणीयाः । यतो हि एतस्मिन् काले ते विनाभयमटन्त्यरण्येषु । ते अपेक्षितसर्वगुण-सम्पन्नाः युद्धे उपयोगिनः भवन्ति ।[277]

अग्रे गच्छन्तः हंसदेवस्य मृगपक्षिशास्त्रं पुनरेकमुपायं वर्णयति यत्र गजशिशूनां केवलं ग्रहणमुक्तम् । यद्यप्ययं क्रमः न सुष्ठु वर्णितः तथापि एतावत्तु ज्ञातुं शक्यते - ये गजशिशवः निराहारात्, पिपासया वा दूषिताः, ये च पुनः उपर्युक्तकारणैः अतिनित्राणाः वा ते जलाहारदानैः, मृदुमधुरवचनैः मन्दं मन्दं समीपं गत्वा ग्रहीतुं शक्याः । एषस्तु प्रथमतः तृतीयवयः पर्यन्तं विद्यमानगजशिशून् ग्रहीतुमेव युक्तोपायः ।[278]

सर्वेऽपि ग्रन्थकाराः वसन्तग्रीष्मावेव गजग्रहणयोग्यौ ऋतावित्यभिप्रयन्ति । यतो हि वर्षकालस्तु गजानां मदवस्थायाः कालः । शरद्यपि ते कदाचिन्मदान्विताः । (काम्भोजादि देशेषु गजाः अवश्यं मदावस्थायां भवन्तीति) । अतः राजानः देश-काल-वृष्टि-वन-ग्रहणीयगजाः इति सर्वानप्यंशान् सम्यग्विचार्य कार्यप्रवृत्ताः भवेयुः । [279]

---

[277] हंसदेवस्य मृगपक्षिशास्त्रम् - षष्ठश्श्रेण्याः श्लो - २६३ ।

[278] जलबन्धादियोगेन सुखलभ्याः वने चरैः । क्षुदितास्तर्जिते काले करिणीभिश्च यत्नतः ॥
नीत्वा सुचित्ततां शान्त्याः मृदूक्तिभिरनुक्षणम् । शालायां रक्षितव्याश्च घासदानादिभिर्नृपैः ॥
अनर्घ रत्नमित्येव गजमाह सुनन्दकः । तस्मान्नृपतिभिर्नागाः शिक्ष्या रक्ष्याश्च यत्नतः ॥
हंसदेवस्य मृगपक्षिशास्त्रस्य षष्ठश्श्रेणी, श्लो.सं ३३६ - ३३८

[279] कौटिलीयार्थशास्त्रस्य गजाध्यक्षो नाम ५२ तमोऽध्यायः ।

## ४.३ - हस्तिशिक्षा

(गजशिक्षणविधिः)

१. गजसंज्ञाः २. गजशिक्षा ३. गजशाला

गजशिक्षणं, सर्वकौतुकमिदं ज्ञानम् । गजाः सामान्यतया आकर्षणकेन्द्रबिन्दवः मृगालये, देवालयेषु, धार्मिककार्यक्रमेषु, वनेषु वा । परं मनुष्यैस्साकं ये गजाः विद्यन्ते ते तु इतोऽपि आकर्षकाः भीत्या प्रीत्या च विशेषतः बालेभ्यः । हस्ति-हस्तिपयोः सम्बन्धः, तयोर्व्यवहारः, तादृशबृहज्जीवी हस्ती हस्तिपं किमपि न करोति वेत्यादयः प्रश्नाः सामान्याः एव । हस्तिप-हस्तिसम्बन्धः विशिष्टः इति सर्वैरपि गजशास्त्र-कोविदैरुक्तम् ।

ग्रहणोत्तरमेते गजाः हस्तिपानां यन्त्रणे भूत्वा तेषां स्वजीवनानि यापयेयुः । अतः तस्य हस्तिपस्य वचनपालनं गजानां कृते अनिवार्यमेव । एतद्दते तेषां बन्धनं-शिक्षा, आहारजलादीनामप्राप्तिरिति तु निश्चितमेव । एवं हस्त्येव हस्तिपस्य जीवितम् । जीवनस्य कदाचिज्जीवस्याविभाज्यमङ्गमपि भवितुमर्हति । गजानां कदाचिद्वा रोषः, क्रोधः, मदावस्थासु तेषां अनियन्त्राणादिकालेषु हस्तिपस्य जीवस्य, अङ्गानां हानिरपि भवितुं शक्येत । अतः सर्वदा जागृतः भूत्वा तेन गजेन हस्तिपेन जीवनं यापनीयम् । अतः उभयोरपि सम्बन्धः विशिष्टः । अस्मिन्नपि विषये गजशास्त्रग्रन्थाः हस्तिपानां स्वभावः, सामर्थ्यं, पालनीयानि नित्यकर्माणीत्यादिकाः अंशाः स्पष्टतया प्रदत्ताः । गजशास्त्रविशारदैरयमपि विचारः सम्यगधीत्य निर्दिष्टः ।

रामायणकाले गजानां शिक्षणं, हस्तिप-हस्तिनश्च सम्बन्धः आसीद्वेति प्रश्नः उद्भवत्येव । रामायणे उदाहरणार्थमेव दातुं शक्यते - कोष्टकः - ३४

| विषयः | श्लोकः | सर्गः | पृष्टसङ्ख्या |
|---|---|---|---|
| गजपालकाः स्वगजान् प्रत्यभिजानन्ति । अयोध्याकाण्डे उत्तरार्धे | ५७ | ९१ | २१७ |
| वनगजस्य शिक्षणम् -अरण्यकाण्डे | ३१ | ५६ | ३५७ |

बहवः कवयः, चिन्तकाः, शास्त्रकाराश्च मनुष्य-हस्तिसम्बन्धं सुष्ठु संस्थापितवन्तः । एषु प्रधानः शास्त्रदृष्ट्या अर्थशास्त्रकर्ता कौटिल्यः । गजानां पालनं शिक्षणञ्चोद्दिश्य अनेकान् विषयान् प्रस्तौत्ययं ग्रन्थः । वनात्तेषां प्राप्त्युत्तरं तेषां आवश्यकतानुसारं व्यवस्थाः चिन्तनीयाः, तेषां शिक्षणे ज्ञातव्याः पूर्वोपायाः । [280]

गजानां ग्रहणोत्तरं (केनचिद्वा विधानेन गृहीतान्) वनगजान्, पालितैः गजैः

हस्तिपाः नूतनानां गजानां स्थानं नीत्वा तेषामुपचाराः आरभेरन् । अतः हस्तिशिक्षकस्योपरीदं दायित्त्वमापततीदानीम् । अतः सः हस्तिपः स्वमनोधर्मं गजादावश्यकतां च सम्यग्ज्ञात्वा, सम्यग्विमिश्रीय स्वकार्यारम्भं कुर्यात् । गृहीतगजानां निग्रहणं तेषां शिक्षणञ्चावश्यं कर्म ।

गजानां शिक्षणं अधिकतया मार्दवं, दृढतां तथा सहनां चापेक्षते । गजशिक्षकः स्पष्टं जानाति यत्तस्य पुरतः महाशक्तिशाली तिष्ठति यो हि सुलभतया स्वं हन्तुं शक्नोतीति । परं सर्वमपि जानन् स्वकर्तव्यं निरूह्य स्वशक्त्या युक्त्या च तं गजं शिक्षयत्ययम् । आदौ गजेन साकं व्यवहारात् पूर्वं दण्डेन अङ्कुशेन वा कार्यप्रवृत्तो भवति तस्य महाकायस्य शिक्षणार्थम् । यद्यप्युत्तरकालेऽप्यस्योपस्थितिस्स्यात्तथाप्यस्योपयोगस्यानिवार्यताधिकतयावाञ्छितमेषाम् अभ्यासात् वाचं श्रोतुमवगन्तुं च ।

गजानां स्मरणशक्तिरगाधा इति कथितम् । [281] शिक्षणसन्दर्भे तैरनेके सूचकशब्दानां सूचनशब्दाः स्मरणे रक्षणीयाः । एतैरेव शब्दैः सः गच्छति काले उपवेष्टुं, स्थातुं, उत्थातुं, शुण्डमुत्थातुं, पदप्रहारं कर्तुं, चलितुं, उत्थापयितुं च सः आदिष्टः भवेत् तस्य नियोजितकर्मानुसारम् । परमेतस्य कृते कश्चनकालावधिरवश्यकः गजानाम् । सामान्यतया यदा एतत्कर्म कृतं भवति आज्ञापालनेन, तदुत्तरं सः केनचिदाहारवस्तुना श्लाघितः भवति सुकर्मणे

---

[280] कौटिलीयार्थशास्त्रस्य हस्त्यध्यक्षप्रचारे ।

[281] पालकाप्यस्य हस्त्यायुर्वेदे गजशिशवोऽपि बन्धनानन्तरं बहुदुःखमनुभवन्ति वने तेषां स्वातन्त्र्यमनुस्मरन्निति निर्देशः महारोगस्थानस्य बालग्रहाध्यायः इत्यस्मिन्नध्याये २०० अधिकश्लोकेषु वर्णितः ।

आज्ञापालनाय च । सामान्यतया एतत्सर्वं ज्ञातुं गजस्य कृते प्रायः मासत्रयं वावश्यकमिति कथ्यते दश-द्वादशशब्दान् स्मर्तुम् । ये दारुनयनाय प्रयुक्ताः ते चत्वारिषदधिकशब्दान् स्मरन्तीति आधुनिकगजपालनकोविदा ब्रुवन्ति । [282]

कौटिल्यस्य अर्थशास्त्रे गजानां पालनं शिक्षणञ्च उक्तमस्ति । तेषां शिक्षणार्थं पालनार्थं के के नियमाः पालनीयाः के के पूर्वोपायाः करणीयाः चेति स्पष्टं निर्दिशति । गजानां पालने नियुक्ताः कर्मकराः, (वने वा राजप्रदेशे वा) यथा वनपालकाः, गजपोषकः, गजनां बन्धनकरः, सीमासंरक्षकाः, वनवासिनः, गजशुश्रूषकाश्च वनगजानां बन्धनार्थं पञ्च-सप्तगजैस्साकं साहाय्यं कुर्युः । अस्मिन्नध्याये पालनार्थमधिकमुक्तं न तावच्छिक्षणार्थम् । [283] कौटिलीयार्थशास्त्रं गजानां शिक्षणार्थं कञ्चिदध्यायमेव नियोजयति । [284] गजानां

शिक्षणाधारेण चतुर्विधाः इति परिगणिताः । तेषां विवरणमेवं-

१. दम्याः - ये शिक्षितुं योग्याः ।
२. सन्नाह्याः - युद्धाय शिक्षितुं योग्याः
३. औपवाह्याः - ये वाहनार्थं योग्याः
४. व्याळः - दुष्टगजः

प्रत्येकस्यापि गजस्य पुनर्विभागाः कृतास्सन्ति । यथा -

| क्र | विधः | गजविधनाम | उपयोगः | विशेषः |
|---|---|---|---|---|
| १ | दम्यः | स्कन्धगतः | यो गजः आरोहणे बाधितः म्लायति वा । | बिक्काः - गजशिशवः यथा पाल्यन्ते तथैव एषामपि संरक्षणं क्षीरम्, ओदनम्, इक्षुखण्डैः च करणीयम् । |
| २ | | स्तम्भगतः | यो स्वयमालाने बद्धुमवकाशं कल्पयति । | |
| ३ | | वारिगतः | वारिबन्धनार्थं जलं नेतुं योग्यः । | |
| ४ | | अपपातः | गर्ते यो भवितुमर्हति । | |
| ५ | | यूथगतः | स्वगणेन बद्धः भवति । | |
| १ | सान्नह्यः | उपस्थानम् | व्यायामार्थम् (यथा उत्थातुम्, अवनतुम्, रज्जोरुपरि, प्राकारस्योपरि वा | एतत्कृते शिक्षणविधित्रयं विहितं यथा कक्ष्याकर्म- कक्षस्य |

[282] Elephant Lord of the Jungle, page 82.
[283] कौटिलीयार्थशास्त्रे गजाध्यक्षाध्यायः; ।
[284] कौटिलीयार्थशास्त्रम् हस्त्यध्यक्षः/हस्तिप्रचारो नाम ३२त्तमोऽध्यायः द्वितीयाधिकरणस्य ।

| | | | | |
|---|---|---|---|---|
| | | | कूर्दितुमित्यादि) । | स्थाने रज्जुभिर्बन्धनम्, ग्रैवेयकर्म - ग्रीवायां रज्जुबन्धनम् यूथकर्म - अन्यशिक्षित गजैस्साकं तैः कार्यकारणम् । |
| २ | | संवर्तनम् | परिवर्तयितुम् (उपविष्टुं, शेतुं, गर्तानां रेखाणां वा कूर्दनं । | |
| ३ | | संयानम् | अग्रे गमनम् (ऋजुगमनम्, वक्रगमनम्..) | |
| ४ | | वधावधो | पादाक्रामणम् तथा निषूदनम् (अश्वान्, रथान्, पदातिदलान् भञ्जयितुम्) । | |
| ५ | | हस्तियुद्धम् | हस्तिभिः युद्धाय युक्तः । | |
| ६ | | नागरायणम् | नगराणां दुर्गाणां वा ध्वंसनम् । | |
| ७ | | साङ्ग्रामिकम् | सङ्ग्रामे योद्धुम् । | |
| १ | औपवाह्यः | आचरणः | उन्नीतपूर्वोत्तरपादैः नतपृष्ट-भागेन वन्यान् गजाननुगन्तुं शिक्षितः । | एषां गजानां शिक्षणार्थं पालनीयमंशत्रयं नाम शारदकर्म[285] हीनकर्म[286] नारोष्ट्रकर्म इति । |
| २ | | कुञ्जरौप-वाह्यः | अन्येन कुञ्जरेण नीयमानः बाधितः भवति अग्रे चलितुम् । | |
| ३ | | धोरणः | धोरयित्वा चलितुं पाठिताः । | |
| ४ | | आधान-गतिकः | विविधगतयः (पादाभ्यां, त्रि-पादेभ्यः वा) शिक्षयितुं शक्तः । | |
| ५ | | यष्ट्युपवाह्यः | दण्डेन चालयितुं शक्तः । | |
| ६ | | तोत्रोपवाह्यः | तोत्रस्य साहाय्येन चालयितुं शक्तः । | |
| ७ | | शुद्धोपवाह्यः | यः विना कषया चालयितुं शक्तः । | |
| ८ | | मार्गायकः | मृगयार्थं साहाय्यां करोति । | |
| | व्यालः | व्याळः इति विहितः गजस्तु एकेनैव विधानेन शिक्षितः भवितुमर्हति । एतस्य कृते दण्डः एव परिहारोपायः निग्रहीतुम् । एतस्य शङ्कास्पदविरतिः वर्तते कर्मसु, शठः, दुष्टचित्तः, सदा अस्थिरः, यथेच्छवर्तनं, दुष्टबुद्धिः मदावस्थायाञ्च । [287] | | |
| १ | | शुद्धः | सदा दुष्टः, अतिभयङ्करः, १८ दोषास्सन्ति । | |
| २ | | सुव्रतः | दौष्ट्येऽपि चातुर्यं प्रकटयति । पलायितुं सदासन्नद्धः । | |
| ३ | | विषमः | सर्वेषां दुष्टबुद्धिनां स्थानम् । | |

कोष्टकः - ३५

[285] अत्र यो गजः स्थूलः सः पीनः करणीयः अनाहारैः, यो पीनः स्थूलः करणीयः, यो निःशक्तः तस्मायाहारः प्रदेयः, यो रुग्णः तस्मै रोगोपचारः देयः इति ।
[286] यो कर्मणा व्यायामाद्वा हीनः इति ।
[287] क्रियाविपन्नो व्याळः ।

कालानुसारं, गजानां शारीरिकसामर्थ्यानुगुणं, तेषामवगमनं, गतिं च परिशील्य अन्यप्राणि -गुणानपि संवीक्ष्य गजेभ्यः शिक्षणं प्रदाय ते कार्ये नियोजनीयाः इति कौटिल्यः विषदयति ।

<u>*नीलकण्ठस्य मातङ्गलीलायाम्*</u>

अत्रापि गजानां शिक्षणमुक्तम् ।[288] ज्ञातव्यांशाः एवमुक्ताः-[289] गजाः - त्रिविधाः ; प्रणिधयः - तिस्रः ; गतिप्रक्रियाः - तिस्रः; प्रस्फुटमासनानि - त्रीणि, पुरतः - पञ्च ; पश्चात् - पञ्च ; अङ्कुशचालनं - षड्विधाः ; गतिगतभेदाः - पञ्चा ; आरोहणम् - अष्टविधम् ; अवतारक्रमः - दशविधः ।

त्रिविधाः गजास्तु पूर्वमेवोक्तम् यथा भद्र-मन्द-मृगश्चेति ।

प्रणिधिः पुनः त्रिविधम् - अत्र गजेभ्यः शिक्षणार्थं के के विधाः अनुसर्तव्याः नाम वाचा सूचनाभिः, पादाभ्यां पादेन वा, अङ्कुशस्योपयोगेन च ।

प्रथमं वाक्सूचनाः । वाचा गजशिक्षणं त्रिविधात्मकमित्युक्तम् ।[290]

१.उपलालनम्-गजाः यथा भीताः, क्रुद्धाः, दुःखिताश्च न भवेयुः तथा सुवचनैः लालनम् ।

२. प्रज्ञापनम् - गजाः यथा सम्यक् स्मरेयुः तथा पाठनं पाठितानांमंशानां स्मारणं वा ।

३. सन्तर्जनम् - अत्र गजानां शिक्षणार्थं तेषां ताडनं भर्त्सनं वेति ।

अत्र ज्ञातव्यः यद्यः आधोरः गजानां पालनं शिक्षणञ्च कुर्यात्सः प्रतिदिनं गजान् वाहयित्वा आदौ मौखिकवचनैरेव तस्मै गजाय सूचनाः दद्यात् । अग्रे विधत्रयं गजाः आधोराणकस्य वचनपरिपालनार्थम् यथा शब्दैः तेषां वाहनं, स्वपादाभ्यां, स्वाङ्कुशेनेति । गजाः एकस्यां भाषायां शिक्षणीयाः । संस्कृतवचनैः, प्राकृतशब्दैः,

---

[288] मातङ्गलीलायां १२तमः पटलः आधोरागुणाद्यधिकारः इति । अस्मिन् ३० श्लोकास्सन्ति ।

[289] आदितः पञ्चश्लोकाः आधोराणां वर्णयति । षष्टः श्लोकः गजानां विविधान् गुणान् सुलभतया यथा ग्राह्यं भवेत् तथा व्यवस्थापयति । मातङ्गास्त्रिविधास्त्रयः प्रणिधयस्तिस्रो गतिप्रक्रियास्त्रीणि प्रस्फुटमासनानि पुरतः पञ्चैव पश्चादपि । षड्भेदाङ्कुशचारणा गतिगता भेदाः पुनः पञ्चधा स्यादारोहणमष्टधा दशविधः प्रोक्तोऽवतारक्रमः ॥

[290] मातङ्गलीलायाः १२तमः पटलः अष्टमः श्लोकः ।

अन्यप्रान्तीयभाषाप्रयोगैर्वा, आधोराणकैः यथा कामप्येकां भाषामवगच्छेयुस्तथा गजाः पाठनीयाः ।

पाठनीयाः मौखिकादेशाः एवं सन्ति ।[291] हुं हुं (हुङ्कारद्वयं) - उपवेष्टुं, गृह्ण, गृह्ण - ग्रहणकर्मसु, उपर्युपरि - करोत्क्षेपणे, तिष्ठ तिष्ठ - स्थातुं, कर्म स्थगयितुं वा, एहि एहि - आगमने, गच्छ गच्छ - गमने, . . . . ।

एतस्यानन्तरं गजाः पाठनीयाः यत् गजारूढस्याधोरकस्य पादचालनेन कः आदेशः पालनीयः इति । पादचालनेन गजानां यन्त्रणमेवंविधाः - ग्रीवायाः निगडेषु पादयोः स्थापनं, पादाङ्गुलीभिः-पार्ष्णिप्रहारैः (दृढं बन्धितैः स्वाङ्गुलीभिः पार्ष्णिभिः स्थापितग्रीवः), ऊरुभ्यां दृढबन्धनैः (आधोराणकस्योरुभ्यां ग्रीवायां संस्थापनम्), पादचालनेन गजानां गतिनिर्वहणञ्चेत्येवं । तथैव अङ्कुशं दक्षिणे हस्ते, दण्डो वा वामे हस्ते ग्रहीतव्यम् । अत्र पुनः पादचालनविधानमपि स्पष्टीकृतम् । पुरोगमनाय द्वाभ्यामप्यङ्गुष्टाभ्यां दृढं नोदनीयः गजः । ऊर्ध्वं द्रष्टुं मुखमुत्थापयितुं तयोरेवाङ्गुष्ठौ ऊर्ध्वमुखौ भवताम् ।

तथैवाधोमुखं कर्तुमङ्गुष्ठावधोमुखिनौ भवताम् । दक्षिणदिक् भ्रमणाय वामाङ्गुष्ठेन नोदनं तथैव दक्षिणाङ्गुष्ठेन दक्षिणदिशिचोदनम्, (अस्य विपरीतं विरुद्धदिशि भ्रामणाय) । यदि वा सः पृष्ठतः कर्षणीयं चेत् (अग्रे गमनं वारणीयञ्चेद्वा) स्वपार्ष्णिभ्यां कण्ठप्रदेशे दृढं कर्षणं गजं स्थगयति ।[292]

एताभिस्सूचनैराधोरकस्य तावत् गजाः स्वाज्ञाः अवगच्छेयुः । एतैस्साकं अङ्कुश-दण्ड-अन्यस्य केनापिवा साधनेन साकं तेभ्यः शिक्षणं प्रयच्छेदाधोरकः । कोष्टकद्वारेणास्यावगमनमेवं । पादचालनैरपेक्षितानि कर्माणि गजैः -

| क्र | शिक्षकस्य पादचालनम् | गजैरपेक्षितम् कर्म |
|---|---|---|
| १ | अङ्गुष्ठाभ्यां कण्ठस्य दृढं निष्पीडनम् | पुरो गमनम् |
| २ | अङ्गुष्ठाभ्यां ग्रीवायाः | मुखमुन्नेतुम् |

[291] मातङ्गलीलायां १२तमः पटलः, ९ - १० श्लोकौ ।
[292] मातङ्गलीलायां द्वादशोऽध्यायः - १२तमः श्लोकः ।

| | | |
|---|---|---|
| | ऊर्ध्वमुखनिष्पीडनम् | |
| ३ | अङ्गुष्ठाभ्यां अधोमुखनिष्पीडनम् | मुखमवनतुम् |
| ४ | वामपादाङ्गुष्ठेन निष्पीडनम् | वामपार्श्वं गन्तुम् |
| ५ | दक्षिणपादाङ्गुष्ठेन निष्पीडनम् | दक्षिणपार्श्वं गन्तुम् |
| ६ | पार्ष्णिभ्यां बलेनाघातः | चलन्तं गजं स्थगयितुं, पृष्ठभागे गन्तुम् । |

कोष्टकः - ३६

त्रिविधाः गजानां गतयः - मन्दगमनं, शीघ्रगमनं, धावनञ्चेति । अत्र पुनः पञ्चान्यविधगतयः उक्ताः यथा पुरोगमनं, पृष्ठतः आगमनम्, वृत्ताकारे चलनं, कुटिलमार्गे गमनं, भ्रमणञ्चेति ।

ककुद्युपवेशनमासनमित्युक्तम् । अत्र पुनः त्रिविधानि - प्रसार्यपादद्वयं, द्वितीयं नाम अर्धजानुकं, तृतीयं तु उपवेशनमिति ।

उपवेशनस्य पञ्चविधाः - वंशभागस्य उभयतः पादयोः निःस्स्थापनं, जानुभागे उभयोरपि पादयोराकुञ्चनं, जानुद्वयमपि उन्नतं कृत्वोपवेशनम्, पुनः कूर्म मण्डूकवदन्य द्वयमिति ।

अङ्कुशस्य [293] चालनं षड्विधमित्युक्तम् - वितानयोः, विदौ, ग्रीवायां, निर्याणद्वयोः मस्तकस्य कुम्भयोः, अवग्रहे च अङ्कुशस्य प्रयोगः युक्तः ।

इदानीमङ्कुशचालनेन गजैः कानि कानि कर्तव्यानि भवन्तीति ।

| क्र | अङ्कुशचालनम् | अपेक्षितं कर्म |
|---|---|---|
| १ | पुरो गमनाय | व्यधनं मुखभागस्य पुरोभागे |
| २ | पृष्टतो गमनाय | अधोदिशि कण्डूयनम् |
| ३ | उत्थातुम् | उपरिदिशि कण्डूयनम् |
| ४ | अधः भवितुम्, उपवेष्टुम् | अधोदिशि किञ्चिदिव तोदनम् |
| ५ | वामतः गन्तुम् | मुखस्य दक्षिणभागे व्याधनम् |

[293] अङ्कुशः ब्रह्मसृष्टिरिति कथिता नागानां यन्त्रणार्थम् । स्कन्दस्यापेक्षानुसारं ब्रह्मणा सृष्टः । कुशवदङ्गितः तीक्षणग्रः अयं अतः एव अङ्कुशः इति कथितः । चत्वारः अङ्कुशविधाः यथा वज्र, अर्धचन्द्रनख, केतकी कण्टकवदिति । श्लोकावेवं मातङ्गलीलायांद्वादशपटले ।
नागैरुद्धतकायसत्त्वविभवैस्तीक्ष्णप्रतापैर्जगद् व्यापन्नं नितरां समीक्ष्य कृपया स्कन्दार्थनाग्ब्रह्मणा ।
कश्चन पूरुषः स तु रुषा. . . .क्तान्तदृग् दंष्ट्रेयाभात्युद्यन्मुकुटः कुशाङ्कितकरस्तेनाङ्कुशाख्योऽह्ययम् ॥ १७ ॥
वज्रार्धचन्द्रनखकैतककण्टकाभाश्चत्वार एव सृणयो विहिता मुनीद्रैः ।
आविश्य तासु पुरुषः स्थितवानयं हि मत्तातिदुष्टगजसंयमनाय नित्यम् ॥ १८ ॥

| | | |
|---|---|---|
| ६ | दक्षिणतः गन्तुम् | मुखस्य वामभागे व्याधनम् |

कोष्टकः - ३७

पुनरेषामङ्कुशानां चालनं षड्विधम् यथा - स्पर्शः, तोदनं, बलाघातः, उत्क्षिप्य सम्पीडनम्, उत्क्षिप्य परिकर्षणम्, उत्क्षिप्य भ्रामणमिति । अत्र पुनः अङ्कुशस्य कियान् भागः गजं प्रविशेदिति प्रश्नः उद्भवति यस्य अर्धाङ्गुलीप्रमाणकं प्रवेशः उक्तः प्रथमस्य इत्येतदेवोत्तरम्। परं तोदनोत्तरं गजयन्त्रणाय पूर्णाङ्गुलीप्रमाणकाङ्कुश-प्रवेशस्त्वपेक्षितः । कैश्चिदोषधि- प्रयोगैरङ्कुषेषु गजयन्त्रणाय सुकरं भवति । [294] गजस्य पार्श्वयोः, निष्कोषद्वयोः, वालमूले इति पञ्चविधगदाप्रयोगाः ।

गजारोहणक्रमाः अष्टविधाः यथा - कर्णाभ्यां, चतुष्पादैः, मुखेन शुण्डेन वोत्क्षेपेण च। गजमनुसरन् गजस्य पृष्टभागतः तस्यारोहणमुत्क्षेपणमिति ।

परं गजावरोहणं दशविधमुक्तम् - वालस्य साहाय्येन, पादानां, मुखस्य, पार्श्वयोः, कर्णयोश्चेति ।

*गजशास्त्रग्रन्थयोः*

पालकाप्यगजशास्त्रग्रन्थयोः एकस्मिन् ग्रन्थे केवलं गजशिक्षणविचारः उपलभ्यते । विचित्रं नाम गजशात्रे (व्यास) ग्रन्थेऽस्योल्लेखः न दृश्यते एव । [295] पालकाप्यगजशास्त्र (त) ग्रन्थे अस्मिन् विषये बहवो अंशाः उपस्थापिताः । अस्य ग्रन्थस्य दशमप्रकरणस्यादौ आसनलक्षणम् इति अध्यायभागः दृष्टः । आसनमुत्कृष्टं, मध्यमं,अवकृष्टम् इति त्रिविधम् ।

---

[294] माधकपुष्पमधुकालवचाश्वगन्धाबिल्वं पलाण्डुमरिचं च समं सुपिष्ट्वा ।
गोमूत्रकेण परिलेपितमङ्कुशाग्रे यस्तेन चोदित इभः स वशं प्रयाति ॥
कोशातकीक्षारकटुत्रयालसिद्धार्थकारुष्करचूर्णमेतत् । तिक्ताग्वसिन्धूत्थविलङ्गयुक्तं सृणिप्रलिप्तं गजवश्यमाहुः ॥ शतपदीकृकलासशिरःशिलातुरगपित्तमृगाङ्गरुहैः कृतम् । भुजगकञ्चुकवृश्चिकसंयुतैः सृणिषु लेपमनेकपदर्पहृत् ॥ २२-२४ श्लो. १२ पटलः, नीलकण्ठस्य मातङ्गलीला ।

[295] पालकाप्यस्य (व्यास) गजशास्त्रे नवदशाध्यायास्सन्ति । अत्रापि आसनलक्षणकथनम् (अत्र पुनः केवलं श्लोकत्रयम्) एवान्तिमं प्रकरणम् । विशेषो नाम पालकाप्य गजशास्त्रे (त) ग्रन्थे गजशास्त्रविषयाः अनुवर्तन्ते । इतः अग्रे आसनलक्षणम् (१२ श्लोकाः), सृणिप्रणिधयः, पादप्रणिधयः, वाक्प्रणिधयः, दन्तच्छेदकालादिकथनम्, दन्तच्छेदे अङ्गुलवर्षभेदः, दन्तच्छेदनसाधनम्, दन्तच्छेदन-प्रमाणम्, दन्तच्छेदननियमः, दन्तकल्पनानां शुभतिथयः, दन्तच्छेदवर्णफलम्, दन्तच्छेदगन्धफलम्, दन्तच्छेददृश्यमानाकारफलम्, दन्ताघातलक्षणम्, मदशोभालक्षणम्, मदावस्थालक्षणम्, वाह्यालिप्रकरणम्, गजविनोदविधिः, सृणिघातलक्षणम्, इति भागैर्युक्तः वाह्यालीलक्षणं नाम दशमं प्रकरणं वर्तते ।

गजानां यन्त्रणार्थं प्रणिधित्रयमुक्तम् । ते यथा अङ्कुशस्य, पादयोः वाचश्चेति । एतत्सर्वमपि क्रमशः कोष्टकद्वारेण ज्ञातुं शक्यते । प्रयोगस्य विधाः एवं भवन्ति -

| | | | | |
|---|---|---|---|---|
| अङ्कुशः | ईषत्संस्पर्शनम् | प्रणिधानं | पीडनं | दृढघातनम् |
| पादयोः | अङ्गुष्ठः | उत्सङ्गः | उत्सङ्गाधः | पार्ष्णिः |
| वाचः | उपलालनम् | सज्ञापना | सन्तर्जना | - |

कोष्टकः - ३८

सृणिचालनम् - चतुर्विधसृणिचालनमुक्तम् । ईषत्संस्पर्शनं, प्रणिधानं, पीडनं, दृढघातनमिति । प्रथमे तु अङ्कुशः गजस्य मस्तके अर्धाङ्गुलिपरिमितं प्रविष्टश्चेत् तदीषत्संस्पर्शनमिति कथितम् । विधेयानां गजानां प्रणिधानं नाम घातः क्रियते । पीडितको नाम द्वित्र्यङ्गुलप्रमाणः, दृढघातकश्चेत् द्वाभ्यामपि हस्ताभ्यां रोषेण सन्ताडनं घातनं वा । अङ्कुशस्य प्रयोगः पुनः द्विविधं यथा क्षिप्तम्, अति/प्रतिक्षिप्तमिति । अग्रे प्रसरणञ्चेत् प्रथमं पश्चाच्चेद्द्वितीयमिति । अङ्कुशस्य प्रयोगः उभयोरपि पार्श्वयोः ।

द्वितीयन्तु पादप्रणिधिरित्यत्र पादद्वयोः गजस्य नियन्त्रणं कथं भवेदिति । अस्य चतुर्विधाः । पुरः गन्तुं गजं अङ्गुष्ठाभ्यां बलेन पीडनीयम् । पार्ष्णिद्वयोः पीडितश्चेत् सः गजः स्वकार्यं स्थगयेत् । वामेनाङ्गुष्टप्रयोगेन गजः दक्षिणदिशि पदं कुर्यात्, दक्षिणेन क्रियते चेत् वामदिशि गच्छेत् । गजं अधोमुखं कर्तव्यञ्चेत् अङ्गुष्ठाभ्यामाननस्याधोभागे पीडनीयमधोदिशि, तथैवोर्ध्वमुखं विधातुम् अङ्गुष्टमपि ऊर्ध्वमुखस्य दिशि प्रेरयेत् ।

वाचाज्ञापालनं वाक्प्रणिधिर्भवति । गजः भीतश्चेत्, कुपितश्चेत् यत्सान्त्वनं क्रियते वाचा तदुपलालनम्। यदि वा गजः शिक्षितं कर्म न क्रियते चेत् तदा तं तत्कर्म ज्ञापयितुं द्वितीयं संज्ञापनस्योपयोगं करणीयम् । यदि वा गजः विपरीतप्रवृत्तिः, शब्दान्

श्रोतुं नाभिवाञ्छति तदा सः भर्त्सनीयः इति निश्चित्य सन्तर्जनेति तृतीयस्य प्रयोगः युक्तः ।[296]

गजशिक्षाग्रन्थे - गजानां पोषणं शिक्षणञ्च गजशिक्षायाः अतिप्रमुखः विचारः । अस्याः कृतेः नाम एव सूचयति यदस्याः उद्देशः एव शिक्षेति । अस्याः कृतेः षष्ट-नवमपटलौ च विचारमेनं प्रतिपादयतः । अस्याः नवमे पटले आदौ द्वितीयवर्षतः दशमवर्षपर्यन्तं गजानां गजशिशूनां वा संवर्धनं स्वभावादिकं वोक्ताः । एतत्समनन्तरं तेषां शिक्षणस्य विविधसोपानानि वर्णितानि । अत्र गजेभ्यः प्रदातव्यस्य शिक्षणस्य सप्तसोपानानि कथितानि । प्रथमं सोपानं नाम प्रारम्भशिक्षा, द्वितीयं खेलनशिक्षा च । द्वेऽपि शिक्षे चतुर्षुसु वर्षेष्वेव प्रदातव्ये । पञ्चमे वर्षे प्राप्ते तेभ्यः धावन-शिक्षा प्रदातव्या । परमितः परमियं कृतिः न लब्धेति कारणेन गजशिक्षाविषये अन्यत्किमपि न ज्ञातम् ।

इन्द्रांशक-अग्न्यंशक-धर्मांशक-वरुणांशक-कुबेरांश-शङ्करांशक-पवमानांशक-गन्धर्वांशक-किन्नरांशक-यक्षांश-विष्णवंश-ब्रह्मांश-चन्द्रांश-मुन्यंश-नृपांश-मानुषांश-भासुराः गजाः एव शिक्षणीयाः । एते अति योग्याः शिक्षयितुम् । वनात्प्राप्त्यनुसारं ते शिक्षणीयाः । सौवीर-कोसल-विन्ध्यवनेषु जाताः यद्यप्येतानंशान् न वहन्ति तथापि ते प्रकृत्या योग्याः, शान्तमनस्काः, दोष-मुक्ताः, कोपादिकुचेष्टाद्दूराः, मनुष्यैस्साकं जीवितुमिच्छुकाः, सुलभतया शिक्षणीयाश्च गजाः ।

शिक्षितुं मध्यमस्तरीयाः गजाः नाम पित्रंशक-विहगांशक-मत्स्यांश-लतांश-कुसुमांशकाः।[297] एते पुनः मधुरवाग्भिः, जात्यनुसारं शिक्षणीयाः । एते गजाः अन्यस्तरीयैर्गजैः न मिश्रणीयाः । एते गजाः अत्यन्तप्रामुख्ययुक्तकार्येषु यथा मृगया-

---

[296] गजशास्त्रे (त) ग्रन्थे दशमप्रकरणस्य प्रथमतः २९श्लोकपर्यन्तम् ।

[297] अस्य व्यक्तिटिप्पण्याम् पृष्टसङ्ख्या ८०-८१ मध्ये उक्तं 'स्वगजशालायां जनिताश्चेत्तदा एतादृशगजानपि युक्ता गजपालादयः....' इत्यादि विचाराः उपस्थापिताः । आधुनिककाले गजानां प्रसवं मानवपरिसरेषु न भवतीति सामान्यतः विदितमस्ति । मानुषपरिसरे गजप्रसवमतिकष्टकरं, त्रासदायकमित्याधुनिकप्रयोगाश्च कथयन्ति । तर्हि कथं गजशिक्षायामेवमभिप्रायः इति चिन्तने अस्मिन् क्षेत्रे पुनः नवीकृतसाहसः कश्चन करणीयः इति भासते । अत्रायमप्याशयस्स्याद्यत् 'स्वगजशालायां जनिता' नाम गजशालायां वर्तमानायाः गर्भिणीभूतकरेण्वाः पोतः इत्यपि ग्रहीतुं शक्यते ।

युद्धार्थं, दुर्गद्वाररक्षणमित्यादिषु न योजनीयाः । यदा एते गजाः अनियन्त्रिताः, दोषयुक्ताश्च भवन्ति स्वाङ्गभावात्, ते पुनः केवलमङ्कुशानां दर्शनैरेव भाययित्वा शिक्षणीयाः । यद्यप्येते गजाः मनुष्यवत् भाषितुं न शक्नुवन्ति, हस्तिपानां वचनानि अवगम्य तथा कुर्वन्ति चेत्तत्त्वभिनन्दनीयमेव भवति । एवं राजानं, अधोराश्च गजानां वयः, बुद्धिमत्ता, चातुर्यं, भावः, स्वभावादिकं ज्ञात्वैव तेभ्यः योग्यं शिक्षणीयं प्रदाय तैः कार्यं कारणीयं भवति ।

राजा शिक्षणीयगजानां विषये सम्यग्जानीयात् । केचन गजाः शिक्षणावसरे नीचस्वभाविनः भूत्वा मूर्खकारणैश्च बहुहेयकार्ये निमग्नाः भवन्ति यथा आधोराणानाम् मारणमित्यादि । अन्ये केचन अङ्कुशादिचलनं हस्तिपानां, शिरसि न सहन्ते । केचन शीघ्रकोपिनः गजाः यदा कुपिताः सान्त्वनवचनैः न समाश्वासिताः भवन्ति। अतः तादृशाः गजाः ये शठाः, नीचमानसाश्च न शिक्षणियाः आदावेव निवारणीयाः । ये गजाः स्वभावतः एव महाचतुराः, बाल्यारभ्यैव रोग-ग्रस्ताः, भीताः, महदायासकर-कार्यकरणसन्दर्भेषु भीरवः, सर्वदा बहुपीनाङ्गाः, कुब्जाः, स्वमूत्र-शकृद्गन्धमेव जिघ्रन्ति, मनुष्यगन्धं न सहन्ते, आधोरणस्यादेशमपरिपाल्य विपरीतमाचरन्ति, नाभिनन्दन्ति अङ्कुशचालनं-सन्ताडनञ्च, राक्षस-असुर-वानर-शार्दूल-सिंह-पिशाचांशक-गजाश्च वा न शिक्षणीयाः।

एतैस्साकं ये गजाः अत्यभिमानिनः, महाहङ्कारयुताः, अनभिज्ञाताः, अनवधानिनः राज्ञामाधोरकाणाञ्च वचनेषु, तेऽपि निवारणीयाः । ये शिक्षणावसरे नीच-वञ्चक-कृतघ्न-अलसबुद्धयश्च, म्लानवर्णदन्ताः, भग्नदन्ताः, भिन्नखाः, ह्रस्वशुण्डाः, ह्रस्ववालधराः, रक्ताक्षाः तेऽपि त्याज्याः । ते गजाः अवराः ये कामान्धाः, ककाक्षाः, वानराक्षाः, भल्लूक-वदादेहे केश-युक्ताः, भयानकशब्दोत्पादकाः, ह्रस्वशिरोभागाः, असन्तुलितशिरोभागाः, गजशावकानां मृगाणाञ्च भायकाः, दुष्टाः, दुष्टकार्यासक्ताश्च । बुद्धिमान् हस्तिपो योग्यायोग्यान् गजान् सम्यग्ज्ञात्वा शिक्षणावधौ तान् पार्थक्येन

शिक्षयेत् । एते गजाः यथा शिक्षणीयान् गजान्, अन्यान् गजान्, हस्तिपान्, सहायकाञ्च न बाधयेयुः तथा व्यवस्था भवेत् । [298]

अत्र नारदस्य दृष्ट्या गजाशिक्षणविधानं कथं भवेदिति सम्यक्चित्रितम् । प्रशिक्षणेन साधनीयाः एते - १. राजा, गजः, गजकार्यसम्बन्धिनः सर्वे स्वकार्येषु यशस्विनः भवेयुः ।

२. गजाः अपि तावदानन्दितास्सन्तु ।

३. गजाः अपि स्वशक्त्या विश्वासमानन्दञ्च लभेरन् ।

४. मनुष्याणां सेवया, तैः प्राप्तशिक्षणाभिः जन्मसाफल्यञ्च प्राप्नुयुः ।

विना शिक्षणं, गजाः अरण्ये व्यर्थतया सञ्चरेयुः मूर्खाः इव । विनान्येषामुपयोगाय, देवानां राजानां वा असंसेव्य जीवितव्यातर्थ्यञ्च भजन्ते एते । अतस्ते गजाः मनुष्यैर्गृहीताः प्रशिक्षिताश्च स्वजीवनसाफल्यञ्च साधायेयुरिति कृतिकारस्याभिलाषः। [299]

गजशिक्षणं सप्तविधम् । गजाः स्वजन्म-जन्मस्थल-जाति-चातुर्य-स्वभावानाम् अनुसारमेव शिक्षणीयाः । एतेषां निर्धारणोत्तरं गजशिक्षणं कस्मिञ्चिद् शुभे दिने आरब्धव्यम् । हस्तिपाः स्वनित्यकर्माणि समाप्य गजान् हस्तिशालायाः समभूमिं पुरोभागाञ्च नयेयुः । मृदुमृण्मये विशाले च तत्प्रदेशे गजाः पङ्क्तौ संस्थाप्य सर्वेऽपि सप्तहस्तिशिक्षकाः स्वस्थानग्रहणं कुर्युः सर्वानपि दिग्गजान्नत्वा । तदुत्तरं ते शिक्षणीयाः गजाः सुवचनैः, मृदुमधुरोदारैर्वचनैश्चादौ, सृणेस्सन्धारणमित्यादयश्च पाठनीयाः । काम्बोज-काश्मीरदेशजाताः तृतीयवर्षादिव प्रशिक्षितव्याः । [300] आदौ अङ्कुशमेकस्मिन्नेव कर्णे, क्रमशः द्वयोरपि संस्थापयन्, जनानां दर्शनेन अभीतिः, हस्तिपानां शिक्षकाणां वा आदेशज्ञानं पालनञ्च, मृदुवचनैः शीघ्रतयैव प्रसन्नता, विविधेषु सन्दर्भेषु अवहितता, शयन-निद्राविधानं, उत्थानं, नियन्त्रितनिद्राकरणं,

---

[298] गजशिक्षायां नवमः पटलः, श्लोकाः ४८ तः ५५ पर्यन्तम् ।
[299] गजशिक्षा, नवमः पटलः, श्लोकाः ५६ तः ५९ पर्यन्तम् ।
[300] कारणं किमित्यत्रानुक्तम् ।

स्वशुण्डस्य स्वाङ्गुल्याश्च उपयोगः (यथा प्रसरपतिसरश्च) भयंविना (विश्वासं जनयितुम्), क्रिडास्वभावाः स्नानकाले, प्रशिक्षणस्य श्रान्ततां सोढुम्, आहारसेवनक्रमः, इत्याद्याः आरम्भिकशिक्षाद्वारेण पाठनीयाः । [301]

यदि गजः अज्ञानं चाञ्चल्यं वा प्रदर्शयति शिक्षणकाले, तेषां कृते शिक्षा दातव्या । गजशिशवः आदौ वाचा एव स्मारणीयाः । केचन अङ्कुशदर्शनेन, अन्ये केचन तेषां प्रयोगेन वा पालनीयाः । गजाः ताडनलालनतर्जनाद्यैः क्रमैः शिक्षणीयाः । प्रथमस्तरस्य शिक्षणानन्तरं तेषां खेलनशिक्षाक्रमः चिन्तनीयः । चतुराधोरकस्तु चतुर्वर्षीयं गजं विविधाः क्रीडाः पाठयेद्यतो हि तेषां किञ्चिदिव प्रौढता भवति । क्रीडनेन गजाः बहु बुद्धिशालिनः भवन्ति, तेषां देहसन्धयः इतोपि शक्तिशालिनश्च भवन्ति । तेषां शिक्षणार्थमेते क्रमाः पालिताः। नवगृहीताः गजाः एताभ्यः अपेक्षितक्रियाभ्यः शिक्षणीयाः - [302]

१. आलानबन्धः - आलानबन्धनं ते सहेरन् ।

२. स्वदत्ताहारस्वीकारे एव अभिलाषाबन्धनम् - हस्तिपैर्दत्ताहरमात्रसेवनम् ।

३. .कोपनिचीकरणम् - कोपनिग्रहणं कृत्वा तथा वर्तितुं पाठनम् ।

४. श्रमसहनम् - अतिभारवहनात्, कर्षणात्, श्रमकार्यश्रान्ततां सोढुं शिक्षणम् ।

५. निर्दिष्टमार्गे एव गमनागमनम् -

६. पुरुषादि प्रत्यन्तरादीन् प्रति तर्जनादिविरतिः - अन्यान् मनुजान् पशून् च यथा न पीडयेद्गजः तथा तस्य अभ्यासकरणम् ।

७. यन्त्रवचोऽनुकरणम् - हस्तिपानां आज्ञापालनस्य अनुशासनं वचोभिः साधनैर्वा ।

८. युद्धादिसाहसकार्येषु अभीरुत्वम् ।

---

[301] एतादृशी आरम्भविद्या मुहूर्तक्रमादिना उपदेश्या ।
[302] गजशिक्षायाः व्यक्तिटिप्पण्यः षष्ठः पटलः ।

हस्तिशिक्षाविधानम् - महति कस्मिंश्चित् प्रदेशे गजशालायाः पुरतः ५ - १० गजाः हस्तिपैस्साकं पङ्क्त्यां स्थापनीयाः । विविधवर्णकरेखाः समालिख्य गजाः ताः यथा पारयेयुः तथा ते बोधनीयाः । ते तामेव रेखां मर्दयन्तः पुरतः गच्छेयुः हस्तिपेन पुरस्तात् निर्दिष्टाः । एकस्मात् प्रदेशात् अन्यं प्रदेशं प्रति, तस्माद् पुनरपि स्वस्थानं प्रत्यागमनं, पुरतः गत्वा प्रत्यागमनं पृष्टतः चलनं कृत्वा च बोधनीयम् । एवमेव ते पूर्वस्यां दिशि तथैव प्रतीच्यां, दक्षिणस्यामुत्तरस्यां च दिशि चलनीयाः । एतस्योत्तरं कोणदिक्षु यथा आग्नेय-नैरुत्य-वायव्यैशानदिक्षु सञ्चारणीयाः क्रमानुसारेण । तेषां क्रीडनन्तु अधोदत्तविधानैः भवितुमर्हति -

१. स्वशुण्डमुन्नीय राजानं प्रति गम्यं प्रत्यागमनम् वा।

२. पुरोगमनं विशिष्ट-विभिन्नशब्दैः ।

३. नमस्कारं कुर्वन्नेव अग्रे गमनम् ।

४. क्षणकालपर्यन्तं स्थगनं, विविधविधानैः पुरोगमनम् ।

५. पुरोगमनं तथैव पृष्टतः प्रत्यागमनम्

६. मन्दगतौ, द्रुतगतौ, उभयगत्योश्च गमनम् ।

७. वामतः दक्षिणतश्च गमनम् (विना वृत्तम्) ।

८. वेगगमनं शुण्डमुन्नीय ।

९. दूरस्थितेन मित्रेण साकं मेलितुं शिघ्रगमनमित्यादि । [303]

अग्रे पञ्चवर्षीयगजानां शिक्षणम् । एतस्याः नाम धावनशिक्षा । एतत् न सर्वेभ्योऽपि गजशिशुभ्यः परं राज्ञानुमोदितेभ्यः एव । एवं धावनेन तेषां मानसिकस्थैर्यवर्धनं जायते । अधिकश्रान्तिं सोढुं, शरीरस्य गात्रविस्तारार्थमपि इदमुपयोगाय भवति । क्रीडनाय, स्पर्धार्थं, वने चरितुं, मृगयार्थञ्च इदमुपयोगाय

---

[303] गजशिक्षायां व्यक्तिटिप्पण्यां पृष्टसङ्ख्या ७९-८० ।

सम्पद्यते । इदमभ्यासः बलशालीगजेभ्यः केवलं न बलहीनेभ्यः यतो हि अपरेभ्यः शिक्षणेनास्य ते मध्येमार्गं पतेयुः, भीतिः, पराजयः,

उत्साहभङ्गः, भग्नावयवाः, वेपथुरित्यादीनि उत्पद्येत ।

मनुष्यवासाद्दूरस्थे स्थाने मृदुमृद्युक्तायां समभूमौ सहस्रदण्डानां विस्तीर्णायां (कदाचिद्विसहस्र-दण्डविस्तीर्णायाम्) अष्टस्वपि दिक्षु सीमानां निर्देशः करणीयः । इयम् गजघाटीति कथ्यते । गजानां वेगयन्त्रणार्थं अदृढभित्तयः, रज्जुबन्धनानि, प्राकाराः वा निर्मातव्याः । न केवलं वेगयन्त्रणमपि तु गजाः सीमापारं न कुर्युः इति विचिन्त्यायं क्रमः आयोजनीयः । यथा विविधेषु प्रान्तेषु दृश्यते गजाः केषुचिद्दिनेषु मासेषु वा शिक्षणीयाः । धावनम् वेगगमनम्; अतिवेगगमनम् गजघाटीति प्रसिद्धम् ।[304] अतः इदं शिक्षणं प्रभाते एव भवेत् । एतेन गजस्य शरीरमनसी च तृप्तौ च भवतः । एका घाटी नाम एकस्मात् स्थानात् अन्यत् स्थानं प्रति गमनं शक्त्यनुसारेण । द्विघाटी नाम एकस्मान्निर्गत्य द्वितीयं स्थानं सम्प्राप्य विनाविश्रान्तिः पूर्वस्थानं प्रति प्रत्यागमनम् ।

पणविजयम् इति द्वितीयोभागः । अस्यकृते केषाञ्चनदिनानां मासानां वा शिक्षणम् अवश्यकं बलयुतगजानाम् । अङ्कुशप्रयोगेन गजाः वेगेन धावेयुः घाटीमप्यतिक्रम्य द्विघाटी पर्यन्तम् । एतत्समनन्तरमारभेत तृटितघाटी - यत्र गजाः स्वगम्यं संप्राप्य विनूतनोत्साहेन स्वस्थानं निवर्तयेयुः । अत्र पुनः गजाः निर्दिष्टपङ्क्त्यामेव चरन्तः एवं क्रमणं कुर्युः । एवमेव चतुर्षुश्वपि दिक्षु गजाः सञ्चारं कुर्युः । गजाः मण्डलाकारे द्विवारं त्रिवारं वा चलेयुः यस्य नाम क्षणधावनघाटीति । आदौ वामतः मन्दं गच्छन्तः दक्षिणं प्रति दृतपदाः भवेयुः । तथैव दक्षिणतः मन्दं गच्छन्तः वामं प्रति शीघ्रगामिनः वा । अस्यापरं नाम क्षणघाटीति ।

प्लुतगमनमित्यस्याभ्यासे मन्दगमनेन साकं शीघ्रगमनं, शीघ्रगमनेन साकं मन्दचलनं, शुण्डमन्तर्नीत्वा धावनमित्यादीनामभ्यासः कारणीयः । अत्यन्ततया

---

[304] गजशिक्षायाः व्यक्तिटिप्पण्यां प्.सं. ८१ ।

महत्त्वपूर्णमिदं यदस्यां क्रीडायां गजाः वा आधोरणाः वा कदापि अव्रणिताः भवेयुः ।[305]

गजशिक्षणं गजशास्त्रयोः

उभयोरपि गजशास्त्रग्रन्थयोः गजशिक्षणविषये एकोऽपि बिन्दुः न दृश्यते इत्यत्याश्चर्यकरोऽयम् । आहत्य गजशास्त्रयोः गजस्य गुणागुणत्त्वमुक्तं परं न तेषां शिक्षणम्, शिक्षाक्रमो वा ।

*गजशिक्षणं मानसोल्लासे - (गजवाह्यालीविनोदः)*

सोमेश्वरग्रथितमानसोल्लासस्य गजवाह्यालीविनोदः इति भागः गजानां शिक्षणं क्रीडनञ्च ब्रवीति ।[306] अस्मिन्नध्याये श्रेष्ठगजानां परीक्षणं, सञ्चयनं, तेषां शिक्षणञ्च वर्णितम् । शुभे दिवसे, शुभे स्थाने, उत्तरस्यां दिशि गजान् संस्थाप्य, ब्राह्मणैः स्वस्तिवाचनं कारयित्वा, राजा स्वयं धृतनियमः तान् गजान् प्रपूज्य सामभिः तान् स्तुत्वा शिक्षणस्य प्रारम्भं कारयेत् । निगडसंयतं गजं परितः सप्तहस्तिपाः तिष्ठेयुः त्रयः पुरतः, द्वौ कर्णयोः पार्श्वे, द्वौ पृष्टभागे च । उभयोरपि पार्श्वे सुशिक्षिताः करेणुद्वयं च संस्थापानीयम् । यथानियमं सर्वेऽपि शिक्षकाः अङ्कुशधरिणः एव भवेयुः ।[307] गजानां शिक्षणात्पूर्वं तेभ्यः निश्चितः कश्चनाहारक्रमः पालनीयः । तेभ्यः वाचा प्रथमं, कर्मणानन्तरं शिक्षणं प्रदातव्यम् । हस्तिपः विनालस्यं गजस्य पूर्णतया निग्रहणार्थमादेशैस्सह शिक्षणं दद्यात् । तन्निमित्तमादेशवचनान्येवं भवितुमर्हन्ति -[308] सिञ्च - उपविश, भीरिह - स्वशुण्डमुन्नेतुम्, भले भले - शरीरमुन्नेतुम्, मा मा - किमपि कर्म वारयितुम्, लेच लेच - मन्दं गन्तुम्, इच्चभूभा - गजमाकारयितुम्, हेडे हेडे - वस्तुनः ग्रहणार्थम्, फा फा - उभयत्रापि चलनार्थम्, नुह् नुह् - उत्थातुम्, वप् डिहर वप् डिहर - स्वशुण्डं ग्रहीतुम्, हिज्ज हिज्ज - स्तम्भमाश्रयितुम्, किह् किह् - नमनं कर्तुम्, दे दे - प्रष्टुम्, हे हय्या हे हय्या - सुशुण्डेन ताडयितुम्, द्विः द्विः - दत्तमाहारं

---

[305] इतः परं हस्तिशिक्षायाः भागाः अनुपलब्धाः ।
[306] मानसोल्लासस्य द्वितीयविंशतेः तृतीयाध्यायस्य गजशिक्षानिरूपणं नामाध्यायभागः, श्लोकाः २८२ तः ३३१ पर्यन्तम् ।
[307] मानसोल्लासस्य द्वितीयविंशतेः तृतीयाध्यायस्य २८९तमः श्लोकः ।
[308] मानसोल्लासस्य द्वितीयविंशतेः तृतीयाध्यायस्य श्लोकसङ्ख्या २९१ तः ३०० पर्यन्तम् ।

भोक्तुम्, चुरु चुद - गृहीतं वस्तु परित्यक्तुम्, हिग हिग - स्वदन्ताभ्यां भूमिं ताडयितुम्, हु हु - स्वशुण्डं क्षेप्तुम्, घे घे - किमपि वस्तु ग्रहीतुम्,

इति अनेके वाचादेशाः प्रदत्ताः ।

इयं गजशिक्षकाणां प्राथमिकभाषा । भाषाभ्यासानन्तरं तेभ्यः विविधक्रिया-कर्माणामभ्यासः कारणीयः । आदावङ्कुशप्रयोगेण पौनःपुन्येन, तदुत्तरकाले तद्विना तेषां शिक्षणमवश्यकं येन सः गजः स्वशुण्डमपाकृष्य तूष्णीकः एकत्र तिष्ठेत् । तस्य कण्ठभागस्य समीपं तिष्ठन्तौ द्वौ हस्तिपौ तस्य चिबुकप्रदेशयोः अङ्कुशप्रयोगं कुर्येतां यदा सः तूष्णीकः । अनेन सः कण्ठमुन्नीय तिष्ठेत् । इदानीम् कर्णयोः पार्श्वयोः स्थितवुभावपि अङ्कुशप्रयोगं कर्णमूले कुर्येतां येन स गजः कर्णावपि उन्नीय तिष्ठेत् । पुरतः स्थितैः हस्तिपैः यदि अङ्कुशेन पुरोभागे तुदिताः सः गजः स्वाभाविकतया पृष्टभागं गच्छति । परन्तु पृष्टभागे स्थितौ हस्तिपौ तं पुनः अङ्कुशेन तुदेतां येन सः पृष्टतः अपि न गच्छेत् । एवं क्रमेण सः गजः एकत्र स्थिरं स्थातुमभ्यस्तः भवति ।

एतदेव कर्मानुवर्तयन्तः घृतबस्त्रिकायाः साहाय्येन गजः स्वशुण्डेन तस्याः भञ्जने शिक्षणं प्राप्नुयात् । गजः स्वशुण्डस्य बहिर्भागादन्तर्भागाच्च यथा तद्भञ्जनं कुर्यात् तथा शिक्षणीयं व्यवस्थापनीयञ्च । विद्यमानाः अनेकाः घृतभस्त्रिकाः खण्डयन् तत्सर्वमपि मर्दयन् तिसृणां चतसृणां च नाशमपि कुर्यात् । एवं स्वशुण्डादण्डेन सैनिकान्, गजानश्वान्वा प्रभञ्जयितुं गजानां शिक्षणं प्रदेयम् । एतस्मादुत्तरमाहारस्वीकारक्रमः पाठिताः भवेयुः ।

*धारणे विगताशङ्कं धारयेल्लोचनैर्विना।*

*स्वाङ्गं च विधृतं यत्नाद् वञ्चयेत परिवर्तनैः॥* [309]

*मुखं निक्षिप्य भूभागे प्रोहावाकुञ्च्य तिष्ठति ।*

*हस्तेन वेष्टयेदङ्गं कर्मकारस्य कुञ्जरः ॥* [310]

---

[309] मानसोल्लासस्य द्वितीयविंशतेः तृतीयाध्यायस्य ३१९तमः श्लोकः ।

हस्ते आयुधं गृहीत्वा अन्यस्य भञ्जनाय सज्जः भवेत् । एतन्निमित्तं किञ्चनवस्तु यद् बर्हिष्टात्वेष्टितं, गजाय हन्तुं चोदितव्यम् । तद्वस्तु स्वशुण्डेन प्रहार्य, स्वदन्तैः विविध्य स्वपादाभ्यां तत् मर्दयेत् गजः । एतान्येव पुनः भूमौ निक्षेपणीयानि । एतेषामपि हननाय प्रभञ्जनाय वा गजः चोदनीयः । पुनः वालुकाभरितवस्तुमेकं निर्माय तस्य ध्वंसनाय केनचिच्छब्देन, गजः दन्तैस्तेषां हन्तुं चोदनीयः । एषामौन्नत्यविस्तारस्य विपर्ययेण गजः स्वदन्ताक्रमणविधानं शिक्षणीयम् ।

एतादृशैः विधानैः शिक्षिताश्च गजाः पुनः महामार्गेष्वाटनीयाः । पुनः आहारदान-व्याजेन धावतः गजाननुसृत्य धावितुं चोदनीयाः । एवंक्रमेण युद्धेषु शत्रुसैन्यध्वंसनाय गजाः प्रशिक्षणीयाः।एतैरेव गजैः राज्ञे युद्धेषु यशः भवति । युद्धे पराक्रमरक्षणतन्त्रैश्च शत्रु-राजस्य युद्धवीरान्, गजानश्वाञ्च विजित्य गजबलेन केवलं राजानः युद्धे विजयं प्राप्नुवन्ति ।

*एवं संशिक्षितोनागो वध्यावध्येषु कर्मसु ।*

*जयत्येकोऽपि सङ्ग्रामे नरवाजिगजान्बहून् ॥* [311]

एवं गजशिक्षाविधानं बहुभिः गजशास्त्रविशारदैः चर्चितम् । गजशास्त्रयोः न उक्ता चेदपि अन्येषु ग्रन्थेषु गजशिक्षणं कथमिति विशदीकृतम् । गजशिक्षणमद्यापि क्वचिचलति आधुनिकोपयोगितानुसारेण । दक्षिणकर्नाटकस्य केषुचिद्देवालयेषु (यथा धर्मस्थलं, उडुपि, श्रृङ्गगिरिः, यडेयूरु, इत्यादिस्थानेषु), मठादिषु च यत्र गजाः विद्यन्ते (यथा आर्ट् आफ् लिविङ्ग्), तथैव सक्रेबैलु, बळ्ळे, दुबारे इत्यादि गजपालनकेन्द्रेषु, मैसूरु-बन्नेरुघट्टेत्यादिषु प्राणिसङ्ग्रहालयेषु अद्यापि यथापेक्षितं गजशिक्षणं चलति । विशेषतः यथा ज्ञातः सक्रेबैलु गजपालनकेन्द्रे तु प्रतिवर्षं गजानां क्रीडोत्सवः कश्चन भवति । बेङ्गलूरुसमीपं विद्यमाने आर्ट् आफ् लिविङ्ग्मध्येऽपि गजौ आस्तां ययोः कृते विशेषक्रीडादिव्यवस्था कृतासीत् । विश्वविख्याते मैसूरुदसराउत्सवे दशाधिकाः गजाः

---

[310] मानसोल्लासस्य द्वितीयविंशतेः तृतीयाध्यायस्य ३२१तमः श्लोकः ।
[311] मानसोल्लासस्य द्वितीयविंशतेः तृतीयाध्यायस्य ३३० तमः श्लोकः ।

भागं वहन्ति । अत्र प्रमुखः अंशः नाम तेषामपि कश्चन सम्यग् शिक्षणं प्रशिक्षणञ्च ददति सम्बन्धिनः आधोरणाः ।



उपरिदत्ते गजशिक्षणसम्बन्धितशिल्परचने ये हम्पीदेवालये विद्यमाने



अत्रदत्तमस्ति शिल्पद्वयं यत् होय्सलदेवालयेषु गजपट्टिकायां लब्धम्

## ४.४ - हस्तिशाला

गजानां रक्षणार्थं पालनार्थञ्च निर्मिताः शालाः गजशालाः । एते राजभिः निर्मापिताः स्वसैन्येषु विद्यमानानां गजानां संरक्षणार्थम् । राजगजेभ्यः, रोगिष्टगजेभ्यः, दुष्टगजेभ्यः, विशेषकारणेभ्यः यथा क्रीडार्थं, देवालयीनकार्यार्थं, विशेषाध्ययनाय च विद्यमानेभ्यः गजेभ्यः इदं पालनस्थानम् । वने निवसन्तः गजाः गजशालां नापेक्षन्ते यतो हि तेऽरण्येषु सर्वदा चलनशीलाः परमत्र सदा बद्धाः एवेति । अद्यापि हम्पीत्यादिस्थानेषु एतासां हस्तिशालानामत्युत्तमान्युदाहरणानि सन्ति । अद्याप्येवं गजाः गजशालासु पालितास्सन्ति बहुत्र ।

गजशालाविषये कौटिल्यस्यार्थशास्त्रं प्रमुखतया कथयति ।[312] गजानां दैर्घ्य-स्थौल्यौन्नत्यानुगुणेन गजशालानां निर्माणं भवेत् । गजानां दैर्घ्यौन्नत्यस्थौल्यात् द्विगुणितं भवेत् गजशालेत्यारभ्य करिणीनां कृते पृथक् व्यवस्था, विस्तारितप्रवेशस्य सुप्रग्रीवस्य, आलानार्थं कुमार्याः विवरणं, गजशालानां पूर्वोत्तरदिशयोः सम्मुखीभवनम्, शयनार्थं, तेषां मलादिकानां निवारणर्थं व्यवस्था च कल्पनीया इति ब्रवीति अर्थशास्त्रकारः कौटिल्यः । वाहनार्थमुपयुज्यमानाः गजाः युद्धगजाश्च दुर्गस्यान्तः स्थापनीयाः, अन्ये च केचन गजाः ये शिक्षणीयाः, दुष्टाश्च दुर्गाद्बहिः पालनीयाः ।

गजशालानां संरक्षणम्

कौटिल्याभिमतेन गजशालानां संरक्षणार्थं अनेकाः नियमाः सूचनाश्च पालनीयाः । गजवैद्यकाः, गजपालकाः/शिक्षकाः, आधोरणाः, गजसाहाय्यकाश्च अन्ये गज-सम्बन्धिनः जनाः यथा गजेभ्यः आहारं पाचयन्ति, ये च तस्मै घासंप्राप्नुवन्ति, आलाने बध्नन्ति, शुद्धिकर्मणि निरताः, रात्रावारक्षणं कुर्वन्ति गजशालानां एते सर्वेऽपि गजकार्याय आवश्यकाः । (तेभ्यः यदवश्यकं तत्तद्दातव्यमिति कौटिल्यः) प्रयाणे व्रणितेभ्यः, रोगैः पीडितेभ्यः, अधिककर्मणः श्रान्तेभ्यः, मदाविष्टेभ्यः, वृद्धगजेभ्यश्च गजवैद्याः अत्यवश्यमौषदोपचारमपि कुर्युः ।

[312] कौटिलीयार्थशास्त्रम्, द्वितीयाधिकरणम्, हस्त्यध्यक्षो नाम ३१तमः अध्यायः ।

गजशालायां मलिनवस्तूनां सङ्ग्रहः, घासदाने विफलता, दृढ-असिद्धभूमौ गजानां शायनं, शरीरस्य मर्माङ्गेषु ताडनम्, अपरिचितेभ्यः गजवाहनायावकाशदानं, गजानामकाले वाहनं, दुर्गमैर्मार्गैः जलपानाय नयनं, घनारण्येषु गजानां चारणञ्च दण्डनार्हाः अपराधाः । तेभ्यः कर्मकरेभ्यः येभ्यः एवमिदं कृतं तेषां भृत्यामाहारे वा तावता प्रमाणेन दण्डः आरोपितः । चातुर्मासससमये (ग्रीष्मवर्षर्तुकालयोः) ऋतुसन्धिकाले च तेषां पुरतः दीपारतिः त्रिवारं करणीया । गजानां रक्षणार्थं अमावास्यायां पूर्णिमायाञ्च भूतबलिर्देया ।

एतत्साकं गजशालायाः भूमिः, प्रवणीभूः स्यात् येन विविधाः वाहिन्यः तस्याः शालायाः कुजलं प्रवाहयितुं सुलभं भवेत् । तत्रत्याः भित्तयः, चराचरद्वाराणि इत्येतेषां विषये अनेकाः सूचनाः प्रदत्ताः । तत्र मषकानां बाधां निवारयितुं धूपः आयोजनीयः । घर्मकाले सूक्तरीत्या वातार्थं वायोः सञ्चारणार्थं बन्धनानि निष्कासनीयानि, एतत्सम्बन्धित- अन्यान्यसम्यञ्जनानि च करणीयानि । शैत्यकाले तु तत्र तत्राग्निस्थानानि प्रकल्प्य गजानां शरीरोष्णता परिरक्षणीया । रुग्णाः, रोगदूषिताश्च गजाः स्वस्थगजेभ्यः दूरे एव स्थापिताः भवेयुः रोगसम्भवकारणात् ।

मातङ्गलीलायाम् प्रायः गजशालाविषये न कोऽप्यंशः उक्तः ।

गजशास्त्रयोर्ग्रन्थयोः गजानां शालाविषये न कोऽपि विचारः उक्तः । परं पालकाप्यगजशास्त्रस्यान्तर्गतः अस्यैवापरः भागः गजाशास्त्रानुबन्धः । अस्मिन् ३३ श्लोकेषु गजशालानिर्माणमिति भागे शालानिर्माणविधिः प्रोक्तः ।

गजशिक्षायाम् -

हस्तिशिक्षायाः सप्तमः पटलः गजशालाविषये २७ श्लोकेषु वर्णयति । गजशाला नगरस्यान्तः दुर्गस्यान्तः वा नगरात् दुर्गाद्वा बहिः निर्मातव्या । परमुपयोगाय समीपे एव स्यात् । सा बृहच्छाला स्यात् प्राच्योदीच्यां वा मुखायती शिल्पशास्त्रानुगुणम् सर्वजनहितार्थाय च। इयमुत्तमा गजशाला । अन्ये केचन अभिप्रयन्ति यद्

सन्दर्भानुसारं अस्याः शालायाः द्वारं प्रतीच्यामपि भवितुमर्हतीति । परमियं मध्यमेति कथ्यते । ज्ञातमनेन यद्दक्षिणस्यां दिशि कदापि शालायाः मुखप्रदेशः न स्यादिति ।

शालानां निर्माणार्थं राजा १००० दण्डपरिमितं वा इतोऽप्यधिकमानप्रदेशं चिनुयात् । सः प्रदेशः चतुरश्रः वा अयुताकारो वा स्यात् । नतोन्नतभूमिः न कुत्रापि स्यात् तत्र । प्रदेशस्य तस्य भूमिः विनाश्मभस्मास्थिदोषयुक्ता स्यात् । निर्मितः प्रत्येकोऽपि शालाभागः समदूरे स्थितः, चतुर्ष्वपि दिक्षु, मुख्यद्वारं प्रवेष्टुमवकाशः यथा भवति तथा स्यात् । गजशालायाः प्रथमस्थानस्यैव मुख्यप्रवेशावकाशः भवेत् । प्रवेशद्वाराणि एकं, द्वे, त्रीणि चत्वारि वा भवितुमर्हति । प्रत्येकमपि द्वारं दृष्टिदोष-सूत्रदोष-वैशम्याद्वा निवारितं स्यात् । अतः बलयुतनिगडाः एव सर्वत्र संयोजनीयाः । यदि नास्ति चेदपि गजानां संरक्षणदृष्ट्या यद्यन्या व्यवस्था कल्पिता चेदपि न चिन्ताकारणम् ।

एवं क्रमेण गजशालायाः भित्तिनिर्माणसमये तृतीयभागस्य मध्यभागे यथा महत्येका समभूमिः भवेत् यत्र शृङ्गाटकं रचितं स्यात् । यदि शक्यं मार्गपार्श्वयोः वृक्षारोपणमपि कारयेत् । चतसृष्वपि दिक्षु गजानां शिक्षणार्थं क्रीडार्थं वा महदङ्कणानि भवन्तु । सर्वेष्वप्यङ्कणानामन्ते समोन्नत-समव्याप्तयुताः अनेकाः गजशालाः निर्मातव्याः । सर्वास्वपि दिक्षु यदि वा एवं गजशालाः निर्मिताश्चेत् आहत्य ३९२ गजेभ्यः रक्षणं दातुं शक्यम् । एतेषां कृते प्रतिदिनस्याप्याहारादिकं प्रदातुं सुलभं भवति । गजशालायाः त्रिष्वपि स्थानेषु शालानिर्माणम् 'नवीनमतक्रमः' इति कथितः । [313]

एतास्याः गजशालायाः कोणेषु प्रधानतया एषु त्रिषु प्रधानभवनानां, पेयजलस्य तथैवाहारासामग्रीः संरक्षणार्थं च व्यवस्था कल्पनीया । एवमेव गजानां विविधाः अपेक्षानुसारमवश्यकानां वस्तूनां सङ्ग्रहणार्थमितोऽप्यन्यानि भवनानि निर्मातव्यानि । प्रत्येकस्यामपि गजशालायां एकैकः गजः भवेत् । भवनस्य भित्तयः दृढास्सन्तु, गजानां शिरघट्टनं, शुण्डस्य ताडनं, पादस्य मर्दनमपि यथा सहेरन् । अतः मासपक्तभिः

[313] गजशिक्षायाम् सप्तमपटलस्य व्याख्याभागः, पृ.सं ६९ ।

सुधेष्टिकाभिः भित्तीनां निर्माणं करणीयम् । प्रत्येकस्मिन्नपि गजगृहं शिलाखण्डाः, आलान-स्तम्भाः, निगडसहिताः स्थापनीयाः गजानां पादान् बद्धुम् भवेयुः। गजशालानाम् आरम्भद्वारे देवतासन्तुष्ट्यर्थं विमानस्य निर्माणमपि कर्तव्यम् । तत्रैव पुनः आधोराणानाम्  वासस्थानायापि गृहाण्यपि परिकल्पनीयानि । तेषामायुधागारः अपि तत्रैव भवतु । तत्र शालायां प्रत्येकस्यापि हस्तिपालकस्य गजस्यागमन-निर्गमनमार्गं ज्ञापयितुं निर्देशोऽपि स्थापयेत् । [314]

हस्त्यायुर्वेदमहाग्रन्थे गजशालायाः केचनांशाः स्पष्टीकृताः । रोमपादः पालकाप्यमेवं पृच्छति -"भगवन् कीदृशे भूमिभागे कस्यां दिशि हस्तिनः शाला निर्मातव्या, किं प्रमाणं, कीदृशी, किं संस्थानं, ज्याभागः द्वारं वा कस्यां दिशि, कथं वा कस्मिन्नृतौ तदिच्छामि वेदितुं, भगवन् व्याख्यातुमर्हसि" इति । तदा पालकाप्यः प्रथमं शालानिमित्तं किं स्थानं युक्तमिति विवृणोति । तदुत्तरं शालानिर्माणार्थं योग्यः कालः, तत्- शालायाः विस्तीर्णं, परिणाहपरिमितिः, उत्तम-मध्यम-अधमेभ्यश्च आसनस्य विवरणं, कपिशीर्षस्य विवृतिं सर्वं वदति । गजशालानिर्माणं केषु मुहूर्तेषु भवितुमर्हतीत्यपि विनिश्चीय दक्षिणतः निर्माणस्यारम्भः करणीयः इति तत्र स्पष्टीकृतम् । सर्वेषामपि प्रश्नानामुत्तराणि ददत् पालकाप्यः गजशालायाः निर्माणार्थं मानमेवं निर्दिशति - [315]

| गजविधः | गजमानम् | स्थौल्यम् | दैर्घ्यम् | औन्नत्यम् |
|---|---|---|---|---|
| उत्तमः | अरत्नयः | २४ | ४८ | २६ |
| | पादाः | ३६ | ७२ | ३९ |
| मध्यमः | अरत्नयः | २२ | ४४ | २० |
| | पादाः | ३३ | ६६ | ३० |
| अधमः | अरत्नयः | २० | ४० | १६ |
| | पादाः | ३० | ६० | २४ |

कोष्टकः - ३९

दोषयुक्तगजशालानां विचारं पुनः अस्यैवोत्तरस्थानस्य उपसर्गनिरूपणाध्यायो नाम पञ्चत्रिंशत्तमोऽध्यायः चर्चयति । ग्रन्थस्यास्यैव विषपरीक्षाध्यायो नामाध्याये गज-

---

314 हस्तिशिक्षायाम् षष्टपटलस्य व्याख्याभागः, पृ.सं ६७ ।

315 हस्त्यायुर्वेदस्य उत्तरस्थानस्य षष्टः अध्यायः । अस्य नाम शालाविधानाध्यायः । गद्ये अत्रत्याः विचाराः प्रदत्ताः ।

शालायां गजानां विषदूषिताहारसेवनविषयः एवोक्तः। विषयुक्तभक्ष्यभोज्यदानेन, विषमिश्रितजलपानेन, विषाक्तानिलसेवनेन, विषदूषितपुष्पैः आकृष्टविषचूर्णादि-संसेवनेन, विषप्रयोगैर्वा गजानां शरीरकर्मसु वैपरीत्यं भूत्वा ते रुग्णाः भवितुमर्हन्ति । [316]

पालकाप्यगजशास्त्रेऽपि गजशालाविषये 'गजशालानिर्माणविधिः' इति कस्मिंश्चिदध्याये उल्लेखः दृश्यते यस्मिन्नाहत्य ३३ श्लोकाः विद्यन्ते । परमयं विभिन्नः कश्चन ग्रन्थः यस्यादिभागः एव स्वीकृतोऽत्राध्ययनाय । [317] तथाप्यस्मिन्नपि ग्रन्थे गजशालामुद्दिश्य कथितांशाः अत्र दृष्टाः । अस्मिन् भागे शालानिर्माणं, पालनं, स्थानं, निर्माणसमयः, परितप्रदेशः, दिक्, गजशालायाः मृदः गुणः, शालायाः विस्तीर्णः, [318] प्राग्ग्रीवस्य विचारः, शालायाः द्वाराणि, त्रिविधालानस्तम्भाः, तेषां स्थानानि, तन्निर्माणवस्तूनि, गजाशयनार्थं कल्पनीयव्यवस्था, गजप्रवेशशुभदिवसाः इत्याद्यनेकेंशाः अत्र भृशं वर्णिताः । गजशालायां गजानामारोग्यवर्धनाय धूपादीनामुपयोगः करणीयः इत्यस्य कस्यचिच्छलोकस्य भणितिः -

*अच्छिद्रैः कंकपैः कार्या विलासार्थं सुसंवृताः।*

*नाशार्थं मशकादीनां धूपः कार्यस्सदाभवेत् ॥*

मानसोल्लासे शिवतत्त्वरत्नाकरे वा गजशालायाः विषये न कोऽपि विचारः कृतः । अत्रोक्ताः गजशालाविचारः किं कदापि पूर्वं पालनयोग्यः, पालितः आसीद्वा, आधुनिकेऽपि काले एवमेवास्तिवेत्यत्र हम्पी मध्ये विद्यमानानां गजशालानां, तथैव गुरुवायूरुस्थाने विद्यमानानां गजशालायाः चित्राणि दृष्ट्वा ज्ञातुं शक्यते यदुक्तं तत्सत्यमिति ।

---

[316] हस्त्यायुर्वेदस्य क्षुद्ररोगस्थानस्य विषपरीक्षाध्यायो नाम षष्ठोऽध्याये ।
[317] पृ.सं २२२ तः २२६ पर्यन्तम् ।
[318] चतुर्विंशतिहस्ता सा विस्तारे ज्येष्ठदन्तिनः । द्विद्विहस्तविहीना स्यात मध्यमाधमयोः क्रमात ॥ ६ ॥



उपरि यद्दृश्यते तत् हम्पी मध्ये विद्यमानायाः गजशालायाः चित्रम् ।

अधः यद्दृश्यते एतत् गुरुवायूरुमध्ये स्थितायाः गजशालायाः चित्रम् ।



# पञ्चमोऽध्यायः

गजानां पालनम् -

५.१ कोऽयं पालकाप्यो नाम ?   ५.२ हस्तिपाः   ५.३ दिनचर्या-ऋतुचर्याच

गजाः स्तनिवर्गस्य अत्युन्नतः जीवीति सर्वे जानन्ति । एते सर्वेभ्योऽपि प्रियाः प्रणिनः स्वरूपात्, स्वसद्गुणैः । कदाचिदेते प्राणान्तकाः अपि भवन्तीति विषयोऽपि सर्वदा ध्यातव्यः । अयं सस्याहारी जीवी स्वगात्रानुसारं स्वभावानुसारं महाशक्तिशालीतितु विदितम् । परमयं क्रूरीति वक्तुं न युक्तं यतो हि तावत्ते मुग्धाश्च प्रीतिपात्राश्च । अतः सामान्याः अपि जनाः तेषां क्रीडां, गतिं, गाम्भीर्यं, चेष्टाष्च सर्वाः दृष्ट्वा मुदिताः भवन्ति ।

सदा ध्यातव्योऽयं यत् एषां एतासां क्रीडेत्यादिकानां पृष्टभूमौ कश्चन जनः अस्ति यो हि एषां बृहज्जीविनामाशाः जानाति, तेषां इष्टानिष्टानंशानवगच्छति, तैः सम्भाव्यमानानि दौष्ट्यानि, परिहाराश्च सुष्ठु चिन्तयति, तेषां चित्तस्य, चाञ्चल्यस्य, गुणानाञ्च अध्ययनं करोति, तेषामपेक्षाः सर्वाः अपि सर्वदा पूरयतीति । सः सामान्यतया हस्तिपः इति कथितः । गजनिग्रहणे अस्यैव प्रधानं योगदानम् । स एव गजस्य सर्वासां चेष्टानामुत्तरदायी । सः गजस्य शुश्रूषां सर्वामपि करोतीति कारणेन प्रायः सः गजस्य सखेव विद्यते । गजस्य सर्वाः दैनन्दिनचर्याः, तस्य शिक्षणं, प्रशिक्षणं, काले काले गजस्य मनःस्थितिः, एवं सर्वमपि जानातीति कारणेन हस्तिपस्य दायित्वं बहुमहत्त्वपूर्णमस्ति । सः एकः एव प्रायः तस्य मनस्थितिं, बहिस्स्थितिं यः सम्यक् जानाति ।

यत्र कुत्र वा कश्चन पालितः गजस्स्यात् यथा देवालये वा वृक्षदारुसञ्चयस्थाने वा उत सर्वजनप्रियसर्कस्मध्ये वा तत्र समीपे हस्तिपः स्यादेव । सः हस्तिपः तं गजं तावत् प्रीणयति, प्रशिक्षयति सम्यक् पालयति । अतः यदा हस्तिपः दुःखे भवति, तदायं गजः कदाचित्तमपि हस्तिपं समाश्वसिति । यद्यपि गजस्य महतीशक्तिः, सः शब्दैरेव बहुवारं

नियन्त्रितः भवतीति तोषदायकः । गजः जननादारभ्य स्वगणगजैर्दत्तं शिक्षणं सर्वमपि स्मरति यथा स्वमातुः संसर्गः, जलस्थानानि, वनस्थानानि, क्रीडादिकम्, ओषधि-वनस्पतिस्थानानीत्यादयः । तर्हि पालितपरिसरे पाठितं सर्वमपि गर्भावस्थादेव स्मरतीति वा प्रश्नः उद्भवति । अस्योत्तरं न । यतो हि एतावत् खलु कालपर्यन्तं न कोऽपि गजः पालितपरिसरे प्रसूतः । गजाः वने प्रसूताः । ते गृहीत्वा, प्रपाल्य, प्रशिक्ष्य कार्ये योजनीयाः । प्रशिक्षणं तावत् विविधकार्येभ्यः भवति यथा देवालयीनः गजः, दारूत्थापकः गजः, क्रीडार्थकः गजः (यथा सर्कस् कृते), ग्रहणाय गजः, दसरा उत्सवाय गजः इत्यादिः । कदाचित् गजजीवनस्य कस्मिंश्चिद्भागे अस्य हस्तिपस्य परिचयः भवति । तदारभ्य अनयोः सम्बन्धः विशेषरूपेण वर्धितः भवति । अतः एव हस्तिपस्य दायित्वं प्रमुखमित्युक्तम् ।

जगतः आदिहस्तिपः कः ?

कोऽयं पालकाप्यः ?

हस्तिपानां विषये अवश्यं स्मर्तव्यं यत् गजशास्त्रस्य प्रवर्तकस्य आदिहस्तिपस्य नाम पालकाप्यः । प्रायः सर्वेऽपि गजशास्त्रग्रन्थाः अस्मादेवारभन्ते स्वप्रवचनं गजमुद्दिश्य । सः स्वं करेणुपुत्रमिति परिगणयति । सर्वेऽपि गजशास्त्रसम्बन्धिनः ग्रन्थाः आदौ गजोत्पत्तिं पालकाप्योत्पत्तिं वा प्रथमाध्यायत्वेन चर्चयन्ति । तर्हि कोऽयं पालकाप्यः इति ?

गजशास्त्रग्रन्थेषु हस्तिपानां विषयेऽपि बहुत्रोक्ताः । केचनाध्यायाः एषु, तानुद्दिश्यैव ग्रथिताः । हस्तिशास्त्रविशारदाः एतानपि परिगणयन्तः तस्मायपि हस्तिपाय निर्देशं दास्यन्ति यत्तेषां कर्म किं भवेत् कथमिति च । हस्तिपः, तत्कुलञ्च विशेषसन्दर्भेषु भूरिसम्मानितम् । तस्य कार्यं तु श्लाघनीयं यतो हि सः गजज्ञानं समीचीनतया प्राप्नुयात्, नियन्त्रणं, गजालङ्करणं, तस्यर्तुचर्यां समीचीनतया पालयेत्, जलपानादिकं सुष्ठु दद्यात् गजेभ्यः, शुश्राषां कुर्यात्, स्नानादिकं कारयेत्, तथैव गजानां रोगानपि कदाचित् परिहरेदिति कारणात् ।

शास्त्रप्रपितामहः-

गजशास्त्रसम्बन्धिषु सर्वेषु ग्रन्थेषु शास्त्रस्यास्य प्रणेता कः इत्यस्य प्रश्नस्योत्तरं समानमस्ति । सर्वेष्वपि ग्रन्थेषु प्रायः प्रथम-द्वितीयाध्यायेषु वा पालकाप्यो नामास्य गजग्रन्थप्रणेतुः नामैवोक्तम् । न केवलं गजशास्त्रग्रन्थेषु परं तत्सम्बन्धिषु ग्रन्थेष्वपि गजशास्त्रस्य आदिपुरुषः पालकाप्यो नाम कश्चन ऋषिः इति सर्वत्राप्युक्तम् । यद्यपि भारतीयचिन्तने प्रपितामहत्त्वचिन्तनं नास्ति, पाश्चात्यमतेन गन्तव्यं चेत् प्रायः पालकाप्यः Father of Indian Elephantology इति कथनीयः । अत्र चिन्तनीयमप्यस्ति यत्सः केवलं भारतीयगजज्ञानस्योत विश्वगजज्ञानस्य प्रपितमहो वेति ? [319] अयं गजशास्त्रप्रपितामहः पालकाप्यः स्वविषये बहुत्र कथयतीति समाधानकरोऽयं विषयः । एवमस्य महर्षेः जन्मजीवितसार्थक्यानां विषयः शोधनीयः । अतः प्रश्नः कश्चन उद्भवति एव कोऽयं पालकाप्यो नाम, कदा, कुत्रासीदयम् ? इति ।

पालकाप्यः हस्तिशास्त्रविशारदः आसीत् । सर्वेऽपि गजशास्त्रसम्बन्धिनः ग्रन्थाः विना पालकाप्यस्मरणं स्तुतिं वा पदादपि न चलन्ति । केचन पालकाप्योत्पत्तिकथनेन स्वकृतेरारम्भं कुर्वन्ते, अन्ये केचन तत्स्तुत्या । विशेषो नाम पालकाप्योत्पत्तिस्तु क्वचिन्महास्वारस्यकरवृत्तान्तमिव वर्तते । अयं पालकाप्यः अङ्गराजाय रोमपादाय स्वज्ञाननिवेदनं कृतवानिति सामान्यतया सर्वेष्वपि गजशास्त्रसम्बन्धितग्रन्थेषूल्लेखः कृतोऽस्ति ।

काव्येषु गजशास्त्रज्ञानम्

न केवलं शास्त्रग्रन्थेषु, परं काव्येष्वप्यस्य गुणगानं संदृश्यते । कालिदासस्य रघुवंशे अस्योल्लेखः दृश्यते यदयं रामस्य पितामहस्य अजमहाराजस्य समकलीनः इति । रघुवंशस्य षष्टेसर्गे इन्दुमतिस्वयंवरसन्दर्भे तत्सखी सुनन्दा रोमपादस्य परिचयं इन्दुमत्यै ददती अङ्गदेशस्याधिपतिमुद्दिश्य "अस्य नागाः हस्तिशास्त्रसूत्रकारैरेव

[319] अयं विचारः पुनः उपसंहारे चर्चितः यदेते गजविचाराः विशेषतया रोगनिदान-चिकित्सापद्धतयः आफ्रिकाखण्डीय-गजानामपि सुयोग्याः भवन्ति वा न वेति ।

शिक्षिताः” इति कथयति ।[320] अत्रैतदेव ज्ञातं यत् कालिदासकाले गजशास्त्रस्य प्रणेता तस्य शास्त्रकारत्वं च ज्ञाते इति । तथैव मृच्छकटिके नान्द्यामेवोल्लिखति शुद्रककविः यत् सः हस्तिशिक्षां ज्ञातवानासीदिति ।[321]

एतैस्साकं नाटकानां संरचने कृतभूरिपरिश्रमः महान्नाटककारः भासः गजानां विषये स्वस्य सुज्ञानं परिचाययति तस्य प्रतिज्ञायौगन्धरायणनाटके । अत्र नाटकस्य मूलवस्तु गजमुद्दिश्यैव भ्रमति ।[322] यद्यपि सः पालकाप्यस्य नाम न स्वीकरोति परं गजानां बहून् विषयान् परिचाययति सहृदयेभ्यः । एतैरेतज्ज्ञायते यत् तस्मिन्नेव काले गजानां पालनार्थं शिक्षणार्थं च कापि व्यवस्था, शास्त्रं वासीदिति ।

पालकाप्योत्पत्तिविषयः कः ?

गजशास्त्रसम्बन्धितेषु सर्वेष्वपि सामान्यतया पालकाप्यस्योल्लेखः दृश्यते एव । सः महाज्ञानी हस्तिज्ञानचतुरः इति सर्वत्रोक्तम् ।

*नीलकण्ठस्य मातङ्गलीलायां*

नागोत्पत्त्यधिकारो नाम प्रथमाध्याये पालकाप्यस्य विषयः उक्तः । रोमपादः अङ्गाधिपतिः यस्य चम्पा राजधानी । अस्मिन्वने निवसन्तं गजशास्त्रविशारदं पालकाप्यं गजविषयकं मुनिगणसहितः अङ्गराजः पृच्छति ।

अस्य ग्रन्थस्य प्रथमोऽध्यायः नागोत्पत्त्यधिकारः इति । अस्मिन्नध्याये ४० श्लोकास्सन्ति यत्र गजानामुत्पत्तिः कथिता । नागानामुत्पत्तिकारणान्यनेकानि सन्ति । अयं विषयः अङ्गाधिपतिः रोमपादः गजशास्त्रप्रवीणात् पालकाप्याज्जानाति । पालकाप्यः करेणुपुत्रः कथमिति अत्र विवृतमस्ति । प्रथमदशश्लोकेषु पालकाप्यस्य

---

[320] जगाद चैनामयमङ्गनाथः सुराङ्गनाप्रार्थितयौवनश्रीः ।
विनीतनागः किल सूत्रकारैरैन्द्रः पदं भूमिगतोऽपि भुङ्क्ते ॥ र.वं. ६/२७

[321] ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षाम्
ज्ञात्वा शर्वप्रसादाद्व्यपगततिमिरे चक्षुषी चोपलभ्य ।
राजानं वीक्ष्य पुत्रं परमसमुदयेनाश्वमेधेन चेष्ट्वा
लब्ध्वा चायुः शताब्दं दशदिनसहितं शुद्रकोऽग्निं प्रविष्टः ॥ मृच्छकटिकम् - १/४

[322] विवरणार्थं द्वितीयाध्यायं पश्यामः यत्र उदयनः वासवदत्तायाः पित्रा योजिते कृत्रिमगजस्य बन्धनव्याजेन महासेनस्य हस्ते पतति । तथैव तस्मात्कौशाम्बीं पुनः गजमारुह्यैवागच्छति ।

वनपरिचयः उक्तः । पालकाप्यः इति कश्चन ऋषिः सामगायनस्याश्रमेऽऽसीत् यत्तु चम्पासमीपमासीत् । सः तस्मिन्नरण्ये विद्यमानान् गजान् परिपालयति स्म स्वगजमोहकारणतः ।

एकदा अङ्गदेशस्य राजधान्यां चम्पायां (या तु गङ्गानद्यास्तटेऽऽसीत्) राजा रोमपादः सर्वत्र गजानामागमनवार्तां श्रुत्वा मुनिभिरुक्तः तेषां ग्रहणाय । गजबन्धकाः तस्मिन् वने सामगायनस्याश्रमे पालकाप्यं दृष्ट्वा तस्य आश्रमगमनं निरीक्ष्य तस्यानुपस्थितौ गजान् गृहीत्वा चम्पायां बद्धवन्तः । विषयममुं विज्ञाय गजशुश्रूषार्थं चम्पां प्राप्तः पालकाप्यः । तदा रोमपादेन प्रार्थितस्सन् स्ववृत्तान्तमारभत ।

पूर्वं गजाः पक्षवन्तः आसन् । ते दीर्घतपसा शप्ताः स्वपक्षैः सर्वत्र सञ्चरितुं या स्वेच्छागमनशक्तिरासीत् तस्याः विरहिताः मनुष्याणां वाहनानि भवितुं । यद्यप्यस्मात्शापात् दिग्गजाः निवारिताः, ऐरावतादयः दिग्गजाः ब्रह्माणं गत्वा, भूलोके कुभोज्यात्, अजीर्णत्वात्, विषमाहारभक्षणाद्वा भुवि गजाः म्रियन्ते इति वदन्तः शापाविमोचनार्थं तं प्रार्थयत । परं ब्रह्मावोचद्यत् शीघ्रमेव कश्चन मुनिः यो हि गजज्ञान-विशारदः, भुवि जन्म प्राप्नोति । सः तु सर्वेषां गजानां सर्वानपि रोगान्निवारतीति ।

एतदनु रुचिरा नाम अप्सरा सृष्टा । तस्याः गर्वस्य कारणेन सा विधात्रा शप्ता वसुकुले जन्मप्राप्तुम् । अतः सा भार्गवस्य पुत्री गुणवती भूत्वा भूमौ जन्मालभत । सा कदाचित् कौतुकान्मातङ्गर्ष्याश्रमं प्रविष्टवती । स्वतपोभङ्गाय इन्द्रेण प्रेषितेयमिति मन्वानः सः महर्षिः करेणुर्भवितुं तां शशाप । प्रार्थ्यमानेन स्वदोषं जानता तेनर्षिणा सामगायनस्य वीर्यपानेन पुत्रं प्राप्नोति तदास्माच्छापात् विमुक्ता भवतीति तां सान्त्वयामास ।[323]

कदाचित् काचिद्यक्षीं स्वप्ने दृष्ट्वा सामगायनः स्वाश्रमाद्बहिरागत्य मूत्रोत्सर्जनमकरोत् । तेन साकं यदा तस्य वीर्यमप्यस्खलत्तदा तत्रैवोपस्थितया तया

[323] मा.ली. प्रथमः पटलः श्लोकसङ्ख्या १६ ।

करेण्वा (अभिशप्तगुणवत्या) तज्जलं पीतम् । तत्क्षणमेव सा गर्भीणी भूत्वा, मानुषं पुत्रं मुखादसूयत । पुनरप्सरसः रूपं प्राप्तवत्या तया, तत्पुत्रः सामगायनस्य हस्ते समर्प्य स्वयञ्च स्वर्लोकः अगम्यत ।

नयनानन्दकरं पुत्रं दृष्ट्वा तुष्टः सामगायनः तस्मै जननसंस्कारादीन् कृत्वा पालकाप्य इति नाम चकार । सः वने एव समृद्धः, गजैस्साकं भूत्वा द्वादशसहस्रवर्षाणि, गजानां सर्वानपि विषयान् ज्ञातवान् ।[324] इत्येतां स्वकथामुक्त्वा पालकाप्यः पुनः गजोत्पत्तिविचारं प्रोक्तवानग्रे रोमपादादिभ्यः । [325]

पालकाप्यः स्वजन्मवृत्तान्तमेवं कथयति - रुचिरा नाम देवनर्तकी कदाचिन्मातङ्गो नाम महर्षिणा करेणुर्भवेति शप्ता । तथापि प्रार्थ्यमानेन ऋषिणा पुत्रप्राप्त्यनन्तरं स्वर्गं निवर्तयितुमुक्ता सा । [326] सामगायनमहर्षिणा सा पुत्रमेकमसूयत । सामगायनमहर्षिः तत्पुत्रं पालकाप्य इति नामाङ्कितवान् । सः वने चरन्, गजैस्साकं वसन् गजविषयविज्ञानी अभूत् । [327]

पालकाप्यगजशास्त्रं नामान्यस्मिन् ग्रन्थे पालकाप्यजननसम्बन्धिनी काचित्कथा पुनः श्रूयते । सामगायनो नाम महर्षिः हिमालयप्रान्ते तपः आचरति स्म । तपः, स्वनित्यानुष्ठानानि च समाप्य यदा सः विश्रान्त्यर्थं वृक्षमूलमविशत् तदैवागच्छत् तत्र कश्चन गजगणः । तद्गणे विद्यामानां काञ्चित् करिणीं दृष्ट्वा ब्रह्मणः चित्तानुसारं तस्यामाशाऽभूत् मुनिवरस्य । तस्याः करिण्याः दर्शनमात्रेण सञ्जातवीर्योत्पत्तिः सामगायनः स्वाश्रमात् बहिरागत्य वीर्यस्खलनमन्वभवत् । तत्पीत्वा सा करिणी गर्भवती अभूत् । पालकाप्यः कथयति यत्सः अस्याः एव करिणीपुत्रः इति । इदं श्रुत्वा

---

[324] परं हस्त्यायुर्वेदस्य वनानुचरिताध्यायस्य मतं किञ्चिद्भिन्नं वर्तते ।
सेविता वारणैः सार्धं स्थलप्रायः सुखं मया । दशवर्षसहस्राणि दश वर्षशतानि च ॥
त्रीणि पञ्च च वर्षाणि मया चीर्णं सह द्विपैः । हृष्टेन मनसा राजन्मयाऽऽख्यां ततो हितम् ॥ १८२-१८३ ॥

[325] मातङ्गलीलायां प्रथमोध्यायः, १७तः २०तम श्लोकपर्यन्तम् ।

[326] अत्र पूर्वकथा काचिद्वर्तते यत् - पूर्वं कदाचित् गजाः स्वपक्षैः दुरभिमानिनः स्वैरविहारिणः सर्वत्राटन्तः दीर्घतपो नाम महर्षिणा भूलोके जन्मलब्धुं शप्ताः । ऐरावतादयः ब्रह्माणं भूलोके विविधैः रोगैः पीडिताः भवन्ति, अतः मुनिशापपरिहारं प्रार्थयामास । विधाता तेषां पालनार्थं कश्चन गजज्ञानवेत्ता भुवौ प्रादुर्भवतीति, सः सर्वान् पालयतीत्यवोचत् । एवं पालकाप्यस्य जन्मनः पूर्वोदन्तः यथोक्तं गजशास्त्रग्रन्थेषु ।

[327] मातङ्गलीला श्लोक संङ्ख्या १५ - १९ प्रथमोऽध्यायः ।

रोमपादः सा करिणी कथमुत्पन्नेति ज्ञातुकामो बभूव । पुनः कथा काचिच्छ्रूयते पालकाप्यद्वारा यत् अष्टवसुषु कस्यचित् गुणवती नाम पुत्री मतङ्गमुनेराश्रमं कदाचिदागजाम । तपोभङ्गार्थमेव प्रेषिता तरुणीयमिति भिया मतङ्गमुनिः तां करेणुतामनुभोक्तुं शशाप । परमनुग्रहमपि कञ्चित् कृतवान् यत्सा स्वपूर्वस्मरणं सर्वमपि संरक्षेदिति । ज्ञात्वेदं सा तरुणी तस्यागमनेऽदौष्ट्यभावं प्रकटयन्ती आश्रमस्य शान्ततां सौन्दर्यञ्चानुभोक्तुकामा तत्र प्राविशदिति निविवेद ।

गुणवत्याः मनश्शुद्धतां स्वयोगेन ज्ञात्वा मातङ्गः, दैवलीलया सर्वेषां सम्पन्नतामपि संवीक्ष्य तां सान्त्वयामास । करेणुभूत्वापि तेजस्विनी भविष्यतीति वदति मतङ्गमुनौ गुणवती स्वशापस्य परिहारं प्रार्थयामास । तदा मतङ्गमुनिः सामगायनस्य कृतिमुक्त्वा तद्वीर्यकवलेन कश्चन ऊर्जस्वी पुत्रः सञ्जायते यो हि गजज्ञानभाण्डारः एव भविष्यतीति आशीर्भिः तां अभिनन्दयामास । तस्य जन्मना तस्याः शापमुक्तिरित्यपीति तां समाश्वासयामास ।

स्वकथामनुवर्तयन् पालकाप्यः सः स्वयं मातुः करिण्याः गर्भे उषित्वा दशमासान्, स्वयं प्रादुरभवदिति रोमपादाय निवेदयामास । स्वनाम्नः विषयम् वदन् कथयति - *पालनाद्गजयूथस्य काप्यगोत्रोद्भवो यतः । पालकाप्य इति श्रीमान्नामधेयं चकार सः ॥* [328] एवं पालकाप्यस्य गजज्ञानस्य गजजगज्ज्ञानज्ञातोऽभवदिति निविवेद तत्कथनेन ।

सः कदाचित् दशसहस्राधिकवर्षेभ्यः गजैस्साकं भूत्वा गजानामिष्टानिष्ट-क्रीडा-

अभ्यासादिकं, रोग-लक्षण-निदान-उपाचाराः इति सर्वानपि ज्ञातवानित्यकथयत् । [329] पालकाप्यविरचितहस्त्यायुर्वेदमहाग्रन्थस्याद्यध्यायस्य वनानुचरिताध्यायेत्यङ्कितस्य कश्चन प्रमुखभागोऽस्त्ययं पालकाप्यजननविचारः । कथा समाना एव । [330]

---

[328] पालकाप्य गजशास्त्रं, प्रथमप्रकरणं, श्लो - ८९

[329] दशवर्षसहस्राणि दशवर्षशतानि च । त्रीणि पञ्च च वर्षाणि मया चीर्णं सह द्विपैः ॥ पा.ग.शा प्रथमप्रकरणं, श्लो ९६

[330] [कश्चन सन्देहः उदेति यदस्य नाम पालकाव्यमिति अग्निपुराणे उक्तमिति उल्लिखितम् वेट्टंमणिना लिखिते Puranic Encyclopedia नामकग्रन्थे । (पृ.सं. ५४६)]

नारदमुनिविरचितायां हस्तिशिक्षायान्तु पालकाप्यस्य नामापि न श्रूयते । ग्रन्थस्तु वासवस्य नारदे प्रश्नकरणेन आरभते । यथा सर्वत्रोक्तं तथा गजानां सृष्टिक्रमस्तूक्तः । परं ते वारणाः शप्ताः अङ्गादिदेशेष्वचरन्निति समापयति ग्रन्थकारः, नास्ति पालकाप्यविषये कोऽप्यंशः।

अर्थशास्त्रं, मानसोल्लासः, शिवतत्त्वरत्नाकराश्च नकिमपि वदन्ति पालकाप्य-जन्मविषये।

कोऽस्य देशः ?

पालकाप्यस्य जन्मरहस्यं विज्ञाय तस्य देशादिकं चिन्तनीयञ्चेत् तस्य तु शम्पानदीतीरे चम्पानदीतीरे इति वा विद्यमानः अङ्गदेशः इति ज्ञातुं शक्यते । एवं सर्वत्राप्युक्तं, यदा रोमपादः अङ्गाधिपतिः शम्पा/चम्पानदीतीरे पालकाप्यं पृच्छति गजविषयमिति । विशेषतया पालकाप्यस्य हस्त्यायुर्वेदमहाग्रन्थस्य प्रत्येकस्याप्यध्यायस्य आदिश्लोकः सामान्यतया 'अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति' इत्येवारभते । अद्यतनभारतदेशस्य मध्यभागे प्रायः सः अवर्ततेति ज्ञायते । परं सर्वेऽपि ग्रन्थाः तस्य देशस्तु एषः एव इति न कुत्रापि निर्दिशति । परं पालकाप्यस्य रोमपादस्य च नामनी अवश्यं श्रूयते एव । यद्यपि मातङ्गलीलाग्रन्थस्य कर्ता नीलकण्ठः केरलीयः इति कथयन्ति तथापि कर्तुः काले कलिङ्गेश्वरः गजशास्त्रविषये सुज्ञानधारकः आसीदिति ग्रन्थादेव ज्ञायते कर्तुः एवं वदति कलिङ्गेश्वरः इति कथनेन । [331] अन्यत्र पुनः कथितमस्ति यत् सः अङ्गदेशस्य राजाऽऽसीत् । [332]

कः कालस्स्यादस्य ?

अस्य कालः प्रायः निर्णेतुं कष्टमित्याभासते । यतोह्ययं रामायणस्य रामादपि पूर्वजानां समकालीनः इति विषयानुसारेण; अस्य न कोऽप्याधारः लभते इति धिया

---

[331] ये पर्यश्रुदृशः कृश्वाश्च शिशवो भारार्दिताः पित्तळास्तन्वङ्गाः सतताध्वकर्मविहता वृद्धा वशानिस्स्पृहाः ।
सासृङ्गांसमदक्षयाश्च विवशा ये स्तब्धगात्राः परे तेषां साध्यतमं हितं घृतमिति ब्रूते कलिङ्गेश्वरः ॥ १० ॥
मातङ्गलीला, एकादशः पटलः ।

[332] प्रायशः कृमिजा रोगा भवन्त्यङ्गप दन्तिनाम् । तस्मात् कृमिहरण्येव नित्यं देयानि दन्तिनाम् ॥ ४८ ॥
मातङ्गलीला, एकादशः पटलः ।

तस्य कालः कः इति निर्णेतुं अशक्यः । आयुर्वेदस्यानुगुणं हस्त्यायुर्वेदग्रन्थः रचितः इति स्पष्टतया ज्ञायते । अतः आयुर्वेदेतिहासस्याधारेण चरकादि संहितोत्तरं स्यादित्याभासते ।

पालकाप्यः करेणुपुत्रः इति कथनमेव कदाचिदविश्वासायाधुनिकदृष्ट्या । आधुनिकविज्ञानानुसारं इदमशक्यम् । स्वस्य करेणुना जन्म, अनेकैः वर्षैः तस्य वने एव वासः, गजचरणानुचरणमिति विषयास्सर्वे चिन्त्यन्ते चेत् प्रायः पालकाप्यो नामर्षिः वनवासी स्यादिति भाति । सः वने एव लब्धजन्मा, पोषितः, तत्रैव उषित्वा, रात्रिंदिवं गजपालने निरतो भूत्वा तत्रैव कालयापनं करोति स्म । एवं न केवलं कवीनां, केषाञ्चन शास्त्रकाराणामपि देशकालादिविषयाः अज्ञाताः इति वक्तुं पालकाप्यस्यैतदुदाहरणम् अलमित्याभाति ।

अद्यतने भारते प्रायः अति प्रमुखतया गजाः बहुसङ्ख्यासु दक्षिणभारते, ईशान्यभारते चैवोपलभ्यन्ते । दक्षिणभारते विशेषेण केरलप्रान्ते तु प्रति जनपदेऽपि गजानां पालनं, संवर्धनमित्यादयः प्रतिदिनमिव प्रचलन्ति । अत्र कदाचित् हस्त्यायुर्वेदाधारेणापि क्वचित् गजारोग्यपरिपालनं कुर्वन्तस्सन्तीति भाग्यकरोऽयं विचारः । शास्त्रपरम्परा अद्यापि जीवतीति महान् तोषः । पुनः आधुनिकभारतेऽपि गजानामेव काचिन्मेला चलति बिहारराज्ये सोन्पुर् इति स्थाने । तत्र कदाचिदन्वेषणीयं यत्तत्र गजशास्त्रानुगुणेन, पालकाप्यवचनानुसारेण वा गजपालनं, रोगोपचारं वा कुर्वन्ति वेति ।

गजानां शापानुग्रहकथनम्

गजोत्पत्तेरनन्तरं ग्रन्थेषु चर्चिताः विचाराः गजानां शापानुग्रहाः, परं न सर्वत्र । मातङ्गलीलायां, पालकाप्यगजशास्त्रयोश्चायंविचारः चर्चितः।

मातङ्गलीलायाः प्रथमे पटले एव एषः विचारः उपस्थापितः । कदाचिद्दूर्वासः देवेन्द्राय पुष्पमालामेकामददात् यामैरावतः मर्दयित्वापातयत् । दृष्ट्वैतत् सः मुनिः तं

शशाप येन सः नष्टप्राणः पुनः समुद्रमथने अभ्रम्वा पुनर्जातः । तदा इन्द्रः पुनः तं स्ववाहनमित्यकरोत् । अतः सः क्षीरसागरसम्भवः इति प्रसिद्धः अभवत् । [333]

अग्रे पुनः गजानां विषये अन्ये केचन शापप्रसङ्गाः वर्णिताः । एतेषां शापदातारः, कः शापः तथैव कारणं किमित्येतेन प्रकोष्टेन ज्ञातुं शक्यते - [334]

| क्र | शाप दाता | शापः/ अनुग्रहः | कारणम् |
|---|---|---|---|
| १ | अग्निः | जिह्वापरि-वृत्तिः,अधिक दाहः | तिरोभृतः अग्निनः अन्वेषणार्थं प्रेषिताः दिग्गजाः अग्निस्थाने कोलाहलमकुर्वन्निति कुपितः अग्निः तान् जिह्वापरिवृत्तिं भवेत्, अधिकः दाहः भवेदिति शशाप । |
| २ | ब्रह्मा | मुष्काभावः, पांसु-पङ्क-जलेषु प्रीतिः | ब्रह्मणः वचसा गजाः अग्निं प्रत्यगच्छन्निति कारणेन ब्रह्मा ते पांसु-पङ्के-जलेषु च क्रीडितुमवकाशमददात् । |
| ३ | दीर्घ-तपः | यथा पूर्वमेवोक्तम् स्वस्थानच्युतिः, मनुष्यवहनम् देवत्त्वस्य हानिश्च शशाप । | |
| ४ | भृगुः | स्वविण्मूत्रे आसक्तिः | गजाः भृगोराश्रमं गत्वा तत्र मलमूत्रादीनां विसर्जनमकुर्वन्निति कारणेन शप्तवान् । |
| ५ | वरुण | स्वके अन्तः स्वेदता | युद्धे गजानां स्वेदमसहमानान् देव-दानवान् दृष्ट्वा वरुणः एवंताननुगृहीतवान् । |

कोष्टकः - ४०

देवगजानां मनुष्यलोकगजानाञ्चानेके भेदास्सन्ति । भेदानां कारणं तु विविधसन्दर्भेषु बहूनां शापानुग्रहाणां प्राप्तिः । एतयोर्भेदविषये पालकाप्यः रोमपादेन पृष्टाः चित्तचोदकाः प्रश्नाः एवमासन् - [335]

१. कथमेते गजाः द्विदन्ताः अभवन् ?

२. कथमेते अल्पायुषः अभवन् ?

३. एतेषां जिह्वा कथं परावृत्ताभवत् ?

४. एते कथमभ्यन्तरस्वेदाः ?

५. कथमेते नराणां वाहनान्यभवन् ?

६. अन्तर्दाहः एतेषां कथम् ?

७. एते यद्यपि शक्तिशालिनः कथमेते स्वशक्तिं विस्मृतवन्तः ?

---

333 मातङ्गलीला, प्रथमः पटलः, श्लोकसङ्ख्या २५ ।
334 मातङ्गलीला, प्रथमः पटलः, श्लोकसङ्ख्या ३५ तः ४० पर्यन्तम् ।
335 पालकाप्यगजशास्त्रस्य तृतीयप्रकरणम् श्लो.सं १- ६ ।

८. कथमेते पङ्कपांसुभिः रञ्जिताः ? ९. कथमेतेषां मुष्कदर्शनम् ?

१०. पूर्वं कामचराः आसन् कथमिदानीं न ? ११. कथं ते दैवत्वाद्वञ्चिताः ?

१२. स्वविण्मूत्रे कथमेषामभिलाषः ?

यथा मातङ्गलीलायामुक्तं एतेषां सर्वेषां प्रश्नानामुत्तराणि समानानि सन्ति । यथा तत्र प्रश्नाः पृष्टाः तथैवात्रापि, उत्तराण्यपि तथैव वर्तते इति विशेषः । अत्रापि दीर्घतपसः, भृगोः, ब्रह्मणः, अग्नीनाञ्च शापानुग्रहाः उक्ताः । [336]

गजशिक्षायाः प्रथमपटले गजानामुत्पतिरुक्ता । अन्ते तेषां शापप्रभावात् ते भूमौ पातिताः इति उल्लिखति कृतिकारः । पूर्वं ते पक्षवन्तः आसन् । तदा कामचारिणः अभूवन् । महाशक्तियुक्ताः देवासुरसङ्ग्रामेषु महद्योगदानं दत्तवन्तः वाहनत्वेन, दिग्रक्षणैश्च । परमतिशक्तियुक्ताः इति कारणेन ते साधूनामाश्रमादीन् अनेक वारं नाशितवन्तः । अतः कुपिताः ते मुनयः तान् गतपक्षान्, हीनबलान्, द्विदन्तान्श्च भवितुं शप्तवन्तः । [337]

५.२ - हस्तिपाः

व्यावहारिकदृष्ट्या प्रथमतया विषयममुं प्रायः प्रतिपादयति कौटिल्यः स्वस्य अर्थशास्त्रे । गजाधिकारी नामाध्याये एतादृशाः केचनांशाः उक्ताः । हस्तिपः गजानां प्रशिक्षणे ज्ञानी स्यात् यः गजानां स्वभावादिकं समीचीनतया जानीयात् । सः शान्तः, सहनशीलः, बुद्धिमान्, उत्तमः योद्धा, गजं सम्यक् वाहयेच्च । तस्यानुचराः अपि शान्तप्रकृतयः, शुद्धाः, कार्ये दक्षाः, नियमपालकाश्च भवेयुः ।

गजरक्षकलक्षणमित्ययमध्यायः गजाधिकारिणः गजवैद्यानाञ्च लक्षणादिकं कथयति । गजाधिकारी एतानि कर्माणि साधयेत्-

१. नागवनानां संरक्षणम्।

---

[336] पालकाप्यगजशास्त्रं, तृतीयप्रकरणम् ।

[337] गजशिक्षायाः प्रथमः पटलः श्लोकाः १९तः - २४पर्यन्तम् ।

२. गजाः यथा सुखेन तिष्ठेयुः, निद्रां वा कुर्युः तथा हस्तिशालानां निर्माणम् ।

३. गजानां, धेनुकानां, कलभानां वा पालनं तेषां शिक्षण/प्रशिक्षणानन्तरम् ।

४. गजानां नित्य-नैमित्तिकानाम् आहारवस्तूनां संसज्जनम् ।

५. तेषां शिक्षणस्य प्रमाणम् ।

६. तेषां आलङ्कारिकवस्तूनि, नित्यावश्यकवस्तूनि च ।

७. गजशिक्षकाणां गजवैद्यानां च कर्तव्यानि ।

८. युद्धादिकर्मसु तेषां गजानां प्रशिक्षणम् ।

९. आधोराणणानां, हस्तिपानाञ्च योगक्षेममपि संरक्षेत् चेत्यादि ।

पुनः गजाधिकारिष्वपि केचन गुणाः यथा उदारता, शुद्धता, कृतज्ञता, निर्मत्सरता, कुलीनता इत्यादयः आवश्यकाः । सः हसन्मुखी, धीरः, बुद्धिमान्, मधुरवाक्, राजनिष्ठः, उत्साही, सहानुभूतियुतः, राज्ञः प्रीतिप्रात्रश्च भवेत् । गजवैद्योऽपि यः गजान् रोगेभ्यः उपचरति बुद्धिमान्, नम्रः, कार्यदक्षः, सत्यसन्धः, गजवैद्यविषये चतुरः, विज्ञानवान्, गजमनोभिलाषज्ञानी च भवेत् । तस्य सहकारिणः अपि एवमेव भवेयुः । [338]

हस्तिपानां, तेन साकं कार्यं कुर्वाणानां कर्मकराणाञ्च गुणाः कौटिल्येनापि चिन्तिताः । [339] हस्तिपस्तु स्वकार्ये निष्णातः स्यात् गजानां पालने, शिक्षणे च । सः गजस्य सर्वाण्यपि कार्याणि जानीयात् । सः सर्वदा शान्तः, चतुरः, उत्तमयोद्धा, श्रेष्ठः आधोराणकश्च भवेत् । तस्य साहाय्यकाः गुणवन्तः, शुद्धात्मनः, कुशलकर्मचारिणः आज्ञापालकाश्च भवेयुः ।

गजरक्षकलक्षणमित्यङ्किताध्यायस्तु गजाधिकारिणां गजवैद्यस्यच आधोराणकस्य तत्सहकारिणश्च कर्म ब्रुवन्ति ।

---

[338] कौटिलीय अर्थशास्त्रम्, अध्यक्षप्रचारो नाम द्वितीयमधिकरणम्, तत्र हस्त्यध्यक्षो नाम त्रिंशत्तमोऽध्यायः पृष्टसङ्ख्या १७४ - १७६; एवम् हस्तिप्रचारो नाम एकत्रिंशत्तमोऽध्यायः, पृष्टसङ्ख्या १७६ - १७८ ।

[339] कौटिलीयार्थशास्त्रस्य हस्त्यध्यक्षः इति ४८ प्रकरणस्य ३१अध्यायः ।

एवं पालकाप्यजननमेवात्यन्ताश्चर्यकरं विद्यते । आदि हस्तिपः भूलोके स एव प्रायः । अन्येऽपि गजशास्त्रसम्बन्धिताः ग्रन्थाः हस्तिपालकानां विषये गभिरतया विवृण्वन्ति ।

मातङ्गलीलायाम् -

अस्याः कृतेः अन्तिमाध्यायः आधोरणगुणाद्यधिकारः इत्यङ्कितः ।[340] विविधानां गजानां भिन्न-भिन्नस्वभावान् कथयन्नाधोरकाणां कर्तव्यमाधोराणां कर्मविधानञ्च ज्ञापयन् कृतिकारः पुनः एतानंशान् प्रकटयति यथा -

१. गजाः त्रिविधात्मकाः

२. तेषां चालनं त्रिविधं

३. त्रिविधगतयः

४. पुरतः उपवेष्टुं त्रिविधाः

५. पृष्टतः उपवेशनं पञ्चविधाः

६. षड्विधाङ्कुश-चालनम्

७. गतिविषये विपर्ययः पञ्चविधः

८. गजारोहणमष्टविधाः

९. गजावरोहणं दशविधाश्चेति ।

उपर्युक्तैस्सहाधोरकाणां विविधस्वभावाः, गजानां भाषा, गजपालनविधयः, गजानां विविध मानसिकावस्थासु नियन्त्रणं, पादैश्चालनम्, अङ्कुशस्य साहाय्येन चालनमित्याद्याः अत्र वर्णिताः ।

आदौ नागाध्यक्षस्य गुणानुक्त्वा अग्रे आधोराणानाम् गुणान् कथयति । नागाध्यक्षस्य एते गुणाः सन्तु - चातुर्यं, राजवद्धर्मिष्ठः, स्वामिनिष्ठः, सदाचारयुक्तः, प्रामाणिकः, अदुष्टः, जितेन्द्रियः, चारित्र्यवान्, उत्साही, अभ्यासात् परीक्षितः, सुष्ठुवाग्व्यवहारसम्पन्नः, श्रेष्ठगुरुणा प्राप्तविद्यः, दृढः, हस्तिशुश्रूषाविशारदः, निर्भयः सर्वज्ञः (गजविषये ?), हस्तिशिक्षणक्रमज्ञः, अङ्कुशादीनां शस्त्राणां प्रयोगे निष्णातः, देशकालादिज्ञः (हस्तिविषये), समदगजानां यन्त्रणे कृतपरिश्रमः, आरोहणावरोहणेषु चतुरः, शान्तमनस्कः, गजजीवितस्य विविधानामंशानां ज्ञानी, एतैस्साकं गजानां दोषज्ञः

---

[340] मातङ्गलीलायाः १२तमोऽध्यायः आधोराणानुद्दिश्य वर्तते । अस्मिन्नध्याये ३१ श्लोकास्सन्ति ।

अपि । एवं पूर्वसूरिभिरुक्तम् । [341] हस्तिपानां विधत्रयमुक्तम् । गुणैस्साकमेते एवं वर्णिताः ।

| विधः | गुणः | विशेषः |
|---|---|---|
| रेखावान् | गजस्य स्वभावानुसारं स्वकार्यं सर्वं साधयति | उत्तमः-अपेक्षितः |
| युक्तिमान् | स्वस्वभाव-गजस्य च स्वभावानुसारं कार्यं साधयति | मध्यमः - अपेक्षितः |
| बलवान् | स्वस्वभावस्वशक्तिसामर्थ्यानुसारं कार्यं साधयति | अधमः - वर्ज्यः |

कोष्टकः - ४१

आधोराणामेते गुणाः अपेक्षिताः - आरोहणावरोहणेषु चतुरः, गजानां स्कन्धभागे वा पृष्टभागे भूत्वा तेषां चालनेपटुत्त्वम्, वाचा, पादनोदनया, उपकरणैस्सह तेषां मार्गेऽरण्येषु वा गमनधावनयोः चतुरः, व्यावर्तने, निःस्थाने वा शीघ्रः, परवारणैस्साकं युद्धे वा, दुष्टगजानां झटितियन्त्रणं, मदयुक्तानां गजानां वशीकरणं करिभिः, धारणार्थमनिच्छानां गजानां धारणयोग्यान् विधातुं सामर्थ्यमित्यादयः । [342]

अस्मिन्नध्याये चर्चिताः विचाराः एवं सन्ति - गजाः त्रिविधाः; प्रणिधयः - तिस्रः; गतिप्रक्रियाः - तिस्रः; प्रस्फुटमासनानि - त्रीणि, पुरतः - पञ्च ; पश्चात् - पञ्च ; अङ्कुशचालनं - षड्विधाः ; गतिगतभेदाः - पञ्चविधाः ; आरोहणम् - अष्टविधम् ; अवतारक्रमः - दशविधाः । गजशिक्षासन्दर्भे अत्रत्याः सर्वे अंशाः तत्र चर्चिताः । आधोराणकाणां विषये गजशिक्षा इत्यस्मिन्नध्यायभागे एवोक्तम् ।

गजशास्त्रयोः हस्तिपानां विचारः

पालकाप्यगजशास्त्रस्यान्तिमभागः सृणिघातलक्षणमिति । अस्मिन् सप्तश्श्लोकास्सन्ति । सृणिपार्श्वेन घातः - ताडितः इति कथितः । तथैव आराघातः - तोदः; कराभ्यां उत्क्षिप्य क्षिप्तं - उत्क्षिप्तम्; एवमेव द्वादशाश्रयाः सृणिघातस्य यथा - कुम्भाग्रे (विदुः), वितानके - (विदोः अधः), निदानं (वितानावग्रहाभ्याम्), श्रोत्रसन्धिः (कर्णाग्रशिरसः सन्धिः), कर्णसन्धितः, कर्णमूलकम्, तोदना (कर्णमूले) इति । [343]

---

[341] मातङ्गलीलायां द्वादशोऽध्यायः १-२ श्लोकौ
[342] मातङ्गलीलायां द्वादशोऽध्यायः ३ - ५ श्लोकाः ।
[343] पालकाप्यगजशास्त्रस्य दशमप्रकरणस्य श्लोकाः - १४६तः १५१ पर्यन्तम् ।

(व्यास) गजशास्त्रेऽयं भागः नास्ति, हस्तिपानां विचारश्च नास्त्यत्र ।

गजशिक्षायां हस्तिपानां विचारः -

परम्परया ये हस्तिपालनं कुर्वन्ति, उत्तमगुणयुताः गजकर्मसु नियोजिताः भवेयुः राज्ञा । आधोराणेष्वेते गुणास्सन्तु - प्रज्ञावान्, गजवात्सल्ययुतः, गजभाषावगन्ता, शूरः, दृढमनस्कः, गजस्य चेष्टादयः, अपेक्षाश्च स्वयं जानीयुः तेषां प्रदर्श्यमानैः कर्मभिः, युक्तायुक्तविवेकी, क्रोध-लोभाद्दूरस्थितः, गजानामाहार-विहारविचारेषु स्पष्टज्ञानी, कालज्ञानी स्यात्, गजोपकरणानां चालने निष्णातः, गजं पालयितुं बद्धादरः, गजं सम्यक् गतिं पाठयितुं समर्थः, मृगयासक्तः, दण्डनादिकर्मसु योग्यः, विविधकुलगजानां स्वभावज्ञः, गजचिकित्साज्ञानी, भूपतेः अपेक्षानुसारं कार्यकर्ता, क्लेषसहिष्णुः, वनस्य विविधानां वृक्षाणां वेत्ता, गजाः कस्मिन् मार्गे कदा-कुत्र-कथं गच्छेयुरिति मार्गज्ञः, कार्यदक्षताभरितः, सामर्थ्यवान् च ।[344] एवमेव वीरभटानां, हस्तिपालकानां साहाय्यकाः अपि भवन्त्विति कथयति नारदः इन्द्रम् ।

एतैस्साकं हस्त्यायुर्वेदग्रन्थोऽपि आधोरणानामन्यकर्मकराणाञ्च विषयं विषदीकरोति । आधोराणणस्तु धार्मिकः (कर्मबद्धः), इन्द्रियशुद्धः, ज्ञानवान्, अनसूयः, सात्त्विकः, अन्यैः कर्मकरैः व्यवहार कुशलः, व्यसनमुक्तः, निष्ठः, समयप्रज्ञः, मधुरवाक्, मृदुवाक्, बलान्वितः-उत्साही च, अकृतघ्नः निर्लोभी, समर्थः, राजाज्ञापालकः, शुभनामधरः, हस्तिशास्त्रविशारदश्च भवेत् ।[345] सः एतेषु कर्मसु कुशली भवेत् -

(अ) गजशिक्षणविधानानि (आ) दण्डाङ्कुशयोः सम्यक् प्रयोगेषु

(इ) गजशक्तिज्ञानधारकः (ई) गजेभ्यः सूक्तकालः क्षेत्रञ्च (ऋत्त्वनुगुणम्)

(उ) मदस्रावसन्दर्भेऽपि गजस्य पालनम् (ऊ) गजारोहणेऽवरोहणे च कुशली

(ऋ) शान्तः, गजस्य जीवनस्य सर्वदशाः अपि जानीयत्

---

344 हस्तिशिक्षायाः षष्टः पटलः ८तः १२तम श्लोकपर्यन्तम् ।

345 गजरक्षणविन्यासाध्यायो नाम पञ्चमेऽध्याये, श्लो.सं. ३९ -४३ ।

(ऋ) गजस्य मर्मस्थानानि सम्यक् जानीयत् ।

गजसाहाय्यकैः करणीयानि-

दिनान्ते गजानां कर्म समाप्य गजशालागमनोत्तरं सायंकाले तेभ्यः विश्रान्तिः देया । तेभ्यः पेयजलं प्रदाय स्नापयित्वा तत्कालीनानाहारान् दत्वा मुक्ततया चारणीयाः (सबन्धः) । साहाय्यकस्तु रात्रावप्यावश्यकप्रमाणे रात्रिकालीनाहारं चारणं च सुष्ठु दद्यात्।

प्रभाते पुनः, समये एव, उत्थाय सर्वेऽपि गजाः स्वचारणस्थानादानीताः अपेक्षितसन्दर्भे । तेभ्यः प्रभातकालीनस्नानं दत्त्वाहारकारजलादीनपि प्रदाय कर्मणि योजनीयाः । कर्मणे योग्यानेव गजान् प्रेषयेत्सः । येषामुदरदोषाः, अतिसारः, सन्धि-स्नायुवितानादिभिः ये दूषिताः ते न प्रेषणीयाः । ते रोगमुक्तान्, कार्यं कर्तुं समर्थाञ्च गजान् रोगबाधितान्, कार्यदूषिताञ्च गजान् च विभज्य रुग्णान् कर्मणे अयुक्तान् च गजान् गजवैद्यकं प्रति प्रेषयेत् । [346]

जलस्याहारस्यौषधावस्तूनि वा ये गजेभ्यः अत्यवश्यं तत्सर्वमपि निरन्तररूपेण परिकल्पनीम् । पाकशालायामावश्यकसर्वपाकवस्तुसञ्चयः (पूर्णाहारं प्रापयितुं गजेभ्यः), विविधौषधमिश्रणानि, आरोग्यपेयानि, जलस्थानं - पानार्थं स्नानार्थञ्च, आलानस्तम्भाः गजान् बद्धुं, गजानामलङ्करणं, घण्टा, बन्धितुं रज्जुः, नूपुराणि, अन्यालङ्कारसाधनानि च गज-शालायाम् उपयोगार्थं सिद्धं भवेत् सर्वदा ।

गजानां पालनाय अनेकान्युपकरणान्यप्यवश्यकानि । पालितगजस्योपर्यनेकानि वस्तूनि दृश्यन्ते यथोक्तं पूर्वम् । एतानि विहाय गजेभ्यः इतोऽप्यनेकानि वस्तून्युपयोगाय भवन्ति । [347]

---

[346] कौटिलीयार्थशास्त्रम्, द्वितीयाधिकरणम्, हस्त्यध्यक्षः, हस्तिप्रचारो नाम ३२तमोऽध्यायः ।

[347] गजसंहिता नाम कन्नडग्रन्थे यस्मिन् गजानामाधुनिकपालनविचाराः एवोपस्थापिताः एषां वस्तूनां विस्तारतया विवरणं कृतं दृश्यते पृष्टसङ्ख्या १११तः ११८ पर्यन्तम् ।

कौटिल्यः अस्मिन् विषये स्वविचारमुपस्थापयति वस्तूनां पट्टिकया सह । गजवैद्याः गजान् यन्त्रितुं उपयुज्यमानानां रज्जूनां विषये निर्णयेयुः । आलानस्तम्भाः, ग्रैवेयाः, गात्रिकाः, वल्गः, पादनिगडाः, शरीरस्य मुखभागं बन्धितुं निगडाः, तथैव अन्यबन्धकवस्तूनि चात्रोपयोगाय भवन्ति। अङ्कुशः, वेत्रदण्डः, यन्त्राणि च अन्योपकरणानि । कण्ठीहाराः यथा वैजयन्ती, क्षुरप्रमाला इत्याद्याः गजाभरणानि । वर्मा, तोत्रम्, तूणीरादयः युद्धाय उपयुज्यमानान्युपकरणानि ।

एवमस्मिन् भागे गजपालकेन गजस्य पालनाय ध्रियमाणानि वस्तूनि, गजशालायां विद्यमानानां वस्तूनां विवरणञ्चात्रोपलभ्यन्ते ।

५.३ गजचर्या

गजानां ग्रहणोत्तरं तेषां पालनं पोषणञ्च अत्यन्तमवश्यकम् । अतः तदभ्यासाः, तस्य गुणाः, तस्यस्वभावाः, तस्यरोगाः तदुपचाराः इति सर्वेऽपि विचाराः ज्ञातव्याः । प्रथमं गजस्य स्वभावादिकं ज्ञातव्यम् । तस्याहार-विहार-जलपान-कोप-रव-शक्ति-दौर्बल्यानि च सम्यक् ज्ञातव्यानि । तदाधारेण तेषां दिनचर्या निश्चेतव्या । वनेवसतां गजानामाद्यं कर्म भवत्यदनम् । अतः निरन्तरं चरणमनिवार्यम् । विशेषकर्माभावात्तेषामटनादनपानसम्भोगादिकर्माण्येव स्वजीवनमिति यापयन्ति ते । परं गृहीतगजानां व्यावहारिकलोकागमनकारणैर्विभिन्ना भवन्ति तेषां दिनचरी । स्वनित्यकर्मभिस्सममाधोरकैर्क्रियमाणान्यपि कर्तव्यानि । तैरपेक्षितं कार्यं संसाधयितुं हस्तिपाः तान्तोषयितुं, यन्त्रितुं वा किञ्चिदिव गजज्ञानमपि प्राप्तव्यम् । गजः प्रसन्नस्सन् कार्यं यदि वा कुरुते हस्तिपस्य व्यावहारिकलाभः, उत्साहवर्धकश्च । गजः यद्याधोरकैः भोज्य-पेयादिविषये, स्नान-शयनादिविषये, स्त्री-स्थानादिविषयेषु तृप्तश्चेत् कर्माण्यपि सुखेन कुर्वन्ति । एवमुभयोरपि कार्यसिद्धिः । एवमस्मिन्नध्याये पूर्वोक्तचतस्रषु कृतिषु गजानां दिनचर्यार्तुचर्या च चिन्तिते स्तः ।

दिनचर्या नाम गजानां दिनस्य कार्ययोजना । प्रतिदिनं गजानामाहार-विहारादिचिन्तनेन सह तेषां व्यायामः, कारणीयं कर्म इति सर्वमपि ज्ञातं भवति ।

गजानां शक्तिः तेषामाहारादिभिरेव सिद्ध्यतीति कारणेनास्मिन्विचारे तेषां जीवनस्य चर्या - विशेषतया दिनचर्या - ऋतुचर्याच प्रमुखे भवतः ।

कौटिल्यस्यार्थशास्त्रं गजानां विशिष्टां काञ्चिद्दिनचर्यां संसूचयति ।[348] दिनस्य प्रथमः सप्तमश्च कालावधी (अष्टसु) गजानां स्नानसमयः । तयोस्समनन्तरकालः भोजनाय । पूर्वाह्णे व्यावामावकाशः । अपराह्णे पानकालः । रात्र्याः अवधिद्वयं निद्रायै । गजस्य रात्रिकालस्य त्रिष्वेकः कालखण्डः जागृतावस्थायां विश्रान्त्यर्थम् ।

सप्तारत्न्युन्नतगजेभ्यः निर्दिष्टाहारप्रमाणं नाम द्रोणप्रमाणकतण्डुलम्, अर्धाढकं तैलं, प्रस्थत्रयं घृतं, दशपललवणं, पलपञ्चाशन्मेदश्चेति । पुनरेकाढकरसः (आढकद्वयप्रमाणकं दधि वा), पेयस्यरुचिवर्धनार्थं दशपलप्रमाणकक्षारम्, आढकमात्रां सुरां आढकद्वयप्रमाणं पयः वा योजनीयम् । प्रस्थमात्रप्रमाणं तैलं देहस्य लेपार्थम्, अस्य अष्टमो भागः शिरसि संश्लेपणार्थं, तथा गजशालायां दीपप्रज्वलनार्थमवश्यकम् । भारद्वयप्रमाणकघासः, (पलद्विसहस्रकं भारः) सपादभारद्वयमात्रः शष्पः, सार्धभारद्वयमात्रं शुष्कतृणम्, विविधानां सस्यमृदुकाण्डाश्च प्रदेयाः । मदयुक्तस्यात्यरालस्य अष्टारत्न्युन्नतगजस्य कृते वा सप्तारत्न्युन्नतस्य गजस्य प्रमाणकभोज्यमेव प्रदेयम् । षट्, पञ्चारत्नियुतानां गजानां वा यथाप्रमाणमाहारः देयः । क्रीडार्थमेवगृहीतस्य बिक्कस्य (गजशिशोः) आहारः क्षीरं घासश्च स्यात् ।

नीलकण्ठस्य मातङ्गलीलायां गजरक्षणादिनर्तुचर्याधिकारः [349] गजानां नित्याभ्यासान् च भृशं वर्णयति । अस्मिन्नध्याये गजानां पालनं, दिनचर्या, ऋतुचर्यादिविषये सुदीर्घतया चिन्तनं दृश्यते । अत्र चर्चिताः अंशाः एवं सन्ति ।

गजानां नित्याभ्यासाः शारीरक-मानसिकव्याधयः बन्धनात् नित्यावश्यकानि वस्तूनि, नित्याहाराः प्रमाणानि च नवगृहीतान्, बद्धान् च गजानां आहारदानसमयः,

---

[348] कौटिलीयार्थशास्त्रस्य ४८तम प्रकरणं, ५३तमोऽध्यायः, गजाध्यक्षः ।
[349] अयं मातङ्गलीलायाः एकादशतमः पटलः यस्मिन् ५१ श्लोकास्सन्ति ।

स्नानविषयः, गजानां शिक्षणं, नित्यव्यायामाश्च, सामान्यौषधयः निद्रा,व्यायामः, लेपनं तेषां सम्परिपालनाय च ।

सामान्यतया अरण्यवासिनः गजाः स्वनित्याभ्यासैः स्वारोग्यरक्षणाय स्वाधिकारादाहारं चित्वा भक्षयन्ति । परं बद्धगजाः अपेक्षिताहाराप्राप्तितः दुर्बलाश्च भूत्वा विविधेभ्यः रोगेभ्यः स्थानं भवेयुः । अतः बद्धानां गजानामारोग्यरक्षणविषये विशेषचिन्तनमवश्यकम् । ऋतु-परिवर्तनकालेतु एतदत्यन्तमवश्यकम् । ऋत्त्वनुसारं तेषां दिनचर्यायामपि परिवर्तनं भवति ।

बद्धेन गृहीतगजेन च हस्तिपस्य परुष-कठिण-निन्दावचनानि श्रोतव्यानि भवन्ति । अधिकदुःखभयादिभिः मनस्येव स्वक्लेशमनुभवन्तः ते बहुकालपर्यन्तं बन्धनं सोढुं न पारयन्ति । वनजीवनस्य पर्वतविहारं, नदी-तटाकजलं, विविधसस्यप्रभेदं, तत्र तत्र क्रीडितं स्वगजवृन्दैः, काननस्यानुभूतान्सुखानुभवान् स्मरन्तः, बन्धनस्य कष्टानपि तत्साकं तोलयन्तः बन्धने वेदनामयं जीवनं यापयन्ति । अतः कदाचित् बद्धेभ्यः गजेभ्यः इक्षुकाण्डकवलमपि न रोचते । कदाचित् नवगृहीताः गजाः एतस्मिन्नेव दुःखे म्रियन्ते च स्वेषामस्थां स्मरन्तः । स्वकर्णयोः वीजनं स्थगयित्वा, निश्चललाङ्गूलाः, अत्यन्तं श्रान्ताः मनुष्यलोकेजीवन्तः, नेत्रे उत्क्रामतः, पृष्टे-नाभौ-शरीरस्यान्येषु भागेषु च शूलमनुभवन्तः, नाभिनन्दत्याहारं, विश्रान्तिं, नावजानन्ति चिह्नानि आधोराणकाणां । एवमेतादृशाः गजाः स्वयमेव दुःखितमानसाः भूत्वा वेदनामनुभवन्ति स्वस्मिन् ।

जलेऽवगाहेन ते नितरां तुष्टाः भवन्ति पुनः पांसुभिः । अतः जलं नाम जीवः गजेभ्यः । अतः तान् जले तान्निमज्जयेयुः मुक्ततया येन पुनः तेषां त्रिगुणाः शान्ताः भवन्ति । तेषां कृते प्रभाते जलेनिमज्जनं, श्रान्तियुतकार्योत्तरञ्चैवं जलावगाहनेन, पातुं यथेच्छं जलदानेन च ते स्वायासं विस्मरन्ति । बन्धने एव ते रात्रिं यापयेयुः । पुनः ते शतश्शुद्धघृतेन लिप्ताः भवन्तु । स्नानोत्तरं तान् सूपनवनीतमिश्रिततण्डुलयूषेण परिपोष्य मधुरपेयं, गजप्रियाः इक्षुकाण्डाश्च दातव्याः । तेषां शयनस्थानं, उपयुज्यमानं जलं, व्यायामं, औषधोपचारं, चूर्णैः तेषां शरीराणां संस्कारं, आलानानयनं,

घृतगुडमिश्रिताहारं, स्नानं, पानजलं, अपराह्ने स्नेहयुक्तं भोज्यं, औषधोपचारं, रात्रौ निद्रां, विश्रान्तिञ्च संवीक्ष्येत क्रमशः । यतो हि अयंक्रमः गजचर्यायाः । गजाः उत्पलनालैः अन्यैश्चमृणालैः, कदलीभिः, भक्षणीयोत्पलमूलैः, शालूक-शृङ्गाटक-दूर्वाभिः, उदुम्बर-सल्लकीशाखाभिः, इक्षुदण्डैः, वटवृक्षस्य पर्ण-फलैः, वंशैः, प्लक्षाश्वत्थ-वृक्षाणां पर्ण-किसलयैस्साकं परिपोषणीयाः । तेषां श्रान्तिनिवारणार्थं मधुरखाद्यान्यपि प्रदेयानि यत्तेभ्यः बहुरोचन्ते । [350]

घृतेन पोषणं गजेभ्यः अत्यवश्यम् । अमीभ्यः गजेभ्यः घृतदानमवश्यकम् -

१. रुष्टेभ्यः, अश्रुपूर्णनेत्रेभ्यः, बिक्केभ्यश्च । २. बहुकार्यकरणात् अतिगर्हितेभ्यः।

३. कृशपादेभ्यः, क्षीणदेहिभ्यः । ४. सततप्रवासेन श्रान्तेभ्यः ।

५. वृद्धेभ्यः, करिणीनां सख्यं न इष्यन्ते तेभ्यः,

६. तेभ्यः ये स्वरुधिरमांसादीनाञ्च व्यातर्थ्यं च प्रदर्शयन्ति, मदप्रमाणेऽपि क्षैण्यमेषां तेभ्यः। ७. असहायकेभ्यः, गृहीतपादेभ्यश्च इत्येतेषां कृते । [351]

गजेभ्यः देयाहारप्रमाणन्तु अन्यानप्यंशानवलम्बन्ते यथा नवगृहीतगजशिशोः कृते प्रदीयमानम्-आहारप्रमाणं घासमिश्रितमन्नं प्रदातव्यम् । क्रमेण तदाहारं दिनं प्रत्यदधिकं दातव्यं भवति गजपालकानामपेक्षया । एवमेव तेभ्यः नवगृहीतेभ्यः यथाकालम् इभेक्षितप्रमाणेन विविधाहाराः प्रदेयाः ये तु यवस-गुड-नवनीत-एलादिभिः मिश्रिताः ।

एवमेव गजेभ्यः आहारदानस्य कालोऽपि प्रमुखः । प्रभाते तेषां स्निग्धं घासश्च अर्धाढक- प्रमाणकम् । इदं उत्तमवयसिस्थितगजेभ्यः । मध्यवस्यस्कगजेभ्यः अस्मात् १/४ प्रमाणं न्यूनम् । वृद्धावस्थायां वर्तमानेभ्यः गजेभ्यः प्रमाणमिदमितोऽपि १/३ न्यूनम् । एवम् आहारदानात्तेषां शक्तिवर्धनार्थं, मदसंवर्धनार्थं, द्रुतचलनसौकर्यार्थं,

---

[350] अयं विषयः मातङ्गलीलायाः एकादशतमोऽध्यायस्य नवमश्लोकपर्यन्तं वर्तते ।

[351] अत्र ज्ञापनीयः यत् नीलकण्ठः केरलीयः इति बहूनामभिप्रायः । अयं श्लोकः इति ब्रूते कलिङ्गेश्वरः इति समाप्तिं गच्छति। इत्यत्र प्रायः नीलकण्ठस्य काले अन्येऽपि गजशास्त्रग्रन्थाः आसन्निति निर्णयः शक्यते ।

रोगोपशमानार्थमुपयुक्तं भवति ।

सर्वदा ज्ञातव्यमेतत् यदेतदाहारक्रमः स्वस्थगजेभ्यः एव । रुग्णेभ्यः, मध्यवयस्केभ्यः, स्वस्थगजादपेक्षया न्यूनाहारः प्रदेयः । गजशक्तिवर्धनानुगुणेन तेषां कृते आहारप्रमाणे संवर्धनं घृतेत्यादिनां च दानं भवेत् । गजाः ये एतैराहारैः पोषिताः भिन्ननखाः न भवेयुः, पादाः विभक्ताः न भवेयुः, मार्गेषु चलनेन पादस्य वेदना न भवेत्, नेत्रस्य दृष्टिशक्तिः वर्धिता स्यात् अवगाहनैश्च । स्नानैः तेषां चर्मव्याधयः, शस्त्राघातात्सम्भूतान्यव्रणानि, दाहेत्यादयः दूरे तिष्ठन्ति । यदि बाधिताः निवारिताश्च भवन्ति । पुनः जघनप्रदेशाः बन्धमुक्ताः भवन्ति, देहशक्तिः वर्धते, शरीरे मनसि च मार्दवं, सुखं चानुभवति गजः । घृतलेपेन तेषां दृष्टिशक्तिः नितरां वर्धते, नेत्रे निरोगिनी भूत्वा तीक्ष्णा च भवति । दन्ताभ्यां लेपनेन दन्तौ दन्तमूले च इतोऽपि दृढौ भूत्वा, वक्रौ न भवतः, दन्तयुद्धाय समर्थाः भवन्ति ।

लवणादनेन गजस्यान्तरिकशरीरभागाः शुद्धी भवन्ति । पुनः कृमिघ्नः, वातरोगहरः, ज्वरादीन् नाशयति, जीर्णशक्तिवृद्धिकारकश्च । प्रातः कालीनाहारेषु लवणं वर्ज्यं परमापराह्णिके तस्य स्वीकरणेन जीर्णप्रक्रियाचोदकम् । घृतक्षीरशर्करामिश्रिताकट्वाहाराः गजेभ्यः पुष्टिदायकाः । क्षीरदानमुपयुक्तम् । प्रातःकालीनाहारेषु प्रदीयमानं तण्डुलादिकमप्युपयोगायैव । परं चत्वारिंशत्सु वयस्सु विद्यमानेभ्यः कल्याणगजेभ्यस्त्वाहारनियमाः भिन्नाः भवन्ति । तेषां वात-कफेत्यादीनां निहन्तुं प्राभातिकेऽऽहारे किं किं दातुमिति कृतिकारः विषदतया विवृणोति ।

गजानां स्वास्थ्यवर्धनाय क्रियमाणासु कर्मसु योग्यायोग्यविवेचनं दृश्यते पालकाप्य-विरचित हस्त्यायुर्वेदग्रन्थे । पूर्वोच्चरितगुणविशिष्टः अयं ग्रन्थः गजानां रोगाणां लक्षण-निवारणोपायान् सम्यक्तया सविवरणं निरूपयति । ग्रन्थस्य प्रथम-द्वितीयस्थाने गजानां महारोगाणां क्षुद्ररोगाणाञ्च विस्तृतं विवरणं प्रस्तौति । तृतीयस्थानं तु गजानां शल्य-विचरमुपस्थापयति । परं चतुर्थं स्थानं यदुत्तरमिति भणितं गजानां

विविधानामुपचाराणां विवरणं प्रयच्छति । रोमपादाय राज्ञे पालकाप्यः सर्वानपि विषयान् विवृणोत्येषु चतुर्षु स्थानेषु ।

आदौ प्रथमस्थानस्य महारोगस्थननामकस्य वनानुचरिताध्यायः इति नामाङ्कित्ते प्रथमेऽध्याये एव गजानां दैनन्दिनाभ्यासविषये बहुदीर्घं वर्णनं दृश्यते । द्वितीयतृतीयाध्यायौ च एषां दिनचरीमुद्दिश्यैव रचितौ । द्वितीयाध्यायस्य नाम अन्नसमाचाराध्यायः । अस्मिन्नध्याये गजानां विविधाहाराः, तेषामिष्टानिष्टाः, यदा गृहीताः तेषां पालनमित्यादिकं वर्णितम् । ऋत्त्वनुसारं गजानां मानानुसारेण च तेषां कृते दीयमानानामाहारप्रमाणानां निर्धारः क्रियते । पयः, घृतं, दधि, तण्डुलं, गुडं, विविधलवणानि, अनेकप्रकारकघासौषधयः, धान्यानीत्यादीनामुपयोगः प्रदत्तः तेषां गजस्य परिणामं संलक्ष्य । विविधाहारस्वीकरणात् सम्भाव्यमानानां वात-पित्त-कफविकाराणां वर्णनं दृश्यते । एषामाहाराणां मधुराम्लतिक्तादिरसाणां विविधाः परिणामाः अत्रोल्लिखिताः । कृतिकारः गजानां जलस्यावश्यकतामपि ब्रवीति । गजानां जलावश्यकता कारणद्वयाद्यथा - पानार्थं स्नानार्थञ्चेति । जलमेतद् गजानां उष्णीकृतशिरसां शैत्यमुपैति । ऋत्त्वनुसारं तेषां कृते स्नानाय शीतजलमुद्दिष्टम् । एवं गृहीतगजानां दिनचर्याविषये पालकाप्यः सम्यगुपदिशति ।

गजाः अरण्येषु सुखेन चरन्तः विविधान् घासान्, ओषधीन्, फलानि च प्रतिदिनमिव आस्वादयन्ति । तादृशसौख्येन जीवन्तः गजाः यदा मनुष्येन बद्धाः महद्दुःखिताः भवन्ति पूर्वसुखं स्मरन्तः । अरण्येषु बहुदीर्घं वसन्तः एते गजाः मनुष्य-निर्बन्धितस्थानेषु भूत्वा तत्सुखमनुभोक्तुं नैव शक्नुवन्ति । अतः तेषां ग्रहणोत्तरं वैद्यैः, सचिवैः ये गजज्ञानविचक्षणाः तैश्च गजानां सम्यक्पालनं करणीयं शास्त्रानुसारम् । ग्रहणोत्तरस्य सद्यःकाले एव दुःखावर्तिताः गजाः कदचिन्म्रियन्ते च । वनस्य परिसर इव स्वातन्त्र्यं वा कदाचिन्मानुषप्रदेशेषु न लभ्यते इति कारणेन तेषां शरीरे विद्यमानाः त्रिगुणाः (त्रिदोषाः वा) गजारोग्यं विनाशयेयुः कदाचित्, यतो हि तेभ्यः गजेभ्यः मनुष्यैर्दत्ताहाराः न रोचेरन् । यद्येवमेव इष्टाहाराः यथेच्छं बहुदिनपर्यन्तं न लप्स्यते

तेभ्यः, तर्हि तेतु इतोऽपि व्याधिग्रस्ताः भवेयुः । एतेन गजाः रुग्णाः भवितुमर्हन्ति अल्पाहारात्, अनपेक्षिताधिकाहारात् दुःस्स्थानशयनाच्च । [352]

बन्धनात् प्रायः अनिष्टभक्ष्यभोजनात्, आलाने बन्धनात्, सन्ताडनात्, लवणमाधिक्येन भक्षणात्, लवणस्य न्यूनत्वात्, वात-पित्त-कफानां असमतोलनात् गजानां रोगाः अपि भवितुमर्हन्ति । कदापि दुखिताय गजाय घटाद्वा जलं पानाय न देयम् । तद्विपरीतं तादृशं गजं जलसेचनं प्रदाय जले आरात्रं भवितुं व्यवस्थाप्य तेषां दुःखोपशमनं करणीयम् । शीतजल-प्रभावेण ते वनस्यानन्दं मनुष्यप्रदेशजीवनस्य सर्वामपि समस्याञ्च विस्मृत्य पुनः सन्तोषयेयुः । एतत्समनन्तरं तस्मै घृताभिषेकः देयमपराह्णे च तस्याशरीरं तेनैव घृतेन लेपनीयम् । शरद्ग्रीष्मौ चाविहाय गजेभ्यं दिने स्नानत्रयं दातव्यम् । तेषां कोपशमनार्थं वंशः, किसलयम्, ओदनं, इक्षुः, उत्पलनालं, वृक्षाणां मधुरत्त्वक्, कदलीफलमित्यादिकं भोजनीयम् । गृहीतेभ्यः गजेभ्यः वनानीतैराहारैस्साकं तत्रोपलभ्याहारवस्तुभिः विमिश्रीय भोजनीयम् । आदौ गृहीतगजाः घासेन, तण्डुलेन, फलैश्च कुडपमात्रं भोजनीयाः । प्रतिदिनमेतदधिकं कृत्वा गुडतण्डुलमिश्रिताढकपर्यन्तं ते भोजनीयाः । एतेन गृहीतानां जीर्णशक्तिः, सामर्थ्यञ्च वर्धते । एतैस्साकं लवणं तण्डुलञ्चाभ्यवर्ध्य गजाः पोषणीयाः आदिदिवसेषु । [353]

*तन्डुलान्मूत्रसंसृष्टान्परागांश्च गुडान्वितान् ।*

*लवणेन युतान्सम्यक् सततं दापयेद्भिषक् ।*

*काले जलावगाहं च यथर्तु समुपाचरेत् ॥* [354]

अस्यैव महाकृतेः तृतीयाध्यायः सात्म्यनिश्च्याध्यायः । अत्र सात्म्यं नाम किमित्युक्तम् यथा - *"सात्म्यं नाम महाराज यथैवाऽऽत्मा तथा स्मृतम् ।"*[355] इति स्पष्टं

---

[352] पालकाप्यगजशास्त्रं (त) नवगृहीतगजोपचारः इति गजशाश्त्रनुबन्धः इति गजशास्त्रस्य भागः ।
[353] गजशास्त्रस्य गजानुबन्धः इति भागस्य न्वगृहीतगजोपचारः इति विभागः ।
[354] गजशास्त्रानुबन्धस्य नवगृहीतगजोपचारस्य २१त्तमः श्लोकः ।
[355] हस्त्यायुर्वेदस्य महारोगस्थानस्य सात्म्यनिश्चयाध्यायो नाम तृतीयोध्यायस्य १८तमश्श्लोकः ।

निर्दिशति पालकाप्यः । अतः गजानामाहारस्वीकरणमत्यन्ततयाप्रमुखम् । वनस्थिताः गजाः न कदापि रुग्णाः भवन्ति यतो हि तेषामाहारक्रमं ते स्वयं जानन्ति । वने चरन्तीति कारणेनाहारप्राप्तिस्थानान्यपि सुष्ठु स्मरन्ति ते । स्वास्थ्यरक्षणार्थमावश्यक सुयोग्यप्रमाणेऽऽहारः (यो हि यथा अल्पः अपि न भवेत्, तथैव अधिकः अपि न भवेत्) यत्तु वैविध्यपूर्णः भवेत् ऋत्वनुगुणम्, नित्यं जलावगाहः, यावदवश्यकं तावज्जलं, एतैः स्वयं पोषणं कुर्वन्ति गजाः सुखेन कालं यापयन्ति च वने । परं बद्धाः गजास्तु सर्वदाङ्कुशचालनेन, परुषवचनैः, व्याधिपीडिताः भवन्ति । वनेषु मरणभयं विना नान्या भयं विद्यते गजानाम् । [356]

पुनरत्र धातुविपर्ययादेव रोगास्सञ्जायन्ते गजेष्वित्यायुर्वेदस्याभिमतम् । धातुविपर्ययः विविधाहारदोषात् । बन्धनात्, निर्बन्धात्, आहारात्, अनिद्रायाः, अल्पनिद्रायाः, करिणीवियोगात्, अतियन्त्रणात्, अतिनिर्बन्धात् स्वकार्येभ्यः, निरन्तरस्थानपरिवर्तनेन, ग्रहणात्, शिक्षाणाद्वा विविधाः रोगाः उपजायन्ते गजेषु । आहारादेव गजानां स्वास्थ्यं, शक्तिः, सौख्यञ्चेति ब्रह्मसृष्टिः । अतः एव ते प्रेषिताः देवतानां वाहनत्वेन न मनुष्योपयोगाय काननस्य सौन्दर्यमनुभवन्तः, वृक्षान् पातयन्तः, पर्णान्यास्वादयन्तः, घासं चरन्तः सुदृढाः, नीरोगव्याधिनः ।

गजारोग्येण सहितं तेषामिष्टानिष्टाहारविचारचर्चापि प्रावर्तिता तत्र । गजानामन्याहारैस्साकं प्राकृतिकैस्साकं पक्वाहारेष्वपि रुचिर्दृश्यते । [357] तेषां विशेषासक्तिः वर्तते इक्षुदण्डादने । [358] पालकाप्येन हस्त्यायुर्वेदग्रन्थे १४ अध्यायेषु विविधवयसि, विविधरोगावस्थासु, विविधर्तुषु गजानामाहारविषये एव उक्तम् ।

स्नेहपानाध्यायः इति कश्चिदध्यायः गजानां स्नेहस्य महत्त्वं तद्वाविचारञ्च निरूपयति ।

*सर्पिस्तैलं वसा मज्जा संस्कृताऽसंस्कृतं भवेत् ।*

---

[356] पालकाप्यहस्त्यायुर्वेदे गजानां मरणस्य पञ्चदशकारणान्युक्तानि । तानि शिखरात् पतनम्, पङ्के पतनम्, विषाहारसेवनम्, वयोऽग्निभ्याम्, कुपे पतनम्, अन्यैः गजैः घर्षणम्, ग्रहणम्, ताडित्स्पर्शनम्, सर्प-वृश्चिकादिदंशनं, वृक्षस्य पातनम्, अन्यैः क्रूरैः जन्तुभिः हननम्, शैशवावस्थायां मात्रा दूरीकरणञ्चेति ।

[357] गजशिक्षायां मानवांशगजानामुल्लेखः दृश्यते । पुनरत्र तमेव विषयं प्रस्तौति पालकाप्यः हस्त्यायुर्वेदे ।

[358] इक्षुकाण्डकबलीकरणं शिलागजेन - नीलकण्ठविजयचम्पू काव्यात् ।

*वारणेभ्यः प्रदातव्यं स्नेहजातं चतुर्विधम् ॥*

*सर्वौषधप्रयोगेभ्यः स्नेहपानं मतं मम ।*

*स्नेहपानं प्रशंसन्ति पूर्वाचार्याः मनीषिणः ॥* [359]

दोषनिवारणार्थमभ्यङ्गः अवश्यकः । वर्ष-हेमन्तयोः पानाय देयम्, वसन्तर्तौ वसा मज्जा च देये, शरत्काले घृतपानमिति निर्दिष्टम् । स्नेहस्य केचनानपेक्षिताः गुणाः अपि भवन्ति । स्नेहः स्थावर-जङ्गम इति द्विविधात्मकम् । [360]

*स्थावरो जङ्गमश्चैव द्विविधः स्नेह उच्यते ।*

*तस्य चैवं प्रयुक्तस्य विकल्पा बहवः स्मृताः।*

*सर्पिस्तैलं वसा मज्जा मेदो मांसं पयो दधि।*

*एवमादिविजानीयात्स्नेहजातं पृथग्विधम् ॥* [361]

अयमध्यायः पुनः स्नेहस्यावश्यकतां वदन् स्नेहदानाय योग्यः कालः, ऋतुश्च, स्नेहस्य परिमाणं विविध वयसि यथा कलभावस्थायां, मध्यवयसि, वृद्धाप्ये च स्पष्टीकरोति । [362] स्नेहपान-विध्यध्याये विविध घृततैलादीनां दानं गजानां विविधर्तुषु, तेषां योग्यायोग्यत्वानां वर्णनं, योग्यः कालः, घृततैलादीनां परिमाणं-परिणामं विविधजात्यवस्थायां विद्यमानानां गजानां, दानेन गजदोष-गुणचिन्तनमिति विविधमुखैः विवरणं दृष्टम् । [363]

अन्नपानाध्यायः /अन्नपानविधि-अध्यायः इति अध्यायद्वयं हस्त्यायुर्वेदस्य गजानां सामर्थ्यमौन्नत्यम्, प्रदेयाः चतुर्विधाहाराः उत्तम-मध्यम-अधमगजविधेभ्यः करिणीभ्यश्च, त्रिविधलेह्यम्, गुड-तण्डुलादीनां दानं परिमाणं-परिणामाश्च, सुरापानस्योपयोगाः-दुष्टत्त्वञ्च, दधि-क्षीरादीनामुपयोग-दुष्टत्त्वञ्च, शाली-यव-माष-गोधूमानामुपयोगः,

---

[359] श्लोकसङ्ख्या १२, स्नेहपानध्यायः, उत्तरस्थानम्, हस्त्यायुर्वेदः ।

[360] पालकाप्यहस्त्यायुर्वेदे ४/१/१२ ।

[361] पालकअप्यहस्त्यायुर्वेदे ४/१/५४ ।

[362] पालकअप्यहस्त्यायुर्वेदे चतुर्थस्थानस्य प्रथमाध्यायः यस्मिन् १६३ श्लोकास्सन्ति ।

[363] पालकअप्यहस्त्यायुर्वेदे चतुर्थस्थानस्य द्वितीयस्याध्यायस्य स्नेहपानविधिः इत्यस्यायं विचारः ।

तैलसेचनं शिरो-भागे, नेत्र-दन्तानामभ्यङ्गः, एषामुपयोगाः, इत्येते अंशाः भृशं वर्णितास्सन्ति । [364]

यवसाध्यायः इत्यस्मिन्नध्याये गजभक्षणार्थं दातव्य विविधघासानां परिचयः, परिणामाश्चोक्ताः । [365]

*पीतौषधिरसे काले आदित्यस्य गभस्तिभिः ।*

*प्राणसञ्जननार्थं च ग्रीष्मे सर्वं प्रयोजयेत् ॥*

*वर्षासु स्थलजं देयं जलजं च विसर्जयेत् ।*

*हेमन्ते जङ्गलं भूयः स्थलजञ्च महीपते ॥*

*वसन्ते तु तृणं दद्यात्कषायकटुकं रसे ।*

*ग्रीष्मे तृणं शेषमार्द्रं दापयेच्च गुडोदकम् ॥*

*कुल्माषमोदकं चैव सानुपानं प्रदापयेत् ।*

*प्रावृट्काले महाराज दापयेत् पिष्टमोदकम् ॥*

इक्षुदानविधिकथनं नामास्मिन्नध्याये गजेभ्यः इक्षुखण्डानामुपकल्पनमुत्तम-मध्यमाधमागजाधारेण कथमिति वर्णनं दृष्टम् । उत्तमगजेभ्यः ५०० इक्षुदण्डाः, मध्यमेभ्यः ३००, अधमेभ्यः २०० प्रदेयाः । नवगृहीताः गजाः बह्वभिलषन्ति इक्षुदण्डं कवलयितुमतः तेषां शिक्षणात् प्राक्, तेषां शक्ति-सामर्थ्यानां ज्ञानात् प्राक् काल-देशानुसारम् । ये बहुकालादद्दुर्बलाः, ये च पित्ताधिकाः, ये चाधिकौष्ण्येन बाधिताः, तेषां कृते इक्षुदण्डाः इक्षुरसः वा घृतेन साकं देयः । त्रिदोषबाधिताः (यथा कायस्थस्तम्भ-शिरस्तम्भ-मन्यास्तम्भ-मदक्षयादिषु), शिरोरोगस्य कारणेन अजीर्ण-बाधिताः, आहतभयान्विताः, नैरन्तर्येण ताडनेन बन्धनेन च बाधिताः, बहु श्रान्ताः, शरीराङ्गक्षीणाः, बहुगर्हिताः गजाः इक्षुदण्डप्रदानेन तुष्यन्ति, पुष्टिञ्च प्राप्नुवन्ति ।

---

[364] पालकाप्यहस्त्यायुर्वेदे चतुर्थस्थानस्य तृतीय-चतुर्थाध्यायौ ।

[365] पालकाप्यहस्त्यायुर्वेदे चतुर्थस्थानस्य सप्तमोऽध्यायः ।

इक्षुदण्डदानेन तेषां मनः वशीकर्तुमप्युपयोगाय भवति । गजाः अपि एतदभिनन्दन्ति । मदस्रावे यदा क्षयः जायते पित्तरक्तयोः क्षयस्य कारणात्, मेदो वर्धनेन तेषां वीर्यवर्धनेन क्षयनिवारणं शक्यम् । अतः घर्मकाले इक्षुदण्डदानं त्रिदिवसेष्वेकदा, वर्षाकाले सप्ताहे एकदा, शीतकाले दशदिनेष्वेकदा इक्षुदानं युक्तम् ।

अन्नपानगुणाध्यायः ऋतुचर्याध्यायो वा ऋत्वाधारेण गजेभ्यः दीयमानानामाहार-जल-अवगाह-स्नानानां वर्णनं चिन्तयति । एषां कृते योग्याः कालाः अपि वर्णिताः । [366] अस्मिन्नध्याये एतदप्युक्तं यत् भोजनोत्तरं तेभ्यः कस्मिन् प्रमाणे जलं देयमिति । एतदपि ज्ञापयति यदत्र का पूर्वजागृतिः भवेत्, तथा उक्तप्रमाणेन अस्वीकरणेन सञ्जायमानानां तत्समन्धितानां समस्यानां कारणानि च । [367]

कार्याकार्यविधि-अध्यायः इति नामाङ्किताध्याये गजेभ्यः आवश्यकलवणानि, जलं, दुग्धं, घृतमित्यादीनां, वसादीनाञ्च परिमाणादिकं वर्णयति । [368]

एतत्सर्वमपि गजस्य दैनन्दिनाभ्यासार्थं, गजानामारोग्यसंवर्धनार्थम् । एतान्विहाय विशेषसन्दर्भ-निमित्तमेषां गजानां सज्जता करणीया यथा युद्धम्, उत्सावादिभ्यः । एषां गजानां नैमित्तिकक्रियाकलापाः वार्षिकरूपेणदीयमानानां विविधानामौषधीनां द्वारेण परिहृताः भवन्ति । एते उपचारास्तु ऋत्वाधारिताः, गजारोग्याधारिताश्च भवन्ति ।

सुराप्रतिपानविध्यध्यायः - अस्मिन्नध्याये सुरादानेन उत्तम-मध्यम-अधमगजेषु सम्भविष्यमाणानि सुफलानि दुष्फलानि च सम्यग् वर्णितानि । सुरादानोत्तरं तेषां शमनार्थं दातव्याः ओषधयः, गुडदानं, विविधकालेषु प्रदातव्यानि लवणानि, पञ्चलवण-लाक्षारसयुक्तानां विविधसुराणां वर्णनमत्र दृश्यते ।

गुग्गुलु विधानाध्ययः- विविधर्तुषु गजेभ्यः दातव्यगुग्गुलुविचारः, विविधतैल-मिश्रितगुग्गुलु-परिणामाश्चात्र वर्णिताः ।

---

[366] पालकाप्यहस्त्यायुर्वेदे चतुर्थस्थानस्य चतुर्दशोध्यायः ।
[367] पालकाप्यहस्त्यायुर्वेदे चतुर्थस्थानस्य चतुर्दशोध्यायः, पृ.सं ६५३ ।
[368] पालकाप्यहस्त्यायुर्वेदे चतुर्थस्थानस्य षोडषोऽध्यायः ।

क्षीरदानविध्यध्यायः - अयमध्यायः गोमहिषीत्याद्यष्टप्राणिनां पयोविचारं सम्यग्वदति ।

किमर्थक्याध्यायः- आज्य-तैलादीनां प्रयोगः गजेषु, तेषां परिणामाश्चात्र चर्चिताः । [369]

परिचारक हेतुज्ञानाध्यायः- अस्मिन्नध्याये स्निग्धास्निग्धातिस्निघानामाहाराणां परिणामः, विरिक्त, दुर्विरिक्तेत्यादीनाञ्च सम्यक् वर्णनं दृश्यते । [370]

त्रिविध्यध्यायः यवविधौ, त्रिविधाहाराः तेषां संरोहणस्थानानि, तेषां गुणाञ्च कथयति। [371]

पथ्यापथ्य विचाराध्यायः- गजानां सत्त्व-शरीर-आयुर्विचारं कथयन्नयमध्यायः तेषां वातप्रकृति-पित्तप्रकृति-कफप्रकृतिञ्च पृथक्तया वर्णयति । [372]

हस्तिवर्धनप्रकारः गजशास्त्रस्य भागः इव विद्यमानः गजशास्त्रानुबन्धः इत्यस्य कश्चन विभागः ।अयमध्यायभागस्तु गजानां संवर्धनाय कारणीयान् यत्नान् सम्यगादिशति।

*पिष्टैर्मांसरसोपेतैरिक्षुकाण्डैस्सुधासमैः ।*

*शुक्लपूर्णेन्दुसङ्काशैश्शालियूषैर्मनोहरैः ॥ ३ ॥*

*नवगोधूमकुल्माषैर्यवनालैः फलान्वितैः ।*

*द्विकालं जलपानैश्च तत्तत्तोयावगाहनैः ॥ ४ ॥*

*मृत्तिकामृदुशय्याभिः पांसुक्रीडनकैरपि।*

*प्रीणयेद्द्विरदान्नित्यं यथा तुष्टा भवन्ति ते ।५।* [373]

गजानामारोग्यसंवर्धनार्थं, तुष्ट्यर्थञ्च तेभ्यः स्वादुयुक्ताः, शरीरसंवर्धकाः, विविधाः आहाराः, फलानि, काले काले जलं, अवगाहः, मृदुशयने शयनं, पांसुदानं भवेत् । गजाः अरण्येषु स्वच्छन्दतया यथा रोचते तथा जीवन्ति । परं मानुषसहवासे ते

---

[369] हस्त्यायुर्वेदस्य चतुर्थस्थानस्य एकविंशतितमोऽध्यायः ।
[370] हस्त्यायुर्वेदस्य चतुर्थस्थानस्य चतुर्विंशतितमोऽध्यायः ।
[371] हस्त्यायुर्वेदस्य चतुर्थस्थानस्य पञ्चविंशतितमोऽध्यायः ।
[372] हस्त्यायुर्वेदस्य चतुर्थस्थानस्य पथ्यापथ्यविचाराध्यायो नाम षड्विंशोऽध्यायः ।
[373] गजशास्त्रानुबन्धस्य पृ.सं १४६-१४७ ।

आधि-व्याधि पीडिताः, स्वातन्त्र्यं विना जीवनीयाः इति कारणेन तेषां स्वास्थ्यरक्षणं महत्त्वमाप्नोति ।

*बन्धनात्ताडनादाद्यवनसौख्यविचिन्तनात्।*

*असात्म्याशनतोऽजीर्णादायासाज्जागरादपि। ६।*

*जायन्ते करिणां रोगास्तेषां कार्यं विचिन्तयेत्।*

*वनद्भवैरोषधीभिरौषधैश्च यथाविधि॥७॥* [374]

गजेभ्यः पुनः कालानुगुणं, वयोनुगुणं, शरीरस्यावश्यकतानुगुणं, सन्दर्भानुसारमपि घृतं प्रदातव्यम् । एतत्साकं वसा मज्जयोरपि दानस्य विधानमुक्तम् । एतेन साकं गजेभ्यः अपथ्यकारकानाहाराः अपि ज्ञापिताः ।

*कफे न यवसं देयं गजानां हितमिच्छता ।*

*सर्वधारुविवृद्ध्यर्थं सर्वदोषप्रशान्तये ॥६०॥* [375]

आहाराः चतुर्विधाः यथा भक्ष्यं, भोज्यं, लेह्यं पेयञ्चेति । पुनरेते संस्कृतमसंस्कृतमिति विभक्ताः । प्राकृतिकाहाराः यथा क्षीरं, पक्वान्नं, घृतं, दधीत्यादिकाः संस्कृताहाराः । अपक्वाः, शुष्काहारास्सर्वेऽपि असंस्कृताहाराः इति कथिताः ।

*तैलं तोयेन संयुक्तं वातरोगहरं परम् ।*

*सर्पिः क्षीरेण संयुक्तं पित्तघ्नं बालपोषणम् ॥*

*वसया योजिता मज्जा भग्नोरःक्षतशान्तिकृत् ।*

*सर्वं बलकरं मांसं बृंह्मणं चाग्निवर्धनम् ॥*

*वारुणी दीपयत्यग्निं जनयत्यङ्गलाघवम् ।*

---

[374] गजशास्त्रानुबन्धस्य हस्तिवर्धनप्रकारः इत्यस्मात् ।

[375] गजशास्त्रानुबन्धस्य गजाहारोपयुक्तपदार्थगुणप्रमाणविधिः इत्यस्मात् ।

*मनःप्रसादनी वृष्या बृह्मणी वीर्यवर्धनी ॥*

*क्षुभिताविद्रवंशाय विच्युतभ्रष्टवक्षसे ।*

*मदिरा द्राक्षया युक्ता हिता स्नेहेन चान्विता ॥* [376]

गजदोषान् परिहर्तुं, गजस्वास्थ्यसंवर्धनार्थञ्च उपर्युक्तश्लोकाः साहाय्यकास्सन्ति । ते एषामाहारदानोत्तरमोषधियुक्तजलेऽवगाहनीयाः, सेचनीयाः वा । एतेनापि रोगनिवारणं साध्यम्। तृणं यदा नखादन्ति यत्नेनापि प्रचोदिताः।तदातु व्याधिता नागा ज्ञातव्यास्तु नराधिप । [377]

गजाः कथं केन कदा कदा प्रवर्धन्ते इति तु स्पष्टीकृतम् । गजशास्त्रं तु निश्चयेन यद्पालितमासीत्तस्मिन् काले, यत्तस्मिन् काले लोकरूढमासीत्तेषामेव ग्रथनम् । अतः प्रायोगिकमेव । अत्र ग्रन्थग्रथनकारस्य, गजपालकानां मध्येऽऽसीत् कश्चन सुविषेशसम्बन्धः । परमिदं ज्ञानमाधुनिककालेऽपि विस्तारणीयम् । आधुनिकाभ्यासाः अनुपयोगिनः इत्यभिप्रायः नास्ति मम । न प्रायः प्राचीनाभ्यासाः । परमुभयोर्मेलनेन गजस्यैव स्वास्थ्यवृद्धिरिति विचिन्त्य अनयोः आधुनिक-प्राचीनशास्त्रयोः समागमः अवश्यकः । एतेन सिद्धिर्नाम नवीनक्रमस्याविष्कारः । अतः प्रायोगिकमिदं पालनीयं गजपालकवृन्दैः । हस्तिवर्धनप्रकारो नामाध्यायः [378] गजपालनस्य विचारे बहूनंशान् चिन्तयति । एवमेव गजाहारोपयुक्तपदार्थ-गुणप्रमाणविधिः गजेभ्यः देयाः विविधाहाराः के इति संसूचयति । [379]

एवमययमध्यायभागः परिपूर्णतया गजानां दिनचर्या-ऋतुचर्याविचारे चिन्तयति यत्त्वस्माकं पूर्वजैः प्रायः विचिन्त्य, एतस्यावश्यकताञ्च मनसि निधाय सम्यक् सुसम्पाल्य सर्वमत्रालिखन् । एषां परीक्षाः आधुनिककालेऽपि करणीयाः इति मतम् ।

---

[376] गजशास्त्रानुबन्धस्य भक्ष्यपेयादिपदार्थगुणदोषविधिः इत्यध्याय भागस्य आदिमाः चतुश्श्लोकाः ।
[377] गजशास्त्रानुबन्धस्य भक्ष्यपेयादिप्रदार्थगुणदोषविधिः इत्यध्याय भागस्य ८९ तमः श्लोकः (पृ.सं १९९)
[378] गजशास्त्रानुबन्धः इति गजशास्त्रसम्बन्धेऽस्मिन् विभागे १४ श्लोकास्सन्ति ।
[379] अयमप्यस्यैव भागः यत्तु ८१ श्लोकैर्युक्तः ।

# षष्टोऽध्यायः


६.१ गजायुर्विचारः　　६.२ छायागजलक्षणम्　　६.३ गजसत्त्वपरीक्षा

६.४ गजस्वरलक्षणम्　　६.५ गजासनलक्षणम्　　६.६ गजदन्ताः

६.७ गजमूल्यम्　　६.८ गजनेत्रवर्णलक्षणम्　　६.९ गजमदः

६.१० गजानां रोगाः　　६.११ गजशरीरस्याङ्गानि　　६.१२ गजावयवदेवताः

६.१३ नवगृहीतगजोपचारः


## ६.१ गजायुर्विचारः -

अध्यायस्यास्मिन् भागेतु उक्तानुक्तविषयसम्बद्धाः परिशीलिताः वर्तन्ते । अस्मिन्नध्यायभागे सर्वत्र समानतया अनुक्ताः विषयाः पार्थक्येनोक्ताः विषयाः वा चर्चिताः । सर्वेष्वपि गन्थेषु एको वा द्वित्राः वा विषयाः यथान्यत्र न प्राप्यन्ते तथा दृष्टाः । अत्र समानता नास्तीति कारणेन ग्रन्थशः विषयाः चर्चितास्सन्ति ।

अस्मिन्नध्याये भागद्वयं वर्तते । एकस्मिन् भागे ग्रन्थयोः दृश्यमानाः समानांशाः चर्चिताः । अन्यस्मिन् भागे क्वचिदेकस्मिन् ग्रन्थे उपलब्धाः, चर्चिताश्च, अन्यस्मिन्नचर्चिताः इत्येते अंशाः अत्रोक्ताः । ग्रन्थेष्वेतेषु समानांशाः केचन दृश्यन्ते गजशास्त्र-मातङ्गलीलयोः । एषु प्रथमः अस्ति गजायुर्लक्षणविचारः ।

*गजायुर्लक्षणविचारः (मातङ्गलीलाग्रन्थात्)*

गजानां सामान्यतया १५०-२०० वर्षाण्यायुः इति कथ्यते ।[380] परं मातङ्गलीलायां पूर्णायुः १२० वर्षाणीत्युक्तम् ।[381] अत्रापि पुनः मृगजातीनां ४० वर्षाणि,

---

[380] The lady boss, Page 142.

[381] गात्रोत्तमाङ्गनयनाननकर्णकण्ठवक्षोविषाणकरसत्त्वरुचोऽपराणि ।
अङ्गानि चेति सदृशानि वयोदशाभिः क्षेत्राण्यमूनि करिणां दश च द्वयं च ॥ मातङ्गलीला-३/४ पुनः -
क्षेत्राणां यावतां पूर्णं लक्षणं यस्य दृश्यते । दशास्तावत्य एवायुस्तस्येत्याह बृहस्पतिः ॥ मातङ्गलीला-४/४

मन्दगजस्य ८० वर्षाणि, भद्रगजानां तु १२० वर्षाणीत्युक्तम् । [382] परं गजानामायुः शरीरावयवपरिशीलनेनैव ज्ञातुं शक्यमित्यभिप्रैति नीलकण्ठः । [383] आयुर्लक्षणप्रकरणे षट् श्लोकास्सन्ति ।

दन्त, नख, रोम, नेत्रेषु स्निग्धता, कर्ण, शुण्ड, लाङ्गूल, वंशभागाः येषां दीर्घाः, सर्वशुभलक्षणयुताः, येषां मस्तकस्योन्नतप्रदेशौ समानौ तेषां दीर्घायुः । रक्तवर्णीयाः सप्तावयवयुताः, [384] षट्शरीरस्थानानि उन्नतानि, [385] गन्धिनः, सुप्रभायुताः, नलिनीवत्कान्तिनिभ-दन्ताः, सुगर्जनचतुराः, रोमयुक्ताः स्थूलत्त्वग्युताः ते गजाः दीर्घायुषगजाः । गजवयोलक्षणं, कृतेः पञ्चमे पटले चर्चितम् यस्मिन् २३ श्लोकाः विद्यन्ते । प्रत्येकस्मिन्नपि वर्षे, दशावस्थायां वा गजेषु सम्भविष्यमाणानि संवर्धनानि अस्मिन् पटले चर्चितानि । अत्रापि स्थूलतया उक्तं यद् द्वादशवर्ष पर्यन्तं ते न हन्तव्याः, २४ वर्षाणि मध्यवयः, तथैव षष्टिवर्षपर्यन्तं अत्युत्तममित्युक्तम् । कोष्टकद्वारेण कस्मिन् वयसि तेषां अभिवर्धनं कथं जायते इति दत्तम् ।

| क्र | वयः | नाम | रूपम् |
|---|---|---|---|
| १ | प्रथमं वर्षं | बालः | मृदुः, ताम्रवर्णः, मृदुशरीरयुतः, मृदुरोमः, निद्रालुः, विवर्णितकरः, स्तनापेक्षी, अव्यक्तरूपयुक्ताङ्गः । |
| २ | द्वितीयं वर्षं | पुच्चुकः | नखाभिवर्धनं जायते, पुष्करभागौ, कोशः, रसना, अधरः, गुदः, तालुश्चेते भागाः रागवर्धिताः, किञ्चिदिव क्षीरं पिबन्ति, वल्ली-तृणादीन् खादितुमिच्छन्ति, रक्तवर्णः पादमध्यभागः, अकारणं धावति, सदातुष्टः, नेत्रे भूमिं पश्यतः, नयनानन्दकरः । |
| ३ | तृतीयं वर्षं | उपसर्पः | नख, कुम्भभागौ, सन्धिप्रदेशाः, कर्णौ, दन्तावेष्टभागाः स्फुटं भवन्ति, वक्षस्थले कर्णयोश्च बिन्दवः दृष्टाः भवन्ति, शिरसि, कर्णयोरन्तेच रोमाणि जायन्ते, दृढतरदन्तपङ्क्तिश्च भवति । |
| ४ | चतुर्थं वर्षं | बर्बरः | कटिप्रदेशः निष्कोशश्च रक्तवर्णं भवतः, नाभिनन्दति पयः, पादभागेषु सन्दानभागेषु च घनत्त्वमाप्नोति, तृणं खादितुमिच्छति, तालुप्रदेशः कृष्णवर्णीयः, किञ्चिदिव दन्तौ दृश्यतः । |
| ५ | पञ्चमं | क | चर्मतु काष्टवत् भवति, आशरीरं रोमयुक्तं, जल-धूली- |

[382] चतुर्थी मृगजात्यस्य मन्दजात्यस्य चाष्टमी । द्वादशी भद्रजात्यस्य परमायुरिहोच्यते ॥ मातङ्गलीला-६/४

[383] आयुर्लक्षणाधिकारो नाम चतुर्थोऽध्यायः, नीलकण्ठस्य मातङ्गलीला । अस्मिन् पटले ६ श्लोकाः ।

[384] पुष्करभागौ, कोशः, रसना, अधरः, गुदः, तालुश्चेति । मातङ्गलीला - २/२

[385] मस्तकद्वितयं, दन्तौ, ग्रीवाभागः, वंशभागश्च । मातङ्गलीला - १/२

| | | | |
|---|---|---|---|
| | वर्षं | लभः | पङ्कप्रियः, अल्पासक्तिः, किञ्चित्कोपी, सुख-दुःखं जानाति, यत्ने जागरितः, आज्ञामवगच्छति, अङ्कुशादीनामाज्ञामवगच्छति, आधोरेण यन्त्रितुं सुलभः, ग्रीवा-दन्तौ च इतोऽपि स्पष्टतां प्राप्नुवन्ति। |
| ६ | षष्ठं वर्षं | नैकारिकः | कर्णभागेषु, कुम्भयोः, मुख-कटि-नयनप्रदेशेषु, कर्णयुगलस्य अधो- भागेषु, प्रतिमाने च अनेकबिन्दुभिरलङ्कृतः, वलिरहितः सर्वशरीरभागेषु । |
| ७ | सप्तमं वर्षं | शिशुः | पदतल-सन्धिप्रदेशः-प्रोह-सन्दान-चिक्क-पलि-शुण्ड-नख-भागेषु दृढता भवति, दन्तैः स्वादमनुभवति, सदा कण्डूयते, गात्रेषु वेगेन चलितुं शक्तिः, वर्धितपृष्ठभागयुतः, पुष्करः भुजाश्च स्निग्धाः। |
| ८ | अष्टमं वर्षं | मज्जनः | नखपदतल-सन्धिप्रदेशाः घनाः, शीघ्रतया व्रणविमुक्तः, मृदुयवसभक्षी, अस्थिरदन्तपङ्क्तिः, शीघ्रगामी, प्रहर्तुमसमर्थः, असमर्थश्चेदपि कदाचिल्लैङ्गिगगुणान् प्रकटयति । |
| ९ | नवमं वर्षं | दन्तारुणः | स्पष्टनेत्रः, धेनुं प्लवति परं शुक्लं वितरितुमसमर्थः, मृदुत्त्वक्, पतितप्रथमदन्तपङ्क्तिः, विशालोरस्कः, सन्धिप्रदेशेषु इतोऽपि वर्धितः, दृढेन प्रहर्तुं शक्तश्च । |
| १० | दशमं वर्षं | विक्कः | धेनुं प्लवति सशुक्लम्, स्थिराङ्गः, प्रहृष्टमेढ्रः, जातदृढदन्तः, तेजसा बलेन युक्तः, आस्वादयत्यन्नं, यूथप्रहर्षी । |
| एवं प्रथमं दशकं क्रमते गजस्य । इदानीं क्रियते दशकशः गजस्य संप्रवर्धनकथनम् | | | |
| १ | द्वितीयः दशकः | पोतः | उत्साहयुक्तः, द्रष्टुं मनोहरः सुस्फुटगात्रपुष्टसन्धिप्रदेशैः, सन्तानोत्पादन-समर्थः, दुःखमप्यनुभवति, प्रोहसहित विविधस्थानेषु वलीयुतः, सम्यक् प्रहर्तुं क्षमः सोढुञ्च, पीतवर्णयुक्तदन्तः, दुर्गस्थानेषु भवितुमभिलषुकः, ऊरुपृष्टकर्णभागाः सुवृत्ताकाराः, वेगवान्, बलवान्, वीर्यवान्, समर्थश्च । |
| २ | तृतीयः दशकः | जवनः | कर्ण-जिह्वा-जघनेत्यादयः सुपुष्टाः सम्यक्तया, मदस्य घ्राणयुतः, सर्वगुणलक्षणोपेतः, युधि विक्रमः, मृदुरोमान्वितः, उन्मत्तदृष्टिः, सुन्दरः, चतुरः, कोपयुक्तः, हन्तुकामः, सर्वधातुभिर्युतश्च । |
| ३ | चतुर्थः दशकः | कल्याणः | सन्दानादिप्रदेशेषु स्थिरवलयः दृष्टाः, पौनः पुन्येन मदयुक्तः, अनिच्छति निद्रां, अन्यदन्तिभिस्साकं वैरमाचरति, अनिलधूपाद्भीतः, गर्जत्युच्चैः, गात्रेषु रोमसमूहः, युद्धकार्येषु प्रियमनः वारणयुवा च । |
| ४ | पञ्चमः दशकः | योधा | कर्ण-गण्डस्थल-जानुभागेषु च मदजलस्रावात् संश्लेषः, सन्दानादि-प्रदेशेषु इतोऽपि वलीकरणं जायते, पूर्णतया |

| | | | |
|---|---|---|---|
| | | | श्रेष्ठत्त्वमाप्नोति, मदविह्वलः कदाचित्, हर्षचित्तः अचोदितोऽपि, प्रबलः, सर्ववेदनामपि सहते, गण्डस्थलयोः सदा मदजलस्रावः । |
| ५ | षष्टः दशकः | - | वलिप्रदेशाः भिन्नाः भवन्ति, किञ्चिदिव इन्द्रिय-धातु-बलक्षयः, दन्तावेष्टन-कर्ण-ओष्ठभागेषु रोमाणि दृश्यन्ते, निर्गतदन्तमूलः । |
| ६ | सप्तमः दशकः | - | पित्ते, जठराग्नौ क्षीणता, बहुवायुयुतः, स्तब्धाङ्गयुतश्च, परुषत्त्वचः, न्यूनचेष्टः, अतिकफभरितः, विवर्णश्च । |
| ७ | अष्टमः दशकः | - | सर्वदाश्रुधारायुतः, शुण्डात् सन्ततं कफस्रावः, विवर्णरूक्षचर्मा, भीतः यूथाद्दूरगामी, न कामासक्तः, विगतदन्तवृद्धिः, सदानिमीलित-नयनः, मन्दव्रणनिवारणशक्तिः, चर्मणः रोमाणां शीघ्रपतनं कृशश्च । |
| ८ | नवमः दशकः | - | ग्रीवः स्रंसते, दशन-दन्ताः निपन्तन्ति, मन्दं भवति अङ्गानां चलनं, मृदुयवसमेव खादति, मदरहितः, निर्वैरः, असुन्दररूपं, आशरीरं वलियुतं, यूथमनुसृत्य चलति, कृशगात्रः, अधिकं निद्राति । |
| ९ | दशमः दशकः | - | कर्ण-भुज-वाल-शुण्डाः अवतंसन्ति, केशरहितः, पतनशीलदन्तः, विगतशक्तिः, शिथिलपादभागः, अल्पमेव खादति, रूक्षशरीरः, पटलयुतनेत्रः, सिराभिरारचितदेहः, कष्टेन मल-मूत्रं विसृजन्, तृड्बाधितः, कृमिभुक्तनखः, अति वयस्कश्च । |
| १० | एकादशः दशकः | - | वृक्षे शेते, नाभिलषति जलावगाहः, कफयुक्तमलः, किञ्चिन्मुह्यति, मृदुयवभक्षी, दन्तहीनः, रोगग्रस्तगात्रश्च । |
| ११ | द्वादशः दशकः | - | बहुशक्तिहीनः, अधोमुखश्च, शुण्ड-कर्ण-वालाः अनियन्त्रिताः, गात्राः प्रस्तब्धाः, सदा निद्रामुखश्च । |

कोष्टकः - ४२

एवं गजानामायुः १२० वर्षाणीति नीलकण्ठः ।[386]

गजशास्त्रग्रन्थयोः गजवयः -

गजशास्त्रग्रन्थयोः पञ्चमप्रकरणस्यादिभागः इममेवविषयविशेषं भजते । अत्राहत्य ५५ श्लोकेष्वयं विषयः उपस्थापितः । कोष्टकद्वारेणात्रोक्तानां विषयाणां सङ्ग्रहः एवं शक्यते ।

---

[386] एवं वर्षशतं विंशमवस्थाय महीपते । कृत्वा बहुविधं कर्म स्वर्गं गच्छति वारणः ॥ मातङ्गलीला - ५/२३ ।

| क्र | वयः | नाम | गुणाः |
|---|---|---|---|
| १ | प्रथमे [387] | शिशुः * | स्तन्यं पिबति । (आदौ पातुमपि न वेत्ति ।) ## |
| २ | द्वितीये [388] | हंसः ** | रक्तवर्णः, पङ्कमिष्यते । (पुष्कराग्राननेत्रभागेषु रक्तवर्णयुतः) ## |
| ३ | तृतीये [389] | यूथनिष्क्रामी | जलं, क्षीरञ्चेष्यते (जलेक्रीडनमास्फालनञ्चेष्यते) ## |
| ४ | चतुर्थे [390] | चपलाङ्गः | सर्वत्रपरिधावति (स्खलनादितास्ततः परिधावत्यपि) ## |
| ५ | पञ्चमे [391] | विक्लवाक्षः | जनन्याः दूरमपि चलितुमारभते । (कदाचिद्दूरं गत्वापि झटिति-मातुर्निकटं भवति) ## |
| ६ | षष्टे | लक्षोपदंशः | दन्तौ दृष्टौ भवतः । जले क्रीडितुमिष्यते । (जलेऽवगाहनं, पानादिके च निरतः, ग्रीष्मातपे छायामाश्रयेत्) ## |
| ७ | सप्तमे [392] | लण्डभक्षः | तृणं खादति । पादघातैः स्खलनैर्विना धावितुं शक्ताः । (लण्डो-नाममृदुपल्लवसल्लकीवृक्षविशेषः - एतान् भक्षयतीति) ## |
| ८ | अष्टमे [393] | चपलः | धावनशीलः भवति । (दिवासमये वा रात्रिसमये वा निद्रामुक्तः) ## |
| ९ | नवमे | क्रोधनः | पल्लवानि गृह्णीते (स्तन्य,जलपान,भक्षणोत्तरमधिकां निद्रां कुरुते) ## |
| १० | दशमे [394] | मातृवत्सलः | सततं भक्षणे निरतः ।(क्षुदाधिक्यात् स्तन्यं पिबन् पुनः तृणादीनां भक्षणे निरतोभवति) ## |
| ११ | एकादशे | व्यक्ततालुः | व्यक्तं भवति तालुप्रदेशः (पुष्टाङ्गः सर्वदापि नवतृणादिखादने निरतः, वर्धितजीर्णशक्तिश्च) ## |
| १२ | द्वादशे | विनिद्रः | जिह्वा-ओष्ठ-दन्त-कर्णाः ताम्रवर्णं पार्ष्णिभागः स्निग्धश्च भवति ।(सर्वपादेष्वपि श्वेतवर्णीयनखपङ्क्तिः, कर्णयोरधः केशोद्गमश्च) ## |

## यथाव्याख्यानम्
(व्याख्याने उक्तं, गजानामायुःप्रमाणं विंशत्युत्तरशतसंवत्सरकाल इति ।)

कोष्टकः - ४३

[387] व्यासप्रोक्ते गजशास्त्रे - मासजो विक्लवो व्यग्रः स्तन्यं पातुं न वेत्ति च ।
[388] व्यासप्रोक्ते गजशास्त्रे - स्तनं पिबेद्द्विमासस्तु पङ्केप्सुर्मण्डको मृदुः ।
[389] व्यासप्रोक्ते गजशास्त्रे - त्रिमासो यूथनिष्क्रामी जलकामी च दुग्धपः ।
[390] व्यासप्रोक्ते गजशास्त्रे - चतुर्थे चपलाङ्गस्स्यात् गजो गर्वेण धावति ।
[391] व्यासप्रोक्ते गजशास्त्रे - पञ्चमे विक्लवाक्षश्च जग्ध्वा मृदु च पल्लवम् ॥
सल्लकीं खदिरं चैव कर्णिकारं च खादति । व्यक्तसंस्थानदेहश्च वृत्तकुम्भमुखो गजः ॥
[392] व्यासप्रोक्ते गजशास्त्रे - सप्तमे खादति तृणं लण्डभक्षो विशेषतः ।
[393] व्यासप्रोक्ते गजशास्त्रे - अष्टमे चपलो गन्ता प्रबोधश्च विशेषतः ।
[394] व्यासप्रोक्ते गजशास्त्रे - दशमे च पिबेत्स्तन्यमजस्रं मातृवत्सलः ।

अत्र विशेषः कश्चनांशः दृश्यते । सामान्यतया पालकाप्यगजशास्त्रस्य तञ्जावूरु-प्रकटणमेव अन्योऽपि ग्रन्थः परिपालयति स्म । परन्त्वत्र यत् पालकाप्यगजशास्त्रे न दृश्यन्ते तेऽपि विषयाः उपस्थापिताः । प्रत्येकस्मिन्नपि गजशावकविषयेऽपि पुनः कश्चन श्लोकभागः व्यासप्रोक्ते गजशास्त्रे इति लघुशीर्षिकया दृश्यते एव । परिगणनीयोऽयमंशः यद्येते श्लोकाः पुनः ग्रन्थान्तरे इति नामकृताः, ४३ तः ५३ पर्यन्तमुक्ताः ।

(आवरणस्थः व्याख्याविषयः; परं पदपङ्क्तिषु ते श्लोकाः/श्लोकभागाः वा प्रदत्ताः । पुनरग्रे प्रतिवर्षं गजानां प्रवर्धनं कथं जायते इत्युक्तम् ।)

| क्र | वयः/वर्षे | नाम | गुणाः (संवत्सरात्संवत्सरम्) |
|---|---|---|---|
| १ | प्रथमे | जात-वर्षः | मुखं, तालुश्च कृष्णं भवतः, पादाः नखयुताः भवन्ति, कर्णयोर्रोमाः मृदु भवन्ति स्वकरेणैव कुशाङ्कुरान् खादति । |
| २ | द्वितीये [395] | चूलिकः * | रक्तवर्णच्छविं धत्ते ।(जिह्वोष्टयोः रक्तवर्णाधिक्यं, हस्तोरुपादानां सन्धि-स्थलेषु सान्द्रत्त्वक्, बलयुतश्च भवति । मृदुभक्षणीयं खादति । नखारम्भ-तले स्वेदयुक्तः भवति ।) ## |
| ३ | तृतीये | क्षीर-दन्तः % | अग्रकर्णभागौ बिन्दुभिरञ्चितौ, भक्षितुकामः, दन्तौ दृश्यते । (शिरोभागे रोमः, स्तन्यपानविरक्तः, शाखादीन् भङ्क्तुमपि यतेत) ## |
| ४ | चतुर्थे | पर्यस्तः # | गात्रे विस्तारः, अस्थिरशिरः, दन्तौ प्रेक्षणीयौ भवतः, सदानन्दः (स्थिरदन्तः, चञ्चलः, जङ्घावर्धितः, निद्रालुः, स्फुटरोमः श्वेतबिन्दुयुक्तः) |
| ५ | पञ्चमे | अल्प-निद्रः कलभः | यन्त्रा आरोहणे चोदितश्चेच्चोदितः चलनशीलः, कृतकर्माणि स्मरन् मार्गमपि पुनः तत्कर्तुमभिवाञ्छति । वर्षान्तरे हृष्टमेढ्रकः। (सल्लकी-खदिरेत्यादिनां भक्षितुं समर्थः, तनुः-रोमराजियुता, पङ्क- |

[395] व्यासप्रोक्ते गजशास्त्रे -

किञ्चित्सान्द्रनखोऽतिरागरसनोष्ठादिः पयोऽल्पं पिबेत् ।
किञ्चिद्वल्लितृणादिखादितुमना गात्रान्तरे लोहितः ।
निर्धावत्यनिमित्तमेव मुदितः प्रायो भृशं मीलितः ।
नम्राक्षो नयनप्रमादकृतये बर्षद्वये चूचुकः ॥
पुराणनीरं बहुकोमलाङ्गो घासानि भुङ्क्ते बहुदुःखचित्तः ।
द्विवत्सरोऽयं शिशुघोषभीरुः स चूचुकोऽतः सितदन्तपङ्क्तिः ॥

तञ्जावूरुतः प्रकटिते ग्रन्थे एते श्लोकाः ५४ तः ८१ पर्यन्तम् दत्ताः वर्तन्ते ।अतः न कुत्राप्ययं भागः परिगणितः महाप्रबन्धे ।

| | | | |
|---|---|---|---|
| | | | सुवासितगलावगाहेच्छुकः, अल्पनिद्रः, दत्तकार्यस्य श्रमात् कुपितः; शब्दं वेत्ति वाद्यादीनां; अविलम्बेनकार्यसाधकः,दन्तौ पूर्णतया बहिरागच्छतः।) |
| ६ | षष्टे | वैका-रिकः | शुण्डस्याग्रे, कर्णयोः, कटिप्रदेशयोः, अक्षिकूटयोः, नेत्रयोश्च मध्यभागे, पिञ्छूषे बिन्दवः दृश्यन्ते; सुखदुःखयोः ज्ञानं भवति। (कण्ठ-उदरसमीपेषु भागेषु वलिनः नष्टाः भवन्ति पुष्टिकारणात्।) |
| ७ | सप्तमे | शिशुः | कण्ठभागे वलयः भवन्ति, नखेष्वपि सान्द्रता भवति, दन्तेन प्रहर्तुमिच्छति, पुष्करः-वालश्च स्निग्धौ भवतः। (नख,पाद,शुण्डा- दण्डसन्धयश्चः दृढाः; व्यक्तशिरः, कुम्भौ दृष्टौ भवतः, दीर्घदन्तः, कण्डूं जानाति, वेगी ।) |
| ८ | अष्टमे | अञ्जनः | किञ्चित् हृष्टः, क्रुद्धश्च, हृष्टमेढ्रयुतः यत् सततं बिन्दुभिर्युतः । सवयगजैस्साकं धेनुकामनाः विहरन्ति; एषां व्रणानि शीघ्रतया निवारितानि भवन्ति । (कण्डूत्पत्तिरधिका, मृदुघासप्रियः, अल्पोदक-प्रियः, दन्तयुगलं अधिकघर्षणेन शिथिलं भवति; दानस्रावः कटे; युद्धायैते न उपयोज्याः ।) |
| ९ | नवमे | प्रभवः | शुक्लबिन्दवः न दृश्यन्ते चेदपि सान्द्रतां यान्ति चर्म, शीर्षरोमाश्च, उत्साही, सत्त्वसम्पन्नश्च । (हृष्टपुष्टाङ्गः, युद्धप्रवीणः, करिणी-कामवशात् बहिरानीतमेढ्रः, उपसर्पितुमनश्च) |
| १० | दशमे | विक्ककः | सुव्यक्तशरीरावयवयुक्तः, छविमान्, बलिष्ठः, स्फुटदेह-बुद्धियुक्तः शुक्लमेढ्रयुतः, यूथेऽपि हर्षचित्तः, सान्द्र-शुण्डवान्, सर्वदा उत्साहशीलः, सर्वसन्धिष्वपि स्थिरः । (कृष्णवर्णमधिकं भवति; बलवान्, आकर्षकनेत्रः, शरीरकान्तिश्च, वीर्योत्पत्त्याधिक्यात् मैथुनेच्छुः) |

## यथाव्याख्यानम्, * चूचुकः इत्यन्यस्मिन् पुस्तके;

% चूलिकः इत्यन्यस्मिन् पुस्तके; # बर्बरः इत्यन्यस्मिन् पुस्तके । [396]

कोष्टकः - ४४

गजाः शैशवादारभ्य स्वजीवनस्य विविधकालखण्डेषु कथं संवर्धन्ते, कस्मिन् वयसि कं गुणं वहन्तीत्यस्मिन्नध्याये पूर्णतया वर्णिताः । [397]

---

[396] अत्र पुनः किञ्चन पाठान्तरं दृश्यते यत् व्याख्यासहिते पुस्तके तञ्जावूरुतः प्राप्तस्य पुस्तकस्य श्लोकः कश्चन नास्ति परमयं श्लोकः वर्तते तत्स्थाने - चतुर्थेऽब्दे तु बर्बरः ॥ चतुरब्दः स्थिरदन्तः चलचित्तः स्थूलजङ्खावलिशेफः । बहुनिद्रः स्फुटरोमा सितबिन्दुर्बर्बरोऽयमलिशोभः ॥

| क्र | दशके | दर्शनीयाः गुणाः |
|---|---|---|
| १ | प्रथम | बलयुतः, स्पष्टशरीरः, सुव्यक्तमेघच्छविः, वीर्ययुक्तमेढ्रधारकः, गजगणे हर्षितः, दृढशुण्डयुक्तः, सर्वदोत्साही, सर्वसन्धिष्वपि सुस्थिरश्च । |
| २ | द्वितीय[398] | मुखेरोमवान्, शीघ्रगामी, पुष्टमांसः, तेजोवान्, ग्रहणं शीघ्रं, योद्धुं समर्थः, समानेषु दर्पितः, सर्वैरपि धातुभिः दोषैश्च समाहितः, मुक्तः, सर्वगुणसम्पन्नश्च । |
| ३ | तृतीय | कोपेन अन्यान् मारयितुमिच्छति, सन्धानप्रोथसन्धिषु दृढः, दृढकरः, उत्साही, सर्वस्वपि सन्धिषु सुस्थिरः, त्रिवलियुतः । |
| ४ | चतुर्थ | तरुणीषु वाञ्छावान्, सर्वत्रापि गन्तुकामः, पक्ष-कर्ण-कटप्रदेशेषु मदस्रावः । |
| ५ | पञ्चम | अतिमदेनयुक्तः, स्वदुःखमन्येषां च सहते, तृट्-क्षुत् सहः, पूर्णतया तेजस्वितां प्राप्नोति, तीक्षणकर्मकर्तुमपि जानाति, अधिकवीर्यवान्, दन्तस्य व्यावृतिः दृश्यते, शब्दात् बिभेति, मदाविष्टः । |
| ६ | षष्ट | रोमकचाः इतोऽपि स्पष्टतां यान्ति, वलिभिन्नशरीरः भवति, हीयमानेन्द्रिययुतः, शरीरस्य धातुसङ्ग्रहः पतति, उत्कर्षमपि प्राप्नोति । |
| ७ | सप्तम | उत्साही युद्धादौ, श्रान्तः युद्धान्ते, रोगाः-व्रणानि च बहुकालं बाधते । |
| ८ | अष्टम | आशरीरं रोमयुक्तः, वलीभिर्युक्तः, मृद्वाहारभक्षकः, दुर्गप्रदेशं वर्जयति, दन्तरोगी अपि भविष्यति, रागात्-भयात्-क्रोधाद्वा न कुपितः; ग्रीवांसप्रदेशाः पुष्टाश्च । |
| ९ | नवम | हस्तस्याग्रे स्रस्तः भवति, ऊर्ध्वं न उत्थापयति, अल्पाहारः, मेढ्रः न तुष्यति, |
| १० | दशम | केशः, वालः, अक्षि-कक्षाश्च सर्वेऽपि श्लथाः भवन्ति, मलमूत्रयुक्तः । |
| ११ १२ | एका-दश द्वादश | अधिकरोमयुतः, वलिभिर्भिन्नः, कोशः मूत्राविष्टः, अल्पचेष्टः, पूर्णतया वर्धितः गजः, रोमयुक्तः, बृहत्कर्णः महान्तौ कुम्भौ, इत्यादि गुणान्वितः एकादश-द्वादशदशकस्य गजाः । पूर्वकः इत्येतस्य एकादशदशकस्य नाम । |

कोष्टकः - ४५

भावसन्दर्शिनीव्याख्यासहितं पालकाप्यगजशास्त्रं यद्यपि पालकाप्यगजशास्त्रमेव श्लोकबाहुल्यात् अनुकरोति, अनेके श्लोकाः तत्राविद्यमानाः अत्रोपलभ्यते । अस्मिन् प्रकरणभागे प्रत्येकस्यापि वयसः पुनरेको वा श्लोकद्वयं वा दृश्यते यत्तु पालकाप्यगजशास्त्रे नास्ति । परं तेऽत्रोपस्थितास्सन्ति व्यासप्रोक्ते

[397] पालकाप्यगजशास्त्रस्य गजवयोलक्षणं नाम पञ्चमप्रकरणस्य १९तः ४२तमश्श्लोकपर्यन्तम् ।
[398] (व्यास) गजशास्त्रे पुनः एतेन साकं पुनः व्यासप्रोक्ते गजशास्त्रे इति शिरोनामाङ्किते भागे अनेके श्लोकास्सन्ति ।

गजशास्त्रे इति कस्मिन्श्चित् शिरोनामाङ्किते भागे । [399] अत्र एतदपि ज्ञातव्यं यदेते एव श्लोकाः पुनः मातङ्गलीलायाः पञ्चमे पटले पुनरावर्तिताः । इत्यत्र सर्वेषामपि ग्रन्थानां तोलने प्रायः कः ग्रन्थः प्रथमः, कः अग्रिमः इति कदाचिदग्रे गवेषणेन ज्ञायेत । अयं विचारः प्रायः बिन्दुरूपेण स्वीकर्तुं शक्यते यतो हि प्रथमं तु प्रायः पालकाप्यस्य गजशास्त्रमेव । मातङ्गलीलायाः तथैव भावसन्दर्शिनीव्याख्यायुतपालकाप्य-गजशास्त्रमित्यस्य च समकालं स्यादिति मन्मतम् । गभीरतयात्र कालविचारस्य चर्चा न कृता वर्तते । श्लोकविपर्ययविचारः एवं कोष्टकरूपेण किञ्चित् ज्ञातुं शक्यते -

| क्र | श्लोकारम्भः | पा.ग.शा # (प्रकरणम्) | पा.ग.शा (व्यास) $ | मातङ्गलीला |
|---|---|---|---|---|
| १ | किञ्चित्सान्द्रनखः. . . | ५४/५ | पृ.सं २३६ | ३/५ पटलः |
| २ | पुराणनीरं . . . | ५५/५ | पृ.सं. २३६ | - |
| ३ | स्फुटनखविदुसन्धि . . . | ५६/५ | पृ.सं. २३९ | ४/५ |
| ४ | चतुरब्दस्स्थिरदन्तः . . . | ५७/५ | पृ.सं. २४१ | - |
| ५ | चोद्यमानस्ततो. . . . . | - | पृ.सं. २४१ | - |
| ६ | काष्ठत्त्वक्तृणसेवन. . . . | ५८/५ | पृ.सं. २४३ | ६/५ |
| ७ | पिञ्छूषकर्णकट. . . . | ५९/५ | पृ.सं. २४५ | ७/५ |
| ९ | घननखतलसन्धि. . . . | ६०/५ | पृ.सं.२४७ | ८/५ |
| १० | घननखतलसन्धि. . . . | ६१/५ | पृ.सं. २४९ | ९/५ |
| ११ | शुक्लेक्षणः प्लवति . . . . | ६२/५ | पृ.सं.२५१ | १०/५ |
| १२ | कृष्णाम्बुदाभो बलवान्. . . | ६३/५ | पृ.सं. २५३ | - |
| १३ | सञ्जातशुक्लप्लवनः. . . . | ६४/५ | पृ.सं.२५३ | ११/५ |
| १४ | परतो दशवर्षेभ्यः | - | पृ.सं. २५५ | - |
| १५ | दशां द्वितीयां तु . . . . | ६५/५ | पृ.सं.२५५ | - |
| १६ | उत्साही स्फुटगात्र. . . . | ६६/५ | पृ.सं.२५५ | १२/५ |
| १७ | सम्पूर्णमातङ्गबलस्सुतेजाः. . | ६७/५ | पृ.सं.२५८ | - |
| १८ | तत्तन्मानविभक्तवर्ण. . . . | ६८/५ | पृ.सं.२५८ | १३/५ |
| १९ | निराकरिष्णुः. . . . | ६९/५ | पृ.सं.२६१ | - |
| २० | सन्धानादिषु जातु सुस्थिरबलो | ७०/५ | पृ.सं.२६१ | १४/५ |
| २१ | सन्धानप्रभृतिप्रदेशविगल. . . | ७२/५ | पृ.सं २६३ | १५/५ |

[399] किञ्चित्सान्द्रनखोऽतिरागरसनोष्ठादिः पयोऽल्पं पिबेत् किञ्चिद्वल्लितृणादिखादितुमना गात्रन्तरे लोहितः । निर्धावत्यनिमित्तमेव मुदितः प्रायो भृशं मीलितः नम्राक्षो नयनप्रमादकृतये वर्षद्वये चूचुकः ॥
पुराणनीरं बहुकोमलाङ्गो घासानि भुङ्क्ते बहुदुःखितचित्तः । द्विवत्सरोऽयं शिशुघोषभीरुः स चूचुकोऽतः सितदन्तपङ्क्तिः ॥ अयमेव श्लोकः मातङ्गलीलायाः पञ्चमपटलस्य तृतीयश्श्लोकः ।

| | | | | |
|---|---|---|---|---|
| २२ | अतीव सम्बद्धमदश्च शूरः . . | ७१/५ | पृ.सं.२६३ | - |
| २३ | ऊर्ध्वं विनिर्भिन्न. . . . | ७३/५ | पृ.सं. २६६ | १६/५ |
| २४ | अल्पाग्निपित्तो बहु . . . | ७४/५ | पृ.सं. २६८ | १७/५ |
| २५ | कचाविलाङ्गेति. . . . | ७५/५ | पृ.सं. २७० | - |
| २६ | नित्याश्रुः सततं कर. . . | ७६/५ | पृ.सं. २७० | १८/५ |
| २७ | कचाविलास्यश्शिथिल. . . | ७७/५ | पृ.सं २७२ | - |
| २८ | स्रस्तग्रीवः प्रचलदशनो | ७८/५ | पृ.सं.२७२ | १९/५ |
| २९ | विशीर्णरोमाङ्गः. . . | ७९/५ | पृ.सं. २७४ | - |
| ३० | शीर्यन्ते दशनाः क्षयी. . . . | ८०/५ | पृ.सं. २७४ | |
| ३१ | स्वपेच्च मन्दं प्रमृशेच्च. . . | ८१/५ | - | २२/५ |
| ३२ | आयुर्ज्ञाने वयोज्ञाने. . . | ६२/५ | पृ.सं. २७८ | - |
| ३३ | विस्रस्तश्रवणांस. . . . | - | - | २०/५ |
| ३४ | शेते द्रुमे नाप्सु कफाक्त. . . | - | - | २१/५ |
| ३५ | एवं वर्षशतं विंशम्. . . . | - | - | २३/५ |

# - अन्यग्रन्थे इत्युक्त्वा पृष्टसङ्ख्या ४६तः ८२ पर्यन्तम् ।
$ - अत्र कानिचनस्थानेषु पाठान्तराण्यपि सन्ति ।

कोष्टकः - ४६

अस्यैवाध्यायभागस्य ग्रन्थान्तरे इति भागे अन्ये केचनांशाः उक्ताः यथा -

मासजः गजः विक्लवः इति कथितः । सः व्यग्रः भवति, स्तन्यं पातुमपि न जानाति ।

द्विमासीयः - मुण्डकः -स्तन्यं पिबति, पङ्के क्रीडितुकामः ।

त्रिमासी - यूथनिष्क्रामी - जलाभिलाषि, क्षीरपः ।

पञ्चमे मासे - विक्लबाक्षः - मृदु पल्लवानि भक्षयति ।

सप्तमे मासे- लण्डभक्षकः - केषाञ्चन वृक्षाणां भागं खादति, कुम्भौ उत्पन्नौ भवतः।

अष्टमे मासे - चपलः ; नवमे मासे - निद्रायामासक्तः भवति ।

दशमे मासे - निरन्तरं स्तन्यं पिबति - मातृवत्सलः ।

एकादशे - व्यक्ततालुः

द्वादशे - विनिद्रः

तृतीये वर्षे - अपसर्पः, चतुर्थे बर्बरः तथैव क्रमागतम् - कलभः, वैकारिकः, शिशुः, अञ्जनः, प्रभवः, विक्कः, कलभः इति दशमे वर्षे प्रकीर्तितः ।

तृतीयदशायां जवनः इति संज्ञितः । अग्रे कल्याणः, यूथः निस्मृतदन्तः, विवर्णकः, विरवि, पुराणः, स्थविरः, पूर्वकः इति एकादशे दशके कथितः । [400]

गजशिक्षायाः

अष्टमपटले गजानां मैथुनादारभ्य गजस्य संवर्धनविचारः चर्चितः । यौवने एते गजाः कानने चरन्तः, प्रच्छन्नाः मिथुनमनुभवन्ति । गर्भसन्धारणात्पूर्वं तावत् गिरि-काननानां राजौ कामोद्रेकरेषु स्थानेषु बहुकालपर्यन्तमटित्वा वीर्यदेन साकेन विहरन्ती सा करिणी गर्भमावहति । आदौ गर्भसन्धारणोत्तरं किञ्चिदिव आयासपीडिताः, मन्देन गच्छन्त्यः, आहारस्वीकरणमपि न्यूनं करोति । तदा वीर्यदः गजः तस्याः उपचारं कुर्वन् मृदुघासादीन् सल्लकीत्यादीनपि ददाति रहसि स्थले यत्र यस्यापि भयं नास्ति । गर्भसन्धारणोत्तरं पुंगजाः करिणीनां सम्यक् पालनं कुर्वन्ति । विंशति-द्वाविंश-चतुर्विंशतिमासेषु वा मृद्वङ्गं शिशुं प्रसूय तस्य संवर्धनतत्परः भवति हस्तिनी । नवजातस्तावत् निमीलितनयनः, अचलिताङ्गवद्भवति आदौ दिने । तज्जननीतु आहारमपि परित्यज्य तस्याः पालनं करोति ।

परं द्वितीये दिवसे सः क्षुत्तृड्बाधितः स्तन्यमिच्छति । एवमेव कालक्रमेण सः निद्राधिकः गच्छता कालेन घासभक्षणं मात्रा आरभते । एवं द्वितीये मासे स्वयं तृणं खादति, तृतीये सल्लकीमपि भक्षति । चतुर्थे मासे सः बालः मात्रा साकं चलति (प्रायः पादानां मध्ये) किञ्चिदिव दूरमानन्देन । बहुक्रीडातत्परः पञ्चमे मासे बालकः इति कथितः क्रमेण सुसंवर्धितः हृष्टपुष्टमांसः, बलवान्, स्वक्रीडाः अपि प्रदर्शयन्, सर-सिन्धु-सानुप्रदेशं वीक्ष्यापि विनाभितिः सर्वत्र चलति स्तन्यपायी भूत्वापि । [401]

द्वितीयवर्षतः अस्य क्रियादिकमेवं ज्ञातुं शक्यम् -

---

[400] पालकाप्यगजशास्त्रस्य गजवयोलक्षणं नाम प्रकरणभागस्य ४३ तः ५३ पर्यन्तं विद्यमानाः श्लोकाः ।

[401] हस्तिशिक्षायाः अष्टमः पटलः नवमपटलश्च ।

| वत्सरे | गुणाः |
|---|---|
| द्वितीये | बलोदयः, मन्दम् चलन्ति, स्तन्यपायिनः, इक्षु-कदलीदण्डान् भक्षितुकामाः, किञ्चिद्दूरं जनन्याः अपि धावन्ति निर्भीताः आदौ, परं शीघ्रं भीतास्सन् प्रत्यागच्छन्ति, कौतूहलान्मनुष्याणां समीपमपि विशन्ति, तैः क्रीडनमपि वाञ्छन्ति, सृण्यङ्कुशादीनां दर्शनेन किञ्चिद्भीताः भवन्ति । |
| तृतीये | शिक्षार्थमयं योग्यः कालः यतो हि शीघ्रतयावगच्छन्तीति । सप्तमवयः पर्यन्तं तेषां कृते उत्तमवयः शिक्षां प्राप्तुं (सुलभतया अवगत्य पालयन्तीति कारणेन) दन्ताः उद्भवन्ति, तीक्ष्णबुद्धयः, उज्वलाः, त्वक्तु इतोऽपि सान्द्रतां गच्छति, सन्धिषु बलमधिकं भवति । आननं, शुण्डः, कर्णाश्च रक्तबिन्दुयुताः भवन्ति, रोमाः शिरसि दृश्यमानाः भवन्ति, स्मरणशक्तिरधिका भवति, पुष्टशरीराङ्गाः, नियन्त्रकस्य वाक्यं सम्यक् पालयन्ति, किञ्चिदिव कोपं प्रकटयन्ति । |
| चतुर्थे | बद्धाशयाः, केचन गजास्तु ललितविक्रमाः, पादपानां, भित्तीनां पातनं ध्वंसनादिकं कर्तुं समर्थः स्वशुण्डमुन्नीय, अधिकमदन्ति मुहुर्मुहुः, शुण्डः दृढः भवति, जङ्घापादप्रदेशाः सुपुष्टाः भवन्ति, ज्ञानमप्यभिवर्धितम् सम्यक्, जलक्रीडासक्तः । |
| पञ्चमे | प्रातः काले, सायं काले च गिरौ धावनं कुर्वन्नटन्ति, महावेगिनः, श्रद्धावन्तः, गणे गन्तुमनाः, महातरलाः, शीघ्रगामिनः, काष्ठादीन् खादितुं समर्थाः, अनिद्राः रात्रावपि, क्लेशं सहन्ते, दूरं गच्छन्ति चेदपि वीतभयाः, आज्ञां पालयन्ति, छायाभिलाषिणः, कामगुणान्विताः, सुन्दराक्षवदनकराः, दृढ-दन्तयुताः, सुस्थिरबुद्धयः, मदजल-स्रावितकपोलादिभागाः, वनराजौ गन्तु-कामाः, प्रहृष्टमेढ्रयुक्ताः, करिण्यानुगामिनः, कामस्य सन्दर्भे आवश्यकदशां प्राप्तुं समर्थाः, कदाचिन्मन्दबुद्धयः, तथापि पालकैराज्ञाप्तं सर्वं स्मरन् आलस्येत्यादि दुष्टगुणैर्वर्जिताः संवर्धितास्तिष्ठन्ति । |
| षष्टे | मदजलस्रावः आरभते कामादिक्यप्राप्तिवशात्, देहोऽपि पौष्ट्यं भजते, हस्तिशिक्षकस्य सर्वाः आज्ञाः पालयति, गजपालकेङ्गितज्ञाः, बलपौरुषादीनां प्रदर्शकः, करीणीः अनुधावति भोगाय, एतत्कारणात् कदाचित् कार्यविमुखाः अपि भवन्ति केचन, प्रथम-कामोद्रेकसुखमनुभवन्ति, भोगचापल्ययुतश्चेदपि कालक्रमेणावगच्छति स्थिरतां च याति |
| सप्तमे | सम्प्राप्तसकलविधशिक्षाः, प्रोत्फुल्लनयनाः, विशालाननाः, कामवेगिनः, कामलीला-प्रमत्ताः, स्वेच्छाचारिणः वनगजाः । नागरनागास्तु शिक्षाकारणेन जितकाम-वेगिनः, कार्येबद्धादराः भवन्ति, योग्यकालं निरीक्ष्य स्वकामनां करिणीनां समीपे प्रकटयन्ति, दूराद्दूरं गच्छन्ति चेदपि श्रमं सहते, दुर्गुणवर्जिताः, बुद्धिमन्तश्च भवन्ति । |
| अष्टमे | पीवराः दन्ताः, अधिकसौन्दर्येण शोभन्ते, यौवनसमृद्धाः, आकर्षकाः । वनगजाः यथापूर्वं करिणीभिस्साकं स्नानाहारविहारनिद्राशयनसुखतत्पराः । नागराः पुनः यन्त्रितकामाः, परं लब्धेकरिणीसङ्गे शृङ्गारचेष्टाप्रदर्शकाः, अधिकमदजलस्राविकाः, बलवीर्यप्रवृद्धाः, गिर्यारोहणसमर्थाः, निर्भयाः, |

| | |
|---|---|
| | कार्योन्मुखाश्च भवन्ति । |
| न<br>व<br>मे | अधिकबलयुक्ताः, वीर्यवन्तश्च; शोभितशरीरिणः, स्थूलदन्ताः, निर्दोषबुद्धियुक्ताः, सर्वदा कार्यशीलाः अनादृत्य सर्वानपि क्लेशान्, स्वकर्तव्यं कर्तुं समर्थाः, वेगिनः, मनोहर-शरीरिणः, सुश्राव्य-रीङ्कारादिस्वरोत्पादकाश्च । |
| द<br>श<br>मे | नवरत्नैः तुल्यभागमौल्याः, बहुद्रव्यप्रदानेन वा क्रेतव्याः, तुष्टास्सर्वत्र, पूर्णतया संवर्धिताः, कामपूरिताः, सर्वकार्यसमर्थाः साधकाश्च, दृढतराः शरीरभागाः, अग्राह्याः, निर्भीताश्च, मेघवद्गर्जकाः, लीलापटुः, सर्वजनाकर्षकः लीलाभिः । |

कोष्टकः - ४७

दशमवर्षतः विंशतिवर्षपर्यन्तं इतोऽपि बलशालिनः, कलहे-युद्धे च भारवहने च सुयोग्याः । तथैव करिण्यस्तु गर्भं वोढुं समर्थाश्च । एषः गजानां यौवनकालः । ततः तृतीये दशके मध्यमं वयः, तदुत्तरं तु उत्तमवयः इति परिगणितम् सर्वेषाम् । ततः परं वृद्धत्वं प्राप्नुवन्ति । अतः सूक्तकालादारभ्यैव गजाः शिक्षणीयाः ।

हंसदेवस्य मृगपक्षिशास्त्रतः अपि गजानं संवर्धनं तेषामायुविचारश्च प्राप्तुं शक्यते । नववत्सरस्य गजः करिण्या मैथुनमनुभोक्तुं सज्जः भवति । सामान्यतः वासन्ते वा वर्षर्तौ वा तेषां कामोद्रेकः अधिकः भवति । तस्मिन् काले ते स्वस्य तृट्पिपासामपि विस्मृत्य विहरन्ति करीणीं अनुसरन्तः । पुङ्गजेन चोदिता सापि स्वमैथुनेच्छामपि बहिः दर्शयन्ती प्रवेशाय ददात्यवकाशं गजाय सामान्यतया स्निग्धच्छायायाम् । शुण्डगृहीतौ तौ कदाचिज्जले, अरण्येऽपि पारस्परिकप्रीत्या चोदितौ अटतः । दिनद्वयपर्यन्तं वा एवं तया साकं भूत्वा मैथुनोत्तरं पुनः प्रवेशः न क्रियते पुंसा ।

गर्भधारणोत्तरं करिणी निद्राबाधिता । पुङ्गजस्तां सम्यगुपचरतीक्षु-कदलि-मृदुघासैश्च । कालक्रमेण गर्भावक्रान्तिसन्दर्भेऽपि पुङ्गजाः विश्रान्तिमुखां करिणीमुपचरति घनच्छायासु । एवं २०-२२-२४ मासानां गर्भधारणोत्तरं प्रसवति गजशिशुम् । दिनत्रयपर्यन्तं कदाचित् स्तन्यं पाययति शिशुम् । अग्रे मात्रा सह पादानां

मध्ये भूत्वा अग्रे सर्वत्र गमनागमनं कृत्वा वर्धितो भवति शिशुः पुनः महान् गजो भवितुं महती करिणी भवितुम् ।[402]

गजानामायुषविचारेऽपि शिवतत्त्वरत्नाकरः भणति यद्यदि गजस्य क्षेत्रेष्वेकस्मिन् वा दोषस्स्यात् तर्हि गजस्यायुः क्षीयते । यदि हस्तक्षेत्रे दोषस्तर्हि दशवर्षाणामायुच्युतिः । क्षेत्रद्वये दोषस्तर्हि विंशतिवर्षाणां क्षतिः । इत्यत्र क्षेत्रस्यैकस्य दोषश्चेत् दशवर्षाणामायुषः क्षयः इति ।[403]

यज्ञार्हगजलक्षणम् साङ्ग्रामिकगजलक्षणमिति पुनः गजद्वयभेदः दृश्यते पालकाप्य- गजशास्त्रे । अयं भेदः यद्यपि (व्यास) पालकाप्यगजशास्त्रेऽपि उपलभ्यते न तथा पूर्णतया इत्येव विशेषः । आहत्य अस्मिन् भागे चत्वारः श्लोकास्सन्ति । अत्र उभयोरप्युपयोगितानुसारं गजलक्षणान्युक्तानि ।[404]

## ६.२ छायागजलक्षणम् -

छायाविचारः गजशास्त्रयोरुपलब्धः । अत्रापि (व्यास) पालकाप्यगजशास्त्रे न पूर्णतया दृश्यते पालकाप्यगजशास्त्रेण तुलने । पाञ्चभूतात्मिका छाया । अत्र तु पार्थिवी, औदकी, आग्नेयी च शुभच्छायाः परं वायव्या, नाभसी च निन्दिते भवतः । प्रत्येकस्यापि विवरणं पुनः लब्धम् ।[405] यद्यप्युभयोरपि समानता वर्तते अन्तिमोऽयं श्लोकः अनुपलब्धः (व्यास) पालकाप्यगजशास्त्रे । अत्रोक्तः विचारः वर्गीकरणविभागेऽपि दृश्यते । परं तत्र गजानां शुभाशुभत्वं निर्णीतं गुणाधारेण ।

---

[402] मृगपक्षिशास्त्रे षष्टश्रेणी । तत्र श्लो - २३२ तः २६२ पर्यन्तम् ।

[403] शिवतत्वरत्नाकरः ७.११.१३२-१३४ ।

[404] दीर्घाङ्गुलिकरोदग्रसान्द्रकर्णायताननः । जीमूतनीलः सत्वाढ्यो निःशङ्कश्चारुदर्शनः ॥
यज्ञार्हः स भवेद्राज्ञो योऽज्ञश्चैव विशाम्पते । रक्तस्रोतोधिकजवः शतवर्षाणि जीवति ॥
साङ्ग्रामिकः स यज्ञो वै कोशवर्धनकरकः । (मधुनो घृतपिण्डस्य गोमेदस्य मणेस्तथा ॥
आदित्यानलस्यापि सवर्णे यस्य चक्षुषी । स एव वारणो राजन् समरेषु जयावहः ॥) अयं श्लोकभागः न विद्यते (व्यास) पालकाप्यगजशास्त्रे) पालकाप्यगजशास्त्रम् २९ -३२; अष्टमोऽध्यायः ।

[405] गम्भीरा स्निग्धवर्णा च नैकवर्णा च पार्थिवी । स्निग्धनीलाम्बुदप्रख्या विज्ञेया सलिलात्मिका ॥
शक्रगोपक-बालार्क-पद्मकिञ्जल्कसन्निभा । छायाऽऽग्नेयी घना स्निग्धा कुञ्जरे दृश्यते शुभा ॥
निष्प्रभा परुषा ध्वस्ता भस्मवर्णा च वायवी । निन्द्या च नियतं छाया रूक्षा तन्वी च खात्मिका ॥
इत्येषा पञ्चधा छाया वारणेषु प्रदृश्यते । (पा.ग. अष्टमप्रकरणस्य छायालक्षणं श्लो ४२-४५)
पार्थिवी राज्यलाभाय चाम्बवी तु यशःप्रदा । तैजसी धनदा प्रोक्ता दुःखाकीर्तिप्रदे परे ॥ (नास्त्ययं श्लोकः (व्यास)गजशास्त्रे)

६.३ गजसत्त्वपरीक्षा

अयं भागः गजस्य शक्तिपरीक्षां भणति ।[406] उभावपि गजशास्त्रग्रन्थौ अस्मिन् विषये प्रकरणस्यादावेव स्पष्टं निरूपयतः यत्-

*गुरुत्वं रूपतः श्रेष्ठं गुरुत्वादधिकं बलम् ।*

*बलादप्यधिकं सत्त्वं तस्मात्सत्त्वं परीक्षयेत् ॥*

यो गजः हिरण्यस्य ताम्रपलानां रजतस्य वाष्टादशसहस्राणां भारं विनाश्रमं दशयोजन- पर्यन्तं नयति सः उत्तमबलगजः इति परिगणितः । तथैव यो गजः चतुर्दशसहस्रभारं सप्तयोजनपर्यन्तं निरूह्य धावति सः मध्यमबलगजः, दशसाहस्रभारवहः यो गजः पञ्चयोजनपर्यन्तं गच्छति सः हीनबलः इति स्मृतः । {इयं बलपरीक्षा इति (व्यास)ग.शा} पुनः सत्त्वपरीक्षेत्यपि वर्तते । शिलाखण्डैः, इष्टिकाभिः, दारुकैः, घनफलकैर्निर्मितस्तम्भस्य भञ्जनं करणीयम् । तथैव अन्यगजेन कृतं हस्तदन्तैस्ताडनं अपरः गजः सहेत । यः तत्सहते सः गजः सत्त्वयुतः ।

६.४ गजस्वरलक्षणम्-

गजास्वराणां विषयेऽत्र चिन्तनं कृतम् । स्वराणामुत्पत्तिः, तत्स्थानानामाधारेण च स्वराः त्रिविधाः[407] यथा - १. बृंहितम्[408] २. गर्जितम्[409] ३. दुन्दुभिः[410] ४. फेनायित[411] एषु स्वरेषु पुनः बृंहितं - तालूत्पादितम्, गर्जितं - कण्ठोत्पादितम्, फेनायितम् - जिह्वामूले उत्पादितम्[412] इति विभक्तिः दृश्यते । स्वराः अपि शुभाशुभाः इति विभक्ताः ।[413]

---

[406] पालकाप्यगजशास्त्रेऽयं भागः १४ श्लोकेषूक्तः नवमे प्रकरणे।अयमेव भागः गजबलसत्त्वपरीक्षानिरूपणं नाम त्रयोदशकं प्रकरणम्।

[407] पा.गजशास्त्रस्य ब्रह्माद्यंश-वर्ण-छाया-गन्ध-सत्व-स्वर-लक्षणं नाम अष्टमप्रकरणे स्वरलक्षणभागे सप्तश्लोकास्सन्ति ।

[408] ताल्वोष्टशिरसः कण्ठजिह्वाहस्तोरसः श्रुते । जनितो बृंहिताख्यः स्यात्तालुजश्च विशेषतः ॥ बृंहितमिह तालूत्थं विद्यात् ।

[409] गर्जितं गलनं विद्याच्छङ्खस्वनसमन्वितम् । मेघनादसमं प्राहू रवश्च हृदि संस्थितम् ॥ कण्ठप्रभवं तु गर्जितं ।

[410] हंसदुन्दुभितुल्यः स्याज्जिह्वाकर्णसमुत्थितः । उत्क्रोशं गण्डजं विद्याव्याघ्रस्वरसमं बुध । निनदं हस्तशिरसोर्मृगेन्द्रवृषसंमितम् ॥

[411] जिह्वामूलसमुत्थं फेनायितमित्यभिख्यातम् ।

[412] श्लोक १०३, १०४ - अष्टमं प्रकरणं, पालकाप्यगजशास्त्रम् । पालकाप्यगजशास्त्रं (व्यास) पृ.सं ४३२ ।

अत्र पुनः श्लोकद्वयोः विपर्ययः दृश्यते गजशास्त्रग्रन्थयोः शुभाशुभत्त्वविचारे ।[414]

*शुककाकवन्यजम्बुकक्रोडवानररवाः न शोभनाः ।*

*हस्तेन मृदङ्गरवं कर्णाभ्यां दुन्दुभिस्वनं चैव ।*

*दर्दुरनिनदं मुखतः करोति यः पूजितः स गजः ॥*[415]

<u>*६.५ गजासनलक्षणम् -*</u>

अयमध्यायभागः गजे उपवेशनविधानमुपदिशति । त्रिविधान्यासनानि यथा उत्कृष्टः - सङ्ग्रामकालसेवी ; मध्यमः - सामानप्रेरणकाले ; अवकृष्टः - भीतिकाले[416] इति । एतान्यासनानि गजेभ्यः अनुकूलार्थम् । मन्दादिगजानां युद्धेषु उत्कृष्टमासनं योग्यम् । शीघ्रतया गमनाय जानुद्वयोरप्युपयोगं कर्तुमुपकारि । भद्रादिगजानां मध्यममासनमुक्तम् । समानप्रेरणार्थायेदं उत्तमं प्रोक्तम् । मृगादिगजानां व्यग्रसन्निवेशेषु इदमुत्तमम् । गजानां निवर्तने अवकृष्टमित्युक्तम् । एकः प्रसारितपादः अपरः नतजानुकः

इति कथितः । अत्र पुनः पाश्चात्यपदसंज्ञम्, उत्कटं, कूर्मं, मण्डूकमिति प्रोक्तानि ।[417]

पूर्वमेवोक्तं गजशास्त्रयोः ग्रन्थयोः विचाराः बहुतया समानाः, यद्यपि द्वितीये ग्रन्थे प्रकरणभेदविषये भेदाः दृश्यन्ते । परं द्वितीयः ग्रन्थस्तु सव्याख्या वर्तते इति

---

413 बृंहितसंज्ञाः शुभावहा मानवेन्द्राणाम् । शङ्खमेघकलहंसदुन्दुभिव्याघ्रसिंहवृषसन्निभस्वराः । पूजिताः शुनकः
काकजम्बुकक्रोडवानररवा न शोभनाः ॥

414 (व्यास) पालकाप्यगजशास्त्रेऽयं चतुर्दशकप्रकरणस्यान्तिमभागः ।

415 पालकाप्यगजशास्त्रे (व्यास) अयं श्लोकः शुभस्वरविशिष्टगजलक्षणम् इत्यङ्कितः । पृ.सं. ४३२ अस्यैव किञ्चिदिव भिन्नः पाठः दृश्यते पालकाप्यगजशास्त्रे । अत्र पुनः पालकाप्यगजशास्त्रे (व्यास) स्पष्टीकृतं यत् मातृकायां स्वरलक्षणादारभ्य व्याख्या न दृश्यते । गजशास्त्रस्य इदमष्टमं प्रकरणं परं पालकाप्यगजशास्त्रस्य (व्यास) इदं चतुर्दशकं प्रकरणम् ।

416 (व्यास) पालकाप्यगजशास्त्रे श्लोकत्रयमेव विद्यते । स्पष्टीकृतं यत् गजशास्त्रं च समाप्तमिति एतत्समनन्तरम् । परं पालकाप्यगजशास्त्रे त्वस्मिन्नधाये १२ श्लोकास्सन्ति । इतः पश्चात् पा.ग.शा. विद्यमानश्लोकविचाराः ।

417 पाश्चात्यपदसंज्ञं तु एकजान्वानतं बुधैः । एकजानुगतञ्चैतदासनं भावकर्मणि ॥
प्रसारिताभ्यां पादाभ्यामासनं यच्च(नत)जानुकम् । उत्कटेरुत्कटं ज्ञेयं पश्चिमं कुञ्जरासनम् ॥
कूर्ममुत्कटकञ्चैव लीलायाते प्रशस्यते । वंशतो(स्यो)भयपार्श्वीय(श्वे तु) संहते ननु(यदि)जानुनी ॥
मण्डूकासनमेतत्स्यादूर्ध्वं सङ्ग्रामकर्मणि । आसनञ्चोर्ध्वकं ज्ञेयं सङ्ग्रामे तत्प्रशस्यते ॥
एकमुत्कण्ठगं पादमन्यच्च नतजानुकम् । यत् करोति नरः पृष्टे तत् कूर्मासनमुच्यते ॥
कूर्ममुत्कटकञ्चैव लीलायाते प्रशस्यते ॥ पालाकाप्यगजशास्त्रे दशमप्रकरणस्य आसनलक्षणविभागः, श्लो-८-१२ ।

कारणेन विशिष्यते । पुनः अन्ये केऽपि विशेषाः प्रथमग्रन्थेऽपि वर्तन्ते । द्वितीयः ग्रन्थः आसनलक्षणकथनम् इति नामाङ्कितेन एकोनविंशतिकेन प्रकरणेन समाप्तिं गच्छति, यत्रोक्तं - गजशास्त्रं च समाप्तमिति । अस्मिन्नध्याये केवलं श्लोकत्रयमेव दृश्यते । परं प्रथमे ग्रन्थे, आसनलक्षणं इति दशमस्य प्रकरणस्य प्रथमः भागः, यस्मिन् १२ श्लोकाः विद्यन्ते । अस्यैव प्रकरणस्य द्वितीयो भागः सृणिप्रणिधयः इति यत्र ७ श्लोकास्सन्ति । तृतीयस्तु ६ श्लोकयुक्तः पादप्रणिधयः इति । चतुर्थः ४ श्लोकयुक्तः वाक्प्रणिधयः इति । अग्रे दन्तच्छेदकालादिकथनं (२), दन्तच्छेदे-अङ्गुलवर्षभेदः (२), दन्तच्छेदनसाधनम् (१/२), दन्तच्छेदनप्रमाणम् (१ १/२), दन्तच्छेदन-नियमः (४ १/२), दन्तकल्पनायां शुभतिथयः (४), दन्तच्छेदवर्णफलम् (२ १/२), दन्तच्छेद- गन्धफलम् (४), दन्तच्छेददृश्यमानाकारफलम् (८), दन्ताघातलक्षणम् (१५), मदशोभालक्षणम् (१०), मदावस्थालक्षणम् (२२),[418] वाह्याळिप्रकरणम् (२४), गजविनोदविधिः (१५), सृणिघातलक्षणम् (८) इति भागयुतं दशमं प्रकरणम् । अस्मिन् प्रकरणे आहत्य १५१ श्लोकाः समाविष्टाः । अस्य दशमस्य प्रकरणस्य नाम वाह्याळिप्रकरणमिति ।

*६.६ गजानां दन्ताः -*

दन्ताः यथा सर्वेषां प्राणिनां तथैव गजस्यापीति । यद्यपि गजानां मुखे केचन दन्ताः भवन्ति चर्वणाय, तथापि गजस्य दन्तः नाम गजस्य दन्तौ मुखाद्बहिरागच्छतः । एतौ तु गजस्य सौन्दर्यं शोभां वा वर्धेते । गजस्य तु एषामुपयोगाः अनेकविधाः । रक्षाकरणेषु एतयोरुपयोगः महान् । वृक्षाणां पातनेऽपि उपयोगः क्रियते । भारवहनसन्दर्भे दन्तौ उपयुक्तौ । भारतीयगजेषु गजानामेव दन्तौ भवतः न करिणीनाम् । गजदन्तैः अनेकानि प्रयोजनान्यप्यासन् पूर्वम् मनुष्येभ्यः । न केवलं प्रयोजनानि, अपि च दन्ताहरणायैव वनेषु गजहननं शतशः कृतमासीत् पूर्वम् । गजस्य नाम दन्तीति दन्तादेव । ऐरावतादीनां दिग्गजानां चत्वारः दन्ताः आसन्निति ।

रामायणेऽपि गजदन्तस्योल्लेखाः क्वचिदुपलभ्यन्ते । उदाहरणार्थम् -

---

[418] मदविषयकचर्चा पूर्वमेव कृता वर्तते ।

| क्र | दन्तविचारः | काण्डः | श्लोकः | सर्गः | पृ.सङ्ख्या |
|---|---|---|---|---|---|
| १ | गजानां २,३,४ वा दन्ताः | सुन्दरकाण्डः | ५ | ९ | ७८ |
| २ | | | १२,३४ | २७ | २०९,२१३ |
| ३ | आभरणैः भूषिताः दन्ताः | अयोध्याकाण्डः | १४ | १० | ७९ |
| ४ | दन्तपतनमशुभम् | अयोध्याकाण्डः (उ) | १२ | ६९ | ८२ |
| ५ | तीक्ष्णदन्तः, गर्जति, याति | | ११ | ९९ | २६१ |
| ६ | दन्तयोः उल्लेखः | अरण्यकाण्डः | १६ | २५ | १६० |
| ७ | वातायनानि दन्तैः निर्मितानि | | १० | ५५ | ३४७ |
| ८ | दन्ताघातैः सञ्जातव्रणानि | सुन्दरकाण्डः | १६ | १० | ९२ |
| ९ | दन्तानां शिल्प | | ९ | २७ | २०९ |
| १० | वेधनं दन्तैः | युद्धकाण्डः | ५,४७ | ४०,५८ | २८२, ४२८ |
| ११ | वेधकाः दन्ताः | उत्तरकाण्डः | ५९ | ३२ | २६२ |

कोष्टकः - ४८

संस्कृतगजशास्त्रकोविदाः गजशास्त्रत्वेन दन्ताध्ययनमपि कृतवन्तः आसन् । कल्पनारत्नमिति लघु ग्रन्थमेव व्यरचि गजदन्तकर्तनविषये । अस्मिन् ग्रन्थे १५८ श्लोकास्सन्ति, पञ्चपरिच्छेदेषु । अस्य रचयिता शिवमारः [419] इति योहि गङ्गवंशीयनृपः । अस्य कालः क्रि. श. ७८८ - ८१२ इति ज्ञातः । अयं कर्नाटकस्य केषुचिद्भागेषु राज्यं प्रशशास । अस्य ग्रन्थस्य काचिद्व्याख्याऽप्यस्ति, परमपूर्णा । अयं ग्रन्थः परिपूर्णः इत्यत्र मातृका केषुचित्स्थानेषु तृटितास्ति । मातृकया साकं अस्य ग्रन्थस्य कापि व्याख्याऽपि विद्यते ।

गजदन्तानां विषययुतेऽस्मिन् ग्रन्थे ४२ विचाराः चर्चिताः परिच्छेदेषु । यथा -

१. मङ्गलाचरणम् | २. दन्तच्छेदप्रशस्तकालः

३. गजलक्षणानि | ४. कर्त्यमानदन्तोपचारः

५. विषाणवैषम्पकारणम् | ६.विन्दुः, दीर्घराजी च

७. राज्ञे दन्तस्यार्पणम् | ८. वर्षप्रमाणिका

[419] पालकाप्यशशिसूनुगौतमैः व्याहृतां समवलोक्य संहिताम्।कल्पनाविधिमिमं यथाविधि व्याजहार शिवमारभूपतिः।श्लो-९६

९. पर्वतीया, नदीचरा मिश्राः गजाः	१०. भद्रगजलक्षणम्

११. मन्द-मृगगजयोर्लक्षणम्	१२. करीरिकाप्रमाणम्

१३. नवविधाः गजाः	१४. विभिन्नगजानां करीरिकामानम्

१५. वर्षप्रमाणिकाकल्पना	१६. चतस्रः कल्पनाः

१७. अवाहल-विशालगजयोः कल्पना	१८. नवविधकल्पना

१९. गजदन्तवृद्धिकालः	२०. दन्तिनीनां दन्तकल्पना

२१. दन्तकोशः	२२. दन्तिनीकल्पनाकालः

२३. निर्गमानां लक्षणम्	२४. सुजातदन्तलक्षणम्

२५. अपाहलगजलक्षणम्	२६. अवाकीलगजलक्षणम्

२७. अरालदन्तलक्षणम्	२८. साचिगजलक्षणम्

२९. सङ्कटगजलक्षणम्	३०. विविधगजानां करीरिकामानम्

३१. कर्तितस्य दन्तस्य लेपः	३२. पक्षपत्रम्

३३. पक्षपत्रविस्तारः	३४. पक्षपत्रस्य लोहम्

३५. पक्षपत्रालङ्करणम्	३६. दन्तवक्रतानुगुणा कोशवक्रता

३७. कोशस्यधिक्यहीनत्त्वदुष्फलानि	३८. कोशसंयमनं देशरक्षणार्थम्

३९. कोषालङ्करणम्	४०. कोशमुखबन्धनम्

४१. कोशालङ्कारणाय योग्यानि लोहानि	४२. ग्रन्थकर्तृप्रशस्तिः ।

अत्र चर्चितानां विचाराणां नामभिरेव अत्र दन्तविषये कियान् ज्ञानसङ्ग्रहः कृतो वर्तते इति ज्ञायते । दन्तकल्पनाय योग्याः कालादयः, प्रमाणं, वस्तूनि, अलङ्करणमिति सर्वेषां चर्चा कृताः अत्र ।

मातङ्गलीलायां - गजदन्तविचारः विशेषतया न उक्तः । मध्ये मध्ये यद्यपि गजदन्तस्योल्लेखाः दृश्यन्ते तथापि दन्तानामेव न कोऽपि अध्यायः, अध्यायभागो वा न दृश्यते । एतत्तूक्तं-यस्य गजस्य वामदन्तः दक्षिणादुन्नतः तस्य गजस्य मूल्यं न्यूनम्।[420]

पालकाप्यगजशास्त्रे दन्तविचारः -

अयं गजदन्तविचारः केवलं पालकाप्यगज-शास्त्रग्रन्थे उपलभ्यते न तु (व्यास) गजशास्त्रे । अस्य प्रकरणस्य नाम वाह्यालीप्रकरणं यत्तु दशमं प्रकरणमस्ति । अत्रोक्ताः विषयास्तु गजदन्तच्छेदकालादिकथनम्, गजदन्तच्छेदे अङ्गुलवर्षभेदः, दन्तच्छेदनसाधनं, दन्तच्छेदनप्रमाणम्, दन्तच्छेदननियमः, दन्तच्छेदनायां शुभतिथयः, दन्तच्छेदवर्णफलं, दन्तच्छेदगन्धफलं, दन्तच्छेददृश्यमानाकारफलं, दन्ताघातलक्षणमिति ।

दन्तान् कर्तयितुं योग्यकालो नाम पुष्या-अश्विनी-भोगि-कर-सौम्य-मघा-अनुराधा-पौष्ण-उत्तर-अदिति-मरुत्-वसु-श्रवणनक्षत्रेषु; तथैव बृहस्पति-भृगु-इन्दु-बुधवासरेष्विति । वसन्तकाले रविवासरः गुरुवासरश्च योग्यौ । दन्तकल्पनात् प्राक् देव-ब्राह्मणान् नत्वा कर्मणः आचरणं भवेत् । दन्तानां वर्धनगतिः तथैव तेषां कर्तनाय सूक्तकालः कः इति श्लोकद्वये उक्तम्।

| गजविधः | वर्धनम् वर्षे | कर्तनम् | कर्तनप्रमाणम् |
|---|---|---|---|
| नादेयगजेषु | षडङ्गुलम् | त्रिवर्षेषु एकदा | नेत्रादि विदुसूत्रान्तम् । |
| गिरिचारिषु गजेषु | त्र्यङ्गुलम् | पञ्चवर्षेषु एकदा | एतत्सूत्रं दन्ते प्रसार्य । |
| मिश्रेषु गजेषु | चतुरङ्गुलम् | पञ्चवर्षेषु एकदा | अक्षिकूटात् विद्वग्रं सूत्रं दत्त्वा |

कोष्टकः - ४९

दन्तकल्पनाय सूत्राणि, करपत्रं लोहशङ्कुश्चावश्यकोपकरणानि ।

दन्तच्छेदनाय केचन नियमाः पालनीयाः । ते यथा - उक्ततिथि-वार-नक्षत्रे, गजं पूजयित्वा, धूपयित्वा, गजं गन्धमाल्यैः सम्पूज्य, सम्यक् शिक्षितेन, शुक्लवस्त्रधरेण, शुचिना, पूर्वस्मिन् रात्रौ उपोष्य, विविधागजानां चिकित्सकेन वैद्येन,

---

[420] मातङ्गलीला, तृतीयः श्लोकः, सप्तमः पटलः ।

होमं कृत्वा, बलिं दत्त्वा, द्विजान् यथाविधि सन्तर्प्य, पूर्वोत्तरदिशाभिमुखमुपविष्टस्य, शुच्यम्बुना शिरसः अधः परिसिञ्च्य दन्तं कल्पयित्वा शीतजलेन तस्य सिञ्चनं करणीयं दन्तकल्पनसन्दर्भे ।[421]

दन्तकल्पनाय शुभतिथयः अपि निर्दिष्टाः । द्वितीयातः अष्टमीपर्यन्तं (सप्तमीं विहाय) शुभतिथयः एव । प्रथमकल्पनं दक्षीणदन्तस्य येन विजयप्राप्तिः भविष्यति । कल्पितस्य दन्तस्य भागः भूमौ न निपतेत् । यदि वा निपतति तर्हि राष्ट्रविनाशः निश्चितः एव । अतः एव कराभ्यां सम्यग्गृहीत्वा दन्तं कृन्तयेयुः । यदा दन्तस्य कल्पनं क्रियते तदा कश्चिद्गन्धः तस्मात् निर्गच्छति। गन्धद्वारा तस्य फलाफलस्य विवरणमेवं शक्यते -

| क्र.सं | गन्धः | फलम् । |
|---|---|---|
| १ | चन्दनस्य, अगरु, सिक्तोर्व्याः इव | राष्ट्रस्य जयः, भूमिलाभश्च । |
| २ | पाटल, उत्पल, पद्मानाम् इव | शुभः । |
| ३ | माल्यस्य इव | अर्थसिद्धिः । |
| ४ | करीषस्य इव | गवां वृद्धिः । |
| ५ | पूतिः, शोणितस्य वा | भयम् । |
| ६ | मृतशवस्य इव | महाभयम्, दुर्भिक्षं, व्याधिभयं राष्ट्रे । |

कोष्टकः - ५०

एवमेव कर्तितस्य गजस्य दन्तस्यान्तः कश्चनाकारः दृश्यते । तदाधारेण तस्य फलं कीदृशमित्युक्तम् । तत्सर्वमेवं विद्यते -

| क्र | आकारः | फलम् |
|---|---|---|
| १ | भूषणं, स्वस्तिकस्य | यात्रासिद्धिः । |
| २ | प्रासाद-शक्ति-श्रीवृक्ष-वर्धमानस्य च | युद्धे विजयः, राष्ट्रस्य वृद्धिश्च, स्त्रीलाभः, मनसः सुखम् तेन । |
| ३ | मकर-शम्बूक-शङ्ख-नलिनी-उत्पलानाम् च | वृद्धिः |
| ४ | स्नेहयुक्तस्य स्वेदगन्धश्चेत् | भूमिनाशः |
| ५ | नीलयुक्तपुष्पस्य | परुषम्, महद्भयञ्च । |
| ६ | धूम्रवर्णस्य पुष्पस्य | सद्यः काले एव राज्ञः वाहननाशः । |
| ७ | कपि, वाराह, असितनागस्य | राज्यच्युतिः |

[421] पालकाप्यगजशास्त्रं, दशमं प्रकरणं, श्लोकसङ्ख्या ३९ पर्यन्तम् ।

| | | |
|---|---|---|
| ८ | प्रवाल-मणि-मुक्त-वज्र-वैडूर्यनाम् | ते गजेषु पूजनीयाः । |
| ९ | श्रीवृक्ष-वर्धमान-आतपत्र-ध्वज-चामराणाम् | आरोग्य, जय, धनवृद्धिः, सौख्यञ्च । |
| १० | आयुधस्य | जयः |
| ११ | नन्द्यावर्तस्य | देशस्य सम्पदः नाशः । |

कोष्टकः - ५१

दन्ताः युद्धेषु आयोधनाय उपयुक्ताः ।एते स्वदन्तैः अन्यान् गजान् युद्धवीरान् वा घातयन्ति । ते चतुर्दशविधाः ।[422] इदानीं प्रत्येकस्यापि विवरणमेवं दत्तम् - सङ्घातः - अन्योन्यमुखसंश्लेषः । उल्लेखः - प्रोथाक्षेपः दन्ताभ्याम् । परिलेखः - तिर्यक् उन्नताघातः । कर्तरी - उभयोरपि पार्श्वयोः दन्ताघातः । तलघातः - दन्तवेष्टनलेखा । पार्श्वघातः - तिर्यक् प्रयोगः । आराघातः - दन्ताभ्यां संमुखाभ्यां लेखकेन सह । सूचीघातः - शुण्डस्य मध्यस्य भागस्य घातः । तोटकः - शिरः तिर्यक् समाकृष्य एकेन दन्तेन हननम् । सन्धिकः - सिंहवत् लीलावेदीमारुह्य अतिकोपेन गात्राभ्यां घातः । कशाघातः - शत्रुगजं प्रति प्रहारः वदनं तिर्यगुन्नम्य । वृक्षाघातः - प्रतिमानेन प्रतिमानं, रदनेन रदनयोर्मध्ये संविध्य सन्ताडनम् । निर्घातः - गात्रं सङ्कोच्य, उत्प्लुत्य कृतघातः । मिश्रितः - एतैस्साकं दन्ताघातश्चेत् ।[423]

हस्तिशिक्षायां गजदन्तविचारः न दत्तः न प्राप्तः वा । यद्यपि यथापूर्वं गजदन्ताः उल्लिखिताः तथापि तानुद्दिश्यैव न कोऽपि विचारः उपस्थापितः इति ।

मानसोल्लासे करिणः हननं कृत्वा दन्तान् न प्राप्तव्यमित्येवं वदति सोमेश्वरः - [424]

*घ्नन्ति ये करिणः पापा घातयेत् तान् महीपतिः ।*

*दैवान्मृतेषु नागेषु तेषां दन्तान् समाहरेत् ॥*

---

[422] सङ्घातश्च तथोल्लेखः परिलेखस्तथैव च । कर्तरी तलघातश्च पार्श्वघातस्तथैव च ॥
आराघातः सूचीघातः तोटकः सन्धिकस्तथा । कशाघातस्ततो ज्ञेयो वृक्षाघातस्तथैव च ॥
निर्घातो मिश्रितश्चैव दृश्यन्ते किल दन्तिषु । इत्थं चतुर्दशाघाताः प्रोक्ता वै मुनिपुङ्गवैः ॥
पालकाप्य गजशास्त्रे दशमं प्रकरणं, श्लो -५९, ६०, ६१ ।

[423] पा.ग.शा. दन्ताघातलक्षणमिति दशमप्रकरणस्य भागस्य ६२ तः ७२ पर्यन्तम् विद्यमानाः श्लोकाः ।

[424] मानसोल्लासे द्वितीये विंशत्यां तृतीयाध्याये १८० ।

शिवतत्त्वरत्नाकरे गजदन्तविषयः -

अस्मिन् ग्रन्थे प्रथमं दन्तस्य कान्तिः, आयुधैस्समानाः दन्ताः, तथैव शुभप्रदाः दन्ताः कथं भवन्तीति विवरणमस्ति ।[425]

यथोक्तं गजशास्त्रे तथैवात्रापि कल्पनोत्तरं दृश्यमानाकारभेदाः, रक्तस्रावः वर्णमाश्रित्य शुभाशुभफलानां निश्चयः जायते । यथापूर्वं कोष्टकद्वारेण ज्ञातव्यञ्चेत् -[426]

| क्र | आकारः | फलम् | क्र | आकारः | फलम् |
|---|---|---|---|---|---|
| १ | श्रीवृक्षः | इष्टार्थसिद्धिः | १० | स्त्रीरूपम् | अर्थनाशः |
| २ | ध्वजः | वृद्धिः | ११ | कलशः | पुत्रप्राप्तिः |
| ३ | वर्धमानः | विजयः | १२ | कुम्भः | निधिः |
| ४ | वृत्र | धनप्राप्तिः | १३ | दण्डः | यात्राविघ्नः |
| ५ | उदुम्बर/ विल्ववृक्षः | आरोग्यम् | १४ | कृकलासः कपिः,नागश्च | प्राणसहितं शत्रुः वशं गच्छति |
| ६ | चामरः | सुखप्राप्तिः | १५ | गृध्र/उलूक/काकः/श्येनः | प्रजामरणम् |
| ७ | प्रहरणम् | जयः | १६ | पाश/कबन्धः | राज्ञः मृत्युः, प्रजापत्तिः |
| ८ | नन्द्यावर्तः | च्युतराज्यस्य पुनः प्राप्तिः | १७ | श्वेतशूलं, अग्निवर्णमिव चक्रम्, पिङ्गवर्णीय-कुलिषं, हेमनिभ-वज्रायुधम् | मङ्गलकरः |
| ९ | लोष्टः | नूतनराज्य-प्राप्तिः | | | |

कोष्टकः - ५२

अग्रे गच्छन् कर्ता बसवभूपालः दन्तभग्नेन देशे कीदृशः परिणामः भवतीति एवं वदति १. दक्षिणदन्तः भग्नश्चेत् राज्ञः सैन्ये विप्लवः ।

२. वामदन्तः भग्नश्चेत् पुत्र-पुरोहित-आटविकप्रमुखं वा हन्ति ।

३. दन्तद्वयमपि भग्नञ्चेत् राज्ञः वंशनाशकः ।

४. वामदन्तस्य मध्यभागः भग्नश्चेत् शत्रुनाशकः ।

दन्ताघाताः दशविधाः इति प्रोक्ताः यथा - सम्पातः, उल्लेखः, परीलेखः, कर्तरी,

---

[425] वक्रेन्द्रायुधपट्रिशूलयमराङ्गण्डान्वितौ भेदने स्यायां निर्वणिनौ यथाऽयुधहलाभौ दक्षिणाभ्युन्नतौ ॥
दन्तवेष्टसमुन्नद्धमूलौ स्थूलौ प्रहारिणौ । समायुतौ पेशलौ च मुसलाग्ररदौ शुभौ ॥ शिवतत्वरत्नाकरस्य ७/११/१४६-१४७ ।
[426] शिवतत्वरत्नाकरस्य ७/११/१४८ - १५४ |

तलघातः, पार्श्वघातः, आराघातः, सूची, ताडितः सन्धितश्चेति । प्रत्येकस्यापि विवरणसहितमप्यत्र दत्तम् ।[427]

हस्त्यायुर्वेदे - गजानां रोगविचारे ग्रथितः ग्रन्थः हस्त्यायुर्वेदः दन्तविषयमध्यायत्रये विषदयति । ते तु दन्तरोगाध्यायो नाम ५० तमोऽध्यायः क्षुद्ररोगस्थानस्य, दन्तनाडीचिकित्सिताध्यायो नाम १७ तमोऽध्यायः शल्यस्थानस्य,

दन्तकल्पनाध्यायः इति उत्तरस्थानस्य दशमोऽध्यायश्चेति ।

क्षुद्ररोगस्थानस्य पञ्चाशत्तमोऽध्यायः दन्तरोगाध्यायः इति । अस्मिन् ७६ श्लोकास्सन्ति । अत्र चर्चिताः विषयाः दन्तदोषाः, दन्तस्योत्पातः, जरादोषाः, दन्तस्यागन्तुदोषाः इति ।[428]

शल्यस्थानस्य दन्तनाडीचिकित्सिताध्यायो नाम सप्तदशतमोऽध्यायः गजस्य दन्तस्य विषये चिन्तनमुपस्थापयति । अस्मिन्नध्याये ५३ श्लोकास्सन्ति । अत्र चिन्तिताः विचाराः गजस्य दन्तनाड्याः चिकित्सा । रोमपादस्य प्रश्नः दन्तविस्रावस्य कारणम्, औत्पातिकं किम्, अनौत्पातिकं किमित्यादि ।

दन्तकल्पनाध्यायः इति उत्तरस्थानस्य दशमोऽध्यायः । यथा नाम अत्र दन्तकल्पनं कथमित्युक्तम् । पालकाप्याय दन्तकल्पनविषये अत्र रोमपादस्य प्रश्नः -

*दुर्जातानि विषाणानि दिर्घाणि विषमाणि तु ।*

*कपाटद्वारपरिघप्राकारहरणादिभिः ॥ २ ॥*

*भज्यन्ते वाऽथ शीर्यन्ते मुञ्चन्ति सकलानि च ।*

*रक्षणं तेषु निखिलं भगवन्वक्तुमर्हसि ॥ ३ ॥*

---

[427] शिवतत्वरत्नाकरस्य ७/११/२०७ - २१२ ।

[428] दन्तरोगविषये पालकाप्यस्य कृते रोमपादस्य प्रश्नः एवं भवति -
दन्तरोगाः कतिविधाः नागानां सम्प्रकीर्तिताः । समुत्थानं च किं तेषां विज्ञायन्ते च ते ॥ किद्दशस्तु भवेत्साध्यासाध्याश्चापि कीद्दशः ? एषां प्रश्नानामुत्तरं पालकाप्यः एवं ददाति - दोषतो जरयोत्पातादागन्तुश्चेति कीर्त्यते । एवं चतुर्विधो दोषो दन्तानां परिकीर्तिताः ॥ इति हस्त्यायुर्वेदः, २/७६/२, ३, ५ (श्लोकाः) ।

एतेषां सर्वेषां कारणं वदन् पालकाप्यः सर्वमपि ६१ श्लोकेषु विवृणोति । अस्मिन्नध्याये आहत्य ६५ श्लोकास्सन्ति ।

अस्मिन्नध्यायभागे गजानां सञ्चोदनं युद्धाय, तेषां क्रीडेत्यादिकाः प्रदत्ताः । [429] अत्र तु प्रधानतया तेषां युद्धसामर्थ्यवर्धनविचारः चर्चितः । मदयुताः गजाः विवादाय चोदनीयाः । तत्र ढक्का, घण्टा, मृदङ्गादीनां वाद्यानां रणरवः वादितः भवेत् । सर्वान् गजान् गजाः वृत्ताकारे स्थापयेयुः वीरपरिचारकाः । तेऽपि गजाः महानादकराः रोमहर्षणं कुर्युः । राजा परिचारकाणाञ्च मनः प्रीत्यर्थं दुकूलादिकं दद्यात् । गजानां कोपनार्थमुद्दीपकाहारपिण्डान् दापयेत् (परं तेषां स्वास्थ्ये अयं विप्रतिकारकः न भवेत्) । मन्दान् गजानातपे स्थापयेत्, भद्रान् वृक्षस्य च्छायायां, तथैव मृगान् तु च्छायायां बन्धयेत् । विवादस्य दिवसे ते तैलेन जघनप्रदेशे लेपिताः, मस्तके सिन्धूरेण, उत्तमं तिलकं कुम्भयोर्मध्ये संस्थापिताः, सम्यगलङ्करणीयाश्च । राजापि तत्क्षेत्रमागत्य किञ्चिदुन्नतस्थाने तेषां स्तम्भघट्टनादिक्रीडाः पश्येत् तथा उपविशेत् । तत्क्षेत्रन्तु विगताश्म, तोरणादिभिरलङ्कृतञ्च स्यात् । [430] गजविनोदविधिरित्ययमप्यध्यायभागः गजेन साकं धावनादिक्रीडां विवृणोति । अस्मिन्नध्यायभागे उत्तम-मध्यम-नीचजविनः गजाः, तथैव जनाश्च चेतव्याः । अन्ये उत्साहात् मध्ये न प्रविशेयुः । गज-जनयोर्मध्ये धावनक्रीडा अत्र विनोदत्वेन विषदीकृतः । [431]

*६.७ मातङ्गलीलायां गजमूल्यम् -*

प्रथमतया गजमूल्यविषयः न कुत्राप्युक्तः अन्य ग्रन्थेषु मातङ्गलीलां विहाय । [432] मनुष्यैः गजानां मूल्यमेतावदेवेति कथयितुं न शक्यते । यत् मूल्यं चिन्तितं विक्रेत्रा तत् क्रेतुश्चापि भवति तदेव योग्यमूल्यमिति निर्धारितव्यम् ।

---

[429] हस्तिशालाविषये पूर्वस्मिन्नध्याये चर्चितः । हम्पी विद्यमाना हस्तिशालायाः मध्यभागस्तु राज्ञः वीक्षणाय संरक्षितः इति ज्ञायते । इत्यत्र प्रायः विजयनगरस्य नृपाणां कालेऽप्येवं गजविनोदार्थं, तेषां क्रीडनार्थञ्च व्यवस्थाः आसन्निति ।

[430] पालकाप्यगजशास्त्रस्यान्तिमस्य वाह्यालीप्रकरणं नाम दशमप्रकरणस्य उपान्तिमभागोऽयम्, यत्र १४ श्लोकास्सन्ति ।

[431] पालकाप्यगजशास्त्रस्यान्तिमस्य वाह्यालीप्रकरणं नाम दशमप्रकरणस्य उपान्तिमभागोऽयम्, यत्र १४ श्लोकास्सन्ति ।

[432] मातङ्गलीलायाः सप्तमः पटलः गजमूल्यविषयकः । मूल्यविशेषाधिकारे श्लोकत्रयं दृष्टम् । तथापि गजशिक्षा-ग्रन्थस्य व्याख्यानभागे (७२तमे पृष्टे) इन्द्रनीलहीरमणिमाणिक्यादिवत् मूल्यनिर्धारणार्हाः बहुद्रव्यप्रदानादिना क्रय्याः इति कथितः ।

एकस्याप्यसम्मतिश्चेत्तन्मध्यममूल्यमधमनीचमूल्यमुभयोरपि असम्मतिर्वा यदि । श्रेष्ठः गजः यदि सर्वगुणोपेतस्तर्हि पूर्णं मौल्यम्; नेत्रेण, पादेन, दन्तेन विहीनश्चेत्, यदि वा बधिरः, रोगिष्टस्तर्हि अर्धमूल्यम; पूर्णमौल्यात्त्रिभागात् यदि वा सः गजः अर्धकर्ण-वालः वा; पूर्णाच्चतुर्थभागः नागेद्रोऽपि पतितदन्तश्चेत् । न्यूनमौल्यं भवेन्नागस्य यदि वोन्नतः वामदन्तः दक्षिणस्यापेक्षया । करेणूनां मूल्यं तु गजादपि १/८ तमः भागः न्यूनः, पूर्णात्तृतीयांशान्यूनोऽवा ।

*६.८ गजनेत्रवर्णलक्षणम्-*

गजनेत्रवर्णलक्षणमित्येनं विषयमधिकृत्य विचारः न कुत्रापि वर्तते (व्यास) गजशास्त्रं विना ।[433] गजनेत्रवर्णनसन्दर्भे उक्तं यत् यस्य गजस्य नेत्रे मधुनिभः, घृतपिण्डवत्, गोमेधकमणिरिव, अग्नि-सूर्ययोरिव वर्णयुते भवतः सः राजेभ्यः युद्धेषु विजयं दापयतीति ।[434]

*६.९ गजमदः*

गजानामतिविशिष्टेषु लक्षणेषु अत्यन्तप्रमुखं नाम तस्य मदजलस्रावः । तस्य गण्डस्थलाभ्यामयं रसः स्रवति । सर्वेष्वपि काव्येषु प्रायः विना मदस्रावोल्लेखः गजविषयकवर्णनं परिपूर्णमिति न मन्यते कविभिः । गजानां मदस्रावः भवति न करिणीनां । अयं कश्चन स्निग्धद्रवः, कृष्णवर्णः, गाढगन्धदश्च । अपारप्रमाणेऽस्य निर्गमनं भवति गजस्य कुम्भस्थलाभ्यां ये नेत्रकर्णयोर्मध्ये स्थिते । मदावस्था सामान्यतया संवत्सरे मासचतुष्टयपर्यन्तं वा गजशरीरे स्वस्वभावं प्रकटयति । मृगपक्षिशास्त्रे हंसदेवः सम्पूर्णयौवनकाले मदजलस्य स्रावः भवति यस्मिन् काले तेषां पूर्णशक्तिः भवति इति कथयति ।[435]

---

[433] (व्यास)गजशास्त्रे चतुर्दशकं प्रकरणम् गजस्य नेत्रस्य स्वराणाञ्च परिचयं ददाति ।

[434] मधुनो घृतपिण्डस्य गोमेदकमणेस्तथा । आदित्यस्यानलस्यापि सवर्णे यस्य चक्षुषी । स एव वारणो राजन् समरे जयावहः । पृ.सं ४३२; (व्यास) गजशास्त्रम् ।

[435] हंसदेवस्य मृगपक्षिशास्त्रस्य (गजविभागः) षष्टश्रेणी । तत्र श्लोकः - २३ ; नवमे दशमे वर्षे कलभा द्दढविक्रमाः । सम्पूर्णयौवनारूढा मत्ता मदजलस्रवाः ॥ २३७ ॥ पृ.सं.४४७, (व्यास)पा.ग.शा-षष्ठश्रेण्याम् ।

नीलकण्ठस्य मातङ्गलीलायां मदभेदाधिकारो नाम नवमोऽध्यायः पूर्णतया गजमदस्य कृते एव परिरक्षितः । अस्मिन्नध्याये २२ श्लोकाः विद्यन्ते । अत्र गजानां विविधाः मदावस्थाः वर्णिताः । प्रथमं मदस्योत्पत्तिः कथं जाता इति प्रश्नः उद्भवेत् ।

प्रथमाध्याये मातङ्गलीलायां मदस्योत्पत्तेः कारणमुक्तम् यत् देवानां वाहनत्वेनोपयोक्तुं गजाः नीताः देवदानवसमरम् । परं तत्र महासैन्यभीताः ते सर्वे ततः अधावन् । ज्ञात्वेदं ब्रह्मा मदस्य शक्तिमुत्पाद्य तेषु न्यक्षिपत् । एतेन मदशक्तियुक्ताः भूत्वा गजाः क्रोधाविष्टाः दानवं सैन्यं विध्वंस्य देवेभ्यः जयं दापयित्वा स्वां दिशमगच्छन् ।[436] मदस्य कारणेनापि गजाः गन्धगजाः इति कथिताः ।[437]

अधिकमधुररसयुताहारसेवनात्, हरित्पत्रयुक्ताः शाखाः प्रभञ्जिताः, अन्यैः हरिद्वर्णाहारवस्तुभिः, मृदुघासैः, अन्यैरुपर्युक्ताहारैश्च कर्णानन्दकरवाण्या च धूलिमिश्रितवालुकैः, जलेन च स्वैरं विहरतः गजस्य हृदयेऽऽनन्दः उत्पादितः । यदानन्दतुन्दिलः जातः तदा गजशरीरं तु पूर्णतया धातुभिर्युक्तम् । एतेन अनुरागोत्पन्नगजस्य शरीरं करिणीमपेक्षते । एतेन सञ्चोदिता करेणुरपि मैथुनमभिलषति । गजस्तु विनाकुञ्चनं करेण्वा साकं जले क्रीडन् स्वावस्थां यापयति । मदस्य कारणेन शरीरस्य समतोलनं व्यत्यस्ती भवति । अधिकानन्दकारणैः गजानां मदस्रावोऽपि अधिको भवति । यदा अवस्थान्तरमनुभवति गजस्य स्रावः न्यूनः भवति । नयनं-तालु-गण्डस्थल-कर्ण-नाभि-शिश्न-हस्त-चूचुकेत्यष्टाङ्गेभ्यः गजस्य मदजलं स्रवति । हर्षः, शीघ्रता, गन्धः, देहस्यगन्धता, गतिः, क्रोधः, वीर्यमभीरुता इति मदस्रावस्याष्टगुणाः ।

ब्रह्मा मदं गजमात्रेषूत्पादितवान् । जगति सृष्टेषु मदेषु अर्धं गजेषु, अन्यदर्धं अन्येषु चराचरवस्तुषु निक्षिप्तवानिति । अतः एव युद्धे मदगजानां शौर्यं, वीर्यं पराक्रमश्च च । मदोत्पादने गजेषु प्रकृतावपि बहुविधपरिवर्तनानि जायन्ते । पादपाः

---

[436] मातङ्गलीलायां प्रथमपटलस्य श्लोकसङ्ख्या २४ ।

[437] सर्वेषां मदकृद् वसन्तसमयः प्रोक्तो विशेषादसौ नागानां तु ततो वसन्तजनिता ये ते तु गन्धद्विपाः ।
तेषां स्वेदपुरीषमूत्रमदतोयाघ्राणनादञ्जसा माद्यन्त्यन्यगजाश्च ते जयकरा गन्धद्विपा भूभुजाम् ॥ मातङ्गलीला, १/४० ।

वृद्धिं गच्छन्ति । मदान्विते गजे पृथिवी सुभिक्षा भविष्यति । आदौ यदि दक्षिणे कटात् स्रावः तद्राज्ञे जयमाप्नोति । वामे स्रावश्चेत् भूमिः भूरिवृष्टिसेचिता । यदिवा कटद्वयेन कोशेनच समं मदं स्रवति, राज्ञः यशस्विता।

मदस्योत्पादनेन गजस्य मानसिकसंस्थितिः प्रतिकूला भवति । वल्मीक-वृक्षादीनां भञ्जनं करोति प्रकुप्तदृश्ट्या; शीघ्रगामिनः तिर्यक् न चलति । शुण्डं आकाशे उन्नीय, जलं स्फालयति बृंहणं कुर्वन् । स्वशुण्डं दन्तेन उद्ग्रन्थयति । एषावस्था यशस्करी । यदा गजः विनाकारणं स्खलति, स्रस्तकण्ठः, दुःखितमनः, दीर्घं मन्दं च श्वसिति, हस्तः न्यस्तः, निद्रालुः, अलसः, अधिकं भक्षयन् अनेकवारं मूत्रं विसर्जयति तदा गजस्य भयदारुणमदावस्थागतेति निर्णेतव्या ।

गजानां मदावस्थास्वनेकाः विधाः यथा -

| क्र | अवस्था | नाम | एवं परिवर्तनं दृश्यते गजेषु |
|---|---|---|---|
| १ | प्रथमा | कटपूर्णः | नखदन्तनेत्रं मधुनिभ इव, त्वक् मेघ इव श्यामा, रक्तान्तनेत्रे, कुमुदप्रणालबिन्दुशरीरं, अन्यर्गजविरोधी, पांसु-जलैःक्रीडा, सुन्दरः |
| २ | द्वितीया | आर्द्र-कपोलितः | मदजलप्रवाहैः प्लाविकपोलः, मेघवद्गर्जति, दूरेस्थितगजमपि हन्तुमनः । |
| ३ | तृतीया | अधो-निबन्धः | इतस्ततः पुनः पुनः पश्यति, कोशदण्डात् मदः बिन्दुशः पतति, पश्चाद्गन्तुमनः, शीघ्रगामी, आलानद्वेषी । |
| ४ | चतुर्थी | गन्धचरः | सप्तपर्णस्य पद्मस्य वा समानगन्धं भजन्, कोपाविष्टः, कुङ्कुमवर्णस्य स्रावयुक्तः, चोदने अरिरथहयध्वंसकः । |
| ५ | पञ्चमी | क्रोधधीः | अनिच्छा शय्यायां, अदने, पाने सुवाचि च, अन्धकारे तिष्ठति रात्रौ, हस्तिपस्यापि न श्रुणोति, हयगजपदातिसैन्यं विदारयति रुष्टः। |
| ६ | षष्टी | धावनपरः | उन्मत्तः क्रोधेन, जगन्नाशयितुकामः इव, नैकत्र तिष्ठति, न सहते परघण्टाशब्दमपि, निजच्छायाद्वेषी च । |
| ७ | सप्तमी | परिमुक्तः | मदसङ्ग्रहः न्यूनं भवति, कोपोऽपगतः इति क्रीडितुमभिलषति पदचालनैः, परवारणं सहते निर्मत्सरः, विमुक्तजलदः इवावभासते । |

कोष्टकः - ५३

एतासां सप्तावस्थोत्तरं गजानां शक्तिः क्षीणा भूत्वा शरीरस्य धातवः नितरां विनष्टाः इति कारणेन ते रोगबाधिता । अत एव पुनः अन्येषु संवत्सरेषु तेषां दानं न भवति । अतः मददानोत्तरं मासत्रयं तेषां धातुसंवर्धनार्थं यत्नः करणीयः । गजानां मदोत्पादनाय, मदोन्मत्त-गजानां यन्त्रणायच केचनौषधोपचाराः प्रदत्ताः । [438]

सप्तशोभाः गजानां मदावस्थायां । ताः, तत्तत्कालीनावस्थाश्च एवं [439]

| मदावस्था | अवस्थान्तरम् |
|---|---|
| सङ्घातरुधिरा | सर्वदा शुण्डं, मुखं वालं, कर्णौच सञ्चालयति; सृक्किणी, ओष्टौ, जिह्वा, उरः कर्णौ च कान्तियुताः । |
| प्रतिच्छिन्ना | मुखाग्रभागः, कण्ठः, मणिबन्धौ, उरः, कक्षश्च स्थूलं भवन्ति मांसवर्धनात् । |
| पक्षलेपिनी | शरीरस्य सन्धयः, मुखस्य पार्श्वौ च पीनाः, वलिरहिताश्च भवन्ति । |
| धातुसाम्यांशका | कक्षभाग-कण्ठ-दन्तावेष्टनभागाश्च शीघ्रतया स्थूलाः भवन्ति । |
| समकक्षा | पृष्टभागः, कशेरुः-तदन्तश्च स्थौल्ये समानाः भवन्ति । गम्भीरं गर्जति चलने । दीर्घं श्वसिति महतीमलसतां प्रकटयति । (शोभाकरीयम्) |
| चलिता | आशरीरस्य मांसखण्डाः गतौ चलन्ति । |
| द्रोणिका | पृष्टभागः समान्तरितः भवति वक्रतां विना कदल्युत्तानपत्रवत् । |

कोष्टकः - ५४

अनुवर्तयन्तः पुनः मदावस्थालक्षणं नाम भागः दृश्यते यत्र गजानां सप्तावस्थाः । गजाः मदावस्थायां बहूद्दीप्ताः भवन्तीति कारणेन सर्वे जनाः सदैव जागृताः भूत्वा तान् विशेषदृष्टावेव स्थापयेयुः बन्धने । ताः सप्तावस्थाः एवं सन्ति - [440]

| क्र | अवस्था | गजे दृश्यमानानि परिवर्तनानि |
|---|---|---|
| १ | वित्तिः | मदावस्थायां आगते पञ्चमे, सप्तमे द्वादशेऽहनि गजस्य मेड्रः, पृष्टभागश्च विस्तारितौ भवतः समप्रमाणकौ च । रक्ताक्षः गजः धेनुकामनुगच्छति । सुन्दररूपस्सन् धीरोऽपि लघुपादपान् भञ्जयन्, मृदा जलेन वा क्रीडनतत्परः । प्रणयचोदितः रात्रौ भ्रमति । |
| २ | कोपावस्था | अल्पकालमेव शेते । महाकोपी । जृम्भते यदि तिष्ठति । |
| ३ | अधो-निबन्धनम् | न निद्राति, प्रबलः, कण्ठं प्रसारयति पृष्टभागमालम्ब्य, उग्रभावं प्रकटयन् योद्धुं सदासन्नद्धः । शीघ्रगामि, हस्तेन कपोलं चुम्बति, स्वाधरं पुनःपुनः लिह्यते, मदजलं ललाटे, उदरभागे च दृश्यते । |

[438] नीलकण्ठस्य मातङ्गलीला मदभेदाधिकारो नाम नवमः पटलः, श्लोकः २०-२१

[439] पालकाप्यगजशास्त्रे(त) वाह्यालीप्रकरणं नाम दशमप्रकरणस्य मदशोभालक्षणस्य भागः श्लो. ७३ तः ८२ पर्यन्तम् ।

[440] पालकाप्यगजशास्त्रे(त) वाह्यालीप्रकरणं नाम दशमप्रकरणस्य मदावस्थालक्षणस्य भागः श्लो. ८३ तः १०३ पर्यन्तम् ।

| | | |
|---|---|---|
| | | हस्तादपि स्रवति । नेत्रे स्रवतः (अश्रु), विहरत्यरण्ये मेघवद्गर्जन् इत्यादिलक्षणान् दर्शयति । |
| ४ | वशानुगा | मदमधिकं स्रावयति । स्थिरशरीरी, सुखं-दुःखमुभयमपि समानतया गणयति, आकर्षकाननः, योद्धुं समर्थः, अधिकधातुक्षयमनुभवति । |
| ५ | क्रोधिनी | कर्ण-चूचुक-नेत्र-कटि-तालु-शिश्न-हस्ताग्रभागान्मदस्रावः अधिको जायते । नेत्रेतु रक्तवर्णे, सदैव रोमाञ्चितः । |
| ६ | चलिता | क्रोधाविष्टः, मन्दगतिः, क्रोधभावः, रात्रौ स्वैरं सञ्चरति महास्रावेण कर्ण-नेत्राभ्यां निरन्तरं मदः स्रवति । |
| ७ | अतिवर्तिनी | मदस्रावः आशरीरान्न्यूनः, निर्भयं अङ्कुशं विना, अस्पष्टदृष्टिः, आधोराणकस्याज्ञां नावगच्छति न पालयति च, कृशः धातुनिर्गतः, अयन्त्रितश्च। |

कोष्टकः - ५५

हस्त्यायुर्वेदस्य प्रभिन्नाध्यायः अस्मिन्विषये बहुविषदतया विचिन्तयति । मदस्य कालः, तस्य कारणानि, वर्णवैविध्यमित्याद्यंशाः अत्र द्रष्टुं शक्यम् । त्रिदोषाणामाधारेण तेषां वर्णं कालश्च परिवर्तितं भवतीति । कोष्टकेनास्य विवरणं शक्यते - [441]

| क्र | दोषः | मदजलवर्णः | मदजलस्य कालः |
|---|---|---|---|
| १ | वातदोषः | यवोदकवत् | प्रावृट्कालात् किञ्चित् पूर्वम् |
| २ | पित्तदोषः | पीतवर्णः | शरत्कालः |
| ३ | कफदोषः | धान्यपिष्टजलवत् | हेमन्तर्तौ |
| ४ | सन्निपातः | विविधवर्णाः - प्रधानदोषमवलम्ब्य | - |
| ५ | रक्तजः | रक्त/पीतवर्णयुतः | ग्रीष्मः, निदाघो वा |

कोष्टकः - ५६

मदस्रावस्य कालोऽपि चर्चितः अस्मिन्नध्यायभागे -

| क्र. | अवस्थायाः नाम | वर्णनम् |
|---|---|---|
| १ | अभिज्ञानः | मदजलं पूर्णिमायां दृश्यते । (सम्भोगकाले मदावस्थायां विद्यमानात् गजात् प्राप्तस्य दौहितृगजः एवं स्रावयति।) |
| २ | हर्षः | परितः विद्यमानेन वातावरणेन सञ्चोदितः सम्भोगेच्छः अस्य भवति । (वसन्तः, प्रफुल्लानि पुष्पाणि, मदविह्वलाः मयूर-कोकिल-सारस- हंसाः, परिमलभूयिष्टवायुमण्डलं तस्मिन् प्रदेशे करिणीनामुपस्थितिः च) |

[441] हस्त्यायुर्वेदस्य क्षुद्ररोगस्थानस्य ६१तमोऽध्यायः ।

| | | |
|---|---|---|
| ३ | पारिणमिकः | वृद्धगजेषु दृष्टः यस्तु पीनः अस्थूलश्च । न्यूनमपि बहुवेदनादायी । |
| ४ | नैसर्गिकः | कदाचिन्निर्भर्त्सनेन भवति वधादर्शनात्, बहुकालबन्धनात् वा । |
| ५ | सन्तापजः | अधिकातपः, कर्माधिक्यम्, अतिश्रान्तता, बहुभारवहनं, बृहद्वृक्ष निपातनं अस्य विधस्य मदस्रावस्य कारणम् । एतैः कर्मभिः उत्पत्स्यमानेन तापेन मदजलः मदग्रन्थितः भिद्यते । अस्य स्रावस्य सामान्यतया दुर्गन्धः । वमनमनुवर्तते । |
| ६ | पुष्ट्या | अधिकसत्त्वयुताहारकवलेन मदस्रावः भवति । पैत्तिकमदोऽसौ । |
| ७ | व्याधिजः | शिरोरोग-मूत्रादिरोगैर्वा, शुद्धपाकलादि ज्वरैर्वा मदस्रावः । |
| ८ | शौर्यजः | युद्धभूमौ विजिगीषु प्रवृत्त्या वा भर्तुः विजयेन सन्तुष्टः वा, मदजलं स्रावयेत् । एतादृशाः हर्षादिसन्दर्भाः मदजलस्रावाय चोदकाः । |

कोष्टकः - ५७

आहत्य १४ विधास्सन्ति मदाः । एतेषु ५ विधाः दोषजाः । अन्ये सर्वेऽपि विशेषकारणीभूतवस्तुभिः उत्पन्नाः । हस्त्यायुर्वेदस्य प्रभिन्नाध्यायः मदमपि रोगमिति परिगणयन् तस्य लक्षणानि, निमित्तानि, प्रशमार्थमनेकविधौषधानाञ्चोपायान् च वर्णयति।

शिवतत्त्वरत्नाकरः मदमष्टविधाः इति वदति । यथा - वासा, नगरम्, शिथुः, घर्मः, मदः, शीकरः, छिक्का, मुखः इति ।[442]

गजशिक्षाग्रन्थे मदविषये एकोऽपि विषयः अनुक्तः इत्येव विशेषः । न गवेषणीयोऽत्र कारणं यतो हि अत्र शिक्षणस्य प्रामुख्यमस्ति । ग्रन्थः पूर्णतया अलब्धः इति कारणेन मदविचारः अग्रे क्वचित् स्याच्चेदपि पूर्णतया ग्रन्थोपलब्धिद्वारेणैव विचारः चिन्तनीयः ।

*६.१० गजानां रोगाः -*

यथा सर्वजीविनां तथैव गजानामपि रोगबाधाः भवन्ति । रोगविचारचर्चा ग्रन्थत्रये केवलं कृता । मानसोल्लासे गजानां केषञ्चन रोगाणां विवरणं दृश्यते । गजशास्त्रानुबन्धः नाम गजशास्त्रस्य कश्चनभागः गजानां काञ्चित् रोगानुदहरति तेषां

---

[442] कटश्च श्रवणे नेत्रे वक्षः कोशः करः स्तनौ । पादश्च करिणामेवमष्टस्थाने स्रवेन्मदः ॥ वासा च नगरं शिथुर्घर्मश्च मदशीकरौ । छिक्का मुखश्च करिणां मदनामानि चाष्टधा ॥ शिवतत्वरत्नाकरः ७.११.२०३,२०४।

कृते दीयमानानोषधीन् च । गजविषये सर्वैरपि ज्ञास्यमानः महान् ग्रन्थः कश्चन विद्यते । प्रायः कस्यचित् प्राणिनः स्वास्थ्यरक्षणाय एतावान् बृहद्ग्रन्थः क्वचिदन्यत्र दृश्यते वा न वा इति वक्तुं कष्टमेव । अस्य महाग्रन्थस्य नाम पालकाप्यमुनिविरचितः हस्त्यायुर्वेदः इति । श्लोकरूपेण गद्यरूपेणापि क्वचित् गजारोग्यविषयकविचाराः अत्र सम्यक् निरूपिताः । अयमपि ग्रन्थः पालकाप्य-रोमपादयोः सम्भाषणरूपेणैव वर्तते । चम्पानदीतीरे उपविष्टः रोमपादः पालकाप्यं प्रत्येकमपि गजविषयं पृच्छति, रोगकारणं-लक्षणं-निदानं-परिहारोपायाश्च पालकाप्येन ग्रथिताः । कदाचिदस्मिन् १२,००० श्लोकाः भवेयुः ।

अयं महाग्रन्थः स्थानचतुष्टये विभक्तः । प्रथमं स्थानं महारोगस्थानम् । अस्मिन् २० अध्यायाः सन्ति ।[443] अस्य ग्रन्थस्य अदिमाः सप्ताध्यायाः सामान्यतः गजविषयकान् विविधानंशान् ब्रुवन्ति ततः परं गजानां विविधानां महारोगाणां विवरणं दृश्यते ।

द्वितीयस्य स्थानस्य नाम क्षुद्ररोगस्थानमिति । अस्मिन्नाहत्य ७२ अध्यायाः सन्ति[444] यत्र एषां वारणानां अतिसार-विषभक्षण-सर्पदष्ट-हृदयदोष-गलग्रह-भूत-उन्माद-

---

[443] महारोगस्थाने एतेऽध्यायाः विद्यन्ते - १. वनानुचरिताध्यायः २. अन्नसमाचारध्यायः ३. सात्म्यनिश्च्याध्यायः ४. शास्त्रसङ्ग्रहाध्यायः ५. गजरक्षणविन्यासाध्यायः ६. शिश्योपनयनाध्यायः ७. रोगविभक्त्याध्ययः ८. ज्वरोत्पत्ति अध्यायः ९. पाकलाध्यायः/पाकलाध्याय, शेषभूत ज्वरहेतु विनिश्चयाध्यायः १०. स्कन्दाध्यायः ११. पाण्डुरोगाध्यायः १२. आनाहाअध्यायः १३. मूर्च्छाध्यायः१४. शिरोरोगाध्यायः १५. पादरोगाध्यायः १६. व्यापद्रोगाध्यायः १७. शोफाध्यायः, स्वेदाध्यायः, शान्ति रक्षाध्यायः १८/२०. नेत्ररोगाध्यायः

[444] क्षुद्ररोगस्थानं नाम द्वितीयस्थानेऽध्यायाः-१. वमतुरोगाध्यायः २. अतिसाररोगाध्यायः ३. मदनजग्धकाध्यायः ४. तृणशोषि अध्यायः ५. कर्मातिनीतचिकित्सिताध्यायः ६. विषपरीक्षाध्यायः ७. दूषीविषाध्यायः ८.--- ९.--- १०. सर्पदष्टाध्यायः ११. स्फोटिकाध्यायः १२. अपवादबद्धाध्यायः १३. पूर्वाबद्धाध्यायः १४. विसर्पाध्यायः १५. हृदयस्फाल्याध्यायः १६. वालक्षाणि अध्यायः १७. हस्त-ग्रहणाध्यायः १८. हस्तोन्मथिताध्यायः १९. उदावर्ता अध्यायः २०. उत्कर्णकाध्यायः २१. वातर्गति अध्यायः २२. मन्याग्रहाध्यायः २३. मदक्षीणाध्यायः २४. कृशाध्यायः २५. बलक्षीणाध्यायः २६. श्लेष्माभिषन्नाध्यायः २७. वनसत्म्यानुलोमिकाध्यायः २८ .तलकाशी अध्यायः २९. तलकाशीचिकित्सिताध्यायः ३०. गलग्रहाध्यायः ३१. सिद्दार्थकाध्यायः ३२. भूतग्रहाध्यायः ३३. उन्मादाध्यायः ३४. अपस्माराध्यायः ३५. वातकुण्डली अध्यायः ३६. भारोन्मथिताध्यायः ३७. लुप्तचिकित्सिताध्यायः ३८. द्रह्न.पत्रकृमि अध्यय ३९. उरःक्षताध्यायः ४०. शोनिताण्ड्याध्यायः ४१. यवगण्डशिराध्यायः ४२. चर्मकीलाध्यायः ४३. वृद्धचिकित्साध्यायः ४४. अवसन्नाध्यायः ४५. जठरकाध्यायः ४६. बालचिकित्साध्यायः ४७. रात्रिक्षिप्ताध्यायः ४८. मूत्रसङ्गाध्यायः ४९. सूतिकाध्यायः ५०. दन्तरोगाध्यायः ५१. चेतोश्रंशाध्यायः ५२. शूलद्वयाध्यायः ५३. शारदाध्यायः ५४. मधुमक्षिकादष्टाध्यायः ५५. छवीदोषाध्यायः ५६. मृत्तिकाध्यायः ५७. ग्रहणीदोषचिकित्साध्यायः ५८. आमाध्यायः ५९. कृमिकोष्ठि अध्यायः ६०. क्षयाध्यायः ६१. प्रभिन्नाध्यायः ६२. कर्णवालकृमि अध्यायः ६३. कर्णरोगाध्यायः ६४. अभक्थच्छन्दी अध्यायः ६५. भक्तग्रासोपबद्धाध्यायः ६६. द्रोणीक/द्रोणीकशोफाध्यायः ६७. अतियाताध्यायः ६८. गुल्माध्यायः ६९. पित्तकफहृद्रोगचिकित्साध्यायः ७०.गात्ररोगाध्यायः ७१.आगन्तुगात्ररोगाध्यायः ७२. गात्ररोगभेदाध्यायः

अपस्मार-पीडितरोगाः, इत्यादीनां रोगाणां विवरणं, कारणं, लक्षणं, रोगोपचारः इत्याद्यंशाः स्पष्टीकृताः ।

तृतीयं तु शल्यस्थानम् । अस्मिन् ३४ अध्यायाः सन्ति । [445] गर्भसम्भवः, गर्भस्यावक्रान्तिः, भग्नचिकित्सा, दन्तोद्धरणं, मूढगर्भापनयनमित्यध्यायेषु अधिकतया गजानां शस्त्रचिकित्सा विशेषतया वर्णिताः । अस्य स्थानस्यातिविशेषभागः प्रदेशाज्ञानाध्यायो नाम २९तमोऽध्यायः । अत्र गजशरीरस्य सर्वावयवानामुल्लेखः कृतः ।

चतुर्थे उत्तरस्थाने तेषां विविधोपचाराः ३४ अध्यायेषु भृशं वर्णितास्सन्ति । [446]

मानसोल्लासकर्ता सोमेश्वरोऽपि गजानां विविधानां रोगान् चिन्तयति । गजानां विविधानां रोगाणां कारणानि च ब्रुवन्, रोगाणां निवारणोपायान्, तेषां संवर्धनक्रमान् च सम्यक् वर्णयति । अत्र प्रामुख्यं वहति तेषां सुयोग्याहारक्रमः । राज्ञः प्रथमं कर्तव्यं गजानां सुष्ठुप्रमाणकाहारप्रदानम् । तेषां कृते नवनीत-दधिविमिश्रितं धान्यानि, आरोग्यपूर्णप्राणिनां मांससारः, इक्षुखण्डाः, मधुरविमिश्रितान्नं, घासेत्यादीनां च कालानुगुणं प्रदानमवश्यकमिति भणति ग्रन्थकारः । योग्याहारैस्साकं तेषां स्नानार्थमपि विशेषव्यवस्थाः कल्पनीयाः राजभिः । मृदुशयनस्थानस्य पांसुदानयोग्यभूमेश्च संरचनं

---

[445] शल्यस्थाने एतेऽध्यायाः दृष्टाः - १. द्विव्रणीयो द्विव्रणीयाध्यायः २. सद्यःक्षताध्यायः ३. सद्यःक्षतचिकित्सिताध्यायः ४. षडत्ययोपचराध्यायः ५. व्रणोपकर्मलक्षणोपक्रमाध्यायः ६. द्वादशोपक्रमाध्यायः ७. गर्भसम्भवाध्यायः ८. गर्भावक्रान्ति अध्यायः ९. शरीरविचयाध्यायः १०. शस्त्राग्निप्रनिधानाध्यायः ११. यन्त्रविधि अध्यायः १२. शल्योद्धरणाध्यायः १३. विद्रधिरोगाध्यायः १४. व्रणचिकित्साध्यायः १५. नाडीव्रणचिकित्साध्यायः १६. शिराव्यूहव्यधाध्यायः १७. दन्तनाडीचिकित्सिताध्यायः १८. अधिकदन्तचिकित्सिताध्यायः १९. शिरच्छेदाध्यायः २०. मर्मप्रमाणाध्यायः २१. एरण्डकाध्यायः २२. मर्मविद्धाध्यायः २३. मर्मविद्धाध्यायः २४. दोषविवायो अध्यायः (चय) २५. अग्निदग्धचिकित्सिताध्यायः २६. लूताध्यायः २७.-- २८.-- २९. प्रदेश-ज्ञानाध्यायः ३०. शस्त्रविधि अध्यायः ३१. क्षराध्यायः ३२. भग्नचिकित्सिताध्यायः ३३. मूढगर्भापनयनाध्यायः ३४. दन्तोद्धारणाध्यायः

[446] उत्तरस्थानं नाम चतुर्थस्थाने अध्यायाः - १. स्नेहपानाध्यायः २. स्नेहपानविधि अध्यायः ३. अन्नपानाध्यायः /अन्नपानविधि अध्यायः ४. स्नेहविधि अध्यायः ५ .बस्तिदानाध्यायः ६. शालविधानाध्यायः ७. नस्यदानाध्यायः ८. यवसाध्यायः ९. अरिष्टज्ञानाध्यायः १०. दन्तकल्पनाध्यायः ११. रसवीर्यविपाकाध्यायः १२. इक्षुदानविधिकथनम् १३. नस्यदानविध्यध्यायः १४. अञ्जनदानाध्यायः १५. अन्नपानगुणाध्यायः १६. ऋतुचर्याध्यायः १७. कार्याकार्यविधि अध्यायः १८. सौवीरकपानविधि अध्यायः १९. सुराप्रतिपानविधि अध्यायः २०. गुग्गुलु विधानाध्ययः २१. क्षीरदानविधि अध्यायः २२. श्रीगजसम्भवाध्यायः २३. किमर्थक्याध्यायः २४. परिचारक हेतुज्ञानाध्यायः २५. त्रिविधि अध्यायः २६. पथ्यापथ्य विचाराध्यायः २७. करीष मूत्राध्यायः २८. लशुनकल्पाध्यायः २९. लवणयोगाध्यायः ३०. पांशुदानाध्यायः ३१. मदावस्थाध्यायः ३३. जलहस्तिलक्षणाध्यायः ३४. जलौकाध्यायः ३५. उपसर्गनिरूपणाध्यायः ३६.गजशान्त्यध्यायः

राज्ञः कर्तव्यमेव । एतैः क्रमैः गजाः आरोग्यपूर्णाः समर्थाश्च भवन्ति । [447]

अग्निपुराणमपि गजशास्त्रविषये स्वस्य योगदानं ददाति । तत्र २८९ - २९१ इत्यनयोरध्याययोः गजविचारचर्चा दृश्यते । २८९ तमोऽध्यायः विविधानां गजानां रोगाणां विचारं ब्रवीति । तथा २९१ तमोऽध्यायः गजानां विविधव्याधिविनाशार्थं क्रियमाणानि कर्तव्यानि, शान्तिकर्माणि च भणति ।

*६.११ गजशरीरस्याङ्गानि -*

गजग्रन्थेषु गजानामवयवानां विषयोऽप्युक्तः । यद्यपि तत्र तत्र सन्दर्भानुसारं गजावयवानां नामानि दत्तानि तथापि क्वचित् विशेषभागरूपेणापि तानि दृश्यन्ते । पुनः यद्यपि सर्वे गजशास्त्र-सम्बन्धितग्रन्थाः गजानामनेकानंशान् ब्रुवन्ति, न सर्वत्र गजानामवयवानाम् उल्लेखः पृथग्तया दृश्यते । [448] मातङ्गलीलायां गजावयवानां पट्टिका प्रदत्ता। गजानां माननिर्णयार्थं वर्तितेऽध्याये षड्विंशति-शरीरावयवानामुल्लेखः कृतः । [449] तेषां नामान्येवं सन्ति - कुभौ, विदुः, अवग्रहः, वाहित्थं, प्रतिमानं, वायुकुम्भौ, विलागौ, पुष्करः, गण्डूषः, ईषिका, निर्याणः, चूलिका, पिञ्छूषा, प्रोहः, अवस्कारः, पली, निगलः, चिक्का, सन्दानः,

कला, निष्कोषः, कुक्षिः, उत्कृष्टौ, पुच्छमूलम्, पेचकम्, अन्तर्मणिरिति ।

शिवतत्त्वरत्नाकरे गजस्य द्वादशावयवशरीरमित्युक्तम् यथा शुण्डः, मुखम्, दन्तौ, शीर्षम्, नेत्रे, कर्णौ, कण्ठः, पूर्वपादौ, वक्षस्थलं, गात्रम्, शिश्नम् उत्तरपादाविति । दशवर्षीयगजस्य दशक्षेत्राणि केवलम् । भद्रगजस्यायुष्यम् शतवर्षाणि । मन्दगजस्यायुष्यमशीति वर्षाणि तथैव मृगगजस्यायुष्यं चत्वारिंशद्वर्षाणीति । यदि

---

447 मानसोल्लासस्य तृतीयविंशतिके षष्टाध्याये गजविचारकभागद्वयं दृश्यते यथा गजचिकित्सा, गजौषधिनिघण्टुरिति । गजचिकित्साविभागे ५४ श्लोकाः उक्ताः (६२० तः ६७४ पर्यन्तम्) । एतदुत्तरं तु 'पर्णिका मुद्गपाणी माषपर्णी । उग्रगन्धा वचा-रसोनौ । रसपञ्चकः । पूतिद्वयं कृष्णा पिप्पली । वासा आतरूषकः । ग्रन्थिकं पिप्पलीमूलम् । कटफलं काश्मर्यम् । सौराष्ट्रिका तुवरमृत्त्का । त्रिवृतं विस्नेहम् । श्रीवेष्टः ससलद्रुमनिर्यासः ॥६७७॥' इति गजौषधिनिघण्टुः इति कश्चन भागः प्रदत्तः । अत्र अनेकोषधीनां नामानि दत्तानि गजस्वास्थ्यवर्धनाय इति ज्ञायते ।

448 अपवादतयेव हस्त्यायुर्वेदस्य तृतीयस्थानस्य प्रदेशज्ञानाध्यायो नामाध्याये सर्वेषामङ्गानामुल्लेखः दृश्यते । अग्रेऽस्य विवरणं दत्तम् ।

449 मातङ्गलीलायाः षष्टः पटलः माननिर्णयाधिकारः इति । अस्मिन् सप्तमश्लोकतः त्रयोदशश्लोकपर्यन्तं गजशरीरावयवानां विविधानां नामानि दत्तानि ।

सर्वैरपि क्षेत्रैरपि सम्पूर्णं तर्हि सः पूर्णायुष्यगजः।[450] अग्रे पुनः गजस्य अष्टावङ्गानि, अष्टौ उपाङ्गानि तथैव अष्टौ प्रत्यङ्गानि च ब्रवीति बसवभूपालः । गजस्याष्टावङ्गानि - हस्तः, मुखं, रदौ, नेत्रे, शिरः, कर्णौ, कन्धरा, गात्रञ्चेति ।

गजस्याष्टावुपाङ्गानि - ओष्टः, कक्षः, उदरं, नाभिः, अण्डकोशः, पेचकः, तलानि, नखाश्चेति । गजस्याष्टौ प्रत्यङ्गानि तु-अङ्गुली, पुष्करः, कुम्भौ, मस्तकं, केशरोमणी, वक्षः, पादाः आसनञ्चेति ।[451]

हस्त्यायुर्वेदे एकः परिपूर्णः अध्यायः एतन्निमित्तमेवोपस्थापितः । अस्य शल्यस्थानमिति तृतीयस्याध्यायस्य २९तमोऽध्यायस्य नाम प्रदेशज्ञानाध्यायः इति । अस्मिन् गजशरीरस्य पञ्चदशविभागाः कृतास्सन्ति । प्रत्येकोऽपि विभागः प्रत्यङ्गमिति नामाङ्कितम् । तान्येवं सन्ति -

*हस्तास्यदन्तवदन दृक्शिरः कर्णकन्धराः उरो हृदयगात्राङ्गमपरा मेढ्रवलधिः ।*

*चतुःषष्टिशतं प्रोक्तं ते प्रदेशाः प्रमाणतः शरीरं हि चिकित्सायाः प्रदेशज्ञानमुच्यते ॥*[452]

१. अष्टौ च विंशतिश्चैव प्रदेशा हस्तमाश्रिताः ॥[453]

२. प्रदेशा मुखसम्बद्धाः त्रिंशदिह तु सङ्ख्यया ।[454]

३. विज्ञेयाः प्रदेशा दन्तयोर्दश ।[455]

---

[450] शिवतत्वरत्नाकरः ७.११.१२६-१३१ ॥

[451] शिवतत्वरत्नाकरः - ७.११.१३४-१३७।॥

[452] पालकाप्यहस्त्यायुर्वेदः - शल्यस्थानस्य प्रदेशज्ञानाध्यायः, पृ.सं ५२९, ५३० च ।

[453] तत्र प्रदेशानामग्रे अङ्गुलिः, अङ्गुल्यभ्यन्तरे वर्त्म, ततः स्रोतसी, एतयोरन्तरं स्रोतोन्तरम्, तस्मात् पुष्करम्, पुष्करे राजिः, तदुपर्यङ्गुलम्, अङ्गुल्या उपरि गण्डूषः, ततो अग्रहस्तः, गण्डूषपार्श्वयोः श्रीः, एतयोरभ्यन्तरं गण्डूषः, तदुपरि बहिष्कर्षः, एतस्य दक्षिणपार्श्वे आकर्षः, वामपार्श्वे परिकर्षः, पृष्टतः उपकर्षः, तस्यैवाभ्यन्तर उत्कर्षः, एतैः प्रदेशैः समन्वितो अग्रहस्तः, बहिष्कर्षादुपरि मध्ये हस्तस्य सम्भोगः, एतस्य पार्श्वयोः हस्तबाहू, तयोश्चाभ्यन्तरं सम्भोगान्तरम्, सम्भोगस्य उपरि त्रिराजिः, त्रिराजेरुपरि पर्व, तस्योपरि स्थूलहस्तः, एतस्य अभ्यन्तरे पलिहस्तः, पलिहस्तस्य उपरि पृथुहस्तः, पृथुहस्तस्य अभ्यन्तरे अतिहस्तः, अतिहस्तस्य अभ्यन्तरे राजयः, सर्वगता वलयश्चेति ।

[454] आस्ये कृष्णान्तरम्, ततस्तालुः, तालुमध्ये स्रोतसी,  अतो मध्ये तालुवंशः, ततो जिह्वाभ्यन्तरे, भक्षणार्थम्, दशनाः षोडश अधस्ताच्च  उपरिष्टाच्च, तेषु चतस्रो दंष्ट्राः, ततः ओष्टः, तस्याभ्यन्तरे वर्त्मनी, ततः ओष्टप्रस्राव ओष्टपार्श्वयोः, ओष्टबाहू अधस्तात्, ओष्टसन्धी ओष्टसन्ध्योः, ततः सृक्किणी, ओष्टाधो रोमकूर्चा इति, कृष्णान्तादय इत्येते क्रमशः परिकीर्तिताः

[455] दन्तयोः दन्ताग्रे दन्तमध्ये दन्तमूले, दन्तयोरुपरि दन्तवेष्टौ, एतयोरुपरि प्रवेष्टाविति ।

४. त्रयस्त्रिंशदिह प्रोक्ताः प्रदेशा मुखमाश्रिताः। प्रतिमानप्रभृत्येते क्रमशः शास्त्र-निश्चिताः॥[456]

५. प्रदेशा नेत्रयोरेते द्वात्रिंशदिह कीर्तिताः। दृष्टिमण्डलसंयुक्ताः व्यक्ता द्वादशसन्धिजाः॥ [457]

६. चतुर्विंशतिरित्युक्ताः शिरसः क्रमशो मया । [458]

७. एते कर्णाश्रिताः शास्त्रे संङ्ख्यया दन्तिनामिह। त्रिंशत्प्रदेशा व्याख्याता यथावदनुपूर्वशः॥ [459]

८.त्रयोविंशतिरित्येते सङ्ख्यया परिकीर्तिताः। ग्रीवाप्रदेशा नागानां क्रमशः शास्त्रनिश्चिताः॥ [460]

९. प्रदेशाः सप्त सङ्ख्याता उरसस्तु नृपोत्तम । [461]

१०. दशप्रदेशा व्याख्याता दन्तिनामिह सङ्ख्यया ॥ [462]

११. *षढेते नवतिश्चैव प्रदेशा गात्रसंश्रिताः।*

---

[456] बहिर्मुखे दन्तान्तरे प्रतिमानम्, तस्य पाश्र्व्योः शम्बुके, प्रतिमानस्य उपरि मध्ये मुखस्य वाहित्थम्, तस्य पार्श्वयोः विलागौ, विलागयोरुप्रि कर्कटमध्ययोः कटस्रोतसी, कटस्रोतसोरधस्तात् कटप्रस्रावौ, कटप्रस्रावयोरधस्तात् गण्डौ, गण्डयोरधस्तात् कपोलौ, कपोलयोर्मध्ये रोमकूर्चा, रोमकूर्चयोरधस्ताद्धनू, हन्वोरधस्तात् सगदे, तयोस्सन्धिः सगदासन्धिः, एतयोरन्तरं सगदान्तरम्, कटयोः पर्शवतो घाटे, घाटयोरुपरि कटसन्धी, कटसन्ध्याश्रितौ श्रवणाविति ।

[457] चक्षुषोः अक्षिगुहे, अक्ष्णोरुपर्यक्षिकूटौ, अक्ष्णोरधस्तात् अक्षिस्रावौ, अक्ष्णोः पूर्वभागयोः कनीनिके, पश्चाद्भागयोरपाङ्गौ, पक्ष्ममण्डले, वर्त्ममण्डले, शुक्लमण्डले, कृष्णमण्डले, दृष्टिमण्डले, पक्ष्मवर्त्म सन्धी, वर्त्मशुक्ल सन्धी, शुक्लकृष्णसन्धी, कृष्णद्रृष्टि सन्धी, कनीनिका सन्धी चेति ।

[458] शिरसि वाहित्थम्, वाहित्थस्य उपरि कुम्भौ, एतस्याभ्यन्तरे कुम्भान्तरम्, एतस्याग्रे कुम्भस्योपरि बिम्बकौ, बिम्बकपार्श्वयोः पाकले, अक्षिकूटोपरि इषीके, इषीकयोर्मध्ये इषीकान्तरादूर्ध्वे इषीकाग्रे, इषीकाग्रयोः बहिःपार्श्वे निर्याणम्, पार्श्वयोरधस्तात् निर्याणसन्धी, निर्याणसन्ध्योरूर्ध्वं बिम्बकस्य उपरि इषीकाग्रमध्ये तिर्यगायतः अवग्रहः, अवग्रहस्योपरि पुरस्कारः, पुरस्कारस्यओपरि निर्याणम्, तयोरन्तरा उन्नता तिर्यगायताऽवग्रहवर्तिः, अवग्रहवर्त्या उपरि मस्तकौ, मस्तकयोर्मध्ये विदुः, मस्तकयोर्बहिःपार्श्वयोर्विताने, निर्याणयोः पश्चात् पार्श्वयोः कूर्ममस्तकसन्धी केशश्चेति ।

[459] कर्णयोः कर्णाग्रे कर्णपर्वतौ, कर्णयोरधस्तात् प्राक्कर्णौ कर्णमध्ययोः, तयोः पर्यन्तौ मध्यकर्णौ, कर्णयोरधस्तात् कर्णपाली, कर्णयोर्बहिः बहिष्कर्णौ, अन्तरे अन्तरकर्णौ, कर्णपर्वतौ, कर्णयोः कर्णपिञ्जूषौ, कर्णावर्तपार्श्वयोः कर्णपिञ्जूकौ, कर्णावर्त पार्श्वपार्श्वयोः कर्णपञ्जूकौ, अधस्तात् कर्णसन्धी, ततःश्रोत्रे, श्रोत्रपार्श्वयोः वातालके कर्णचूलिके कर्णपिप्पल्यावुद्यानवत्यावुद्यातौ।

[460] ग्रीवायां ग्रीवापृष्ठम्, तस्याधस्तात् गलः, ततः कण्ठपार्श्वयोः धमन्यौ, गलपार्श्वयोः दुर्दुरौ, दुर्दुरयोरुपरि मन्ये, मन्ययोरुपरि गुहे, गुहाभ्यां समुद्गौ, समुद्गपार्श्वयोः पिण्डिके, पिण्डिकयोरुपरि गुहाभागौ, तयोः यतस्थाने, यतस्थानपार्श्वयोः पार्ष्णिघातौ, पार्ष्णिघातयोरुपरि उत्सङ्गौ, उत्सङ्गयोरुपरि स्कन्धः, स्कन्धमध्ये पणवकश्चेति ।

[461] ग्रीवासन्ध्याश्रितः अन्तर्मणिः, अन्तर्मणेरधस्तात् उरोमणिः, उरोमणिपार्श्वयोः गात्रसन्ध्याश्रिता विक्षोभौ, विक्षोभयोर्मध्ये आवर्तमणिः, आवर्तमणेः प्रभृति हृदयम्, हृदयादुरः, ततः सन्धिः, उरोगात्रमध्ये चतुरक्षान्तरमिति ।

[462] हृदये स्तनौ, चूचकयोर्मध्ये क्षीरिके इति, हृदयस्थानैस्सह ते व्यक्ता मे जठराश्रयाः ।

*आसनात् प्रभृति श्रीमान् आतलात्परिकीर्तिताः ॥*[463]

१२. *चत्वारिंशच्चपञ्चैवप्रदेशाः परिकीर्तिताः।*

*सङ्ख्ययाकुञ्जराणांतु कायमध्ये समाश्रिताः॥*[464]

१३. *चतुस्सप्ततिरित्येतेप्रदेशाः परिसङ्ख्यया।*

*आतलात्प्रभृति प्रोक्ता जघनात्प्रभृति प्रभो॥*[465]

१४. *एवं मेढ्राश्रिताः शास्त्रे प्रदेशा दन्तिनामिह।*

*सङ्ख्ययैकादश प्रोक्तायथावदनुपूर्वशः ॥*[466]

१५. *सप्तैते सङ्ख्यया सर्वेये लाङ्गूलसमाश्रिताः।*

*प्रदेशाहस्तिनां प्रोक्ता गजशास्त्रविशारदैः॥*[467]

---

[463] गात्रयोरासनपार्श्वयोः प्रतीकासौ, प्रतीकासयोरधस्तादम्सौ, अंसाधस्तात् प्रत्यंसौ, प्रत्यंसाधस्तात् बाहू, बाहुमध्ययोरुपरि प्रत्यंसफलकौ, अंसफलकाधस्ताद्गात्रसन्धयः, सन्धयोरधस्तात् क्षयौ, क्षययोरधस्तात् पृष्टतो वहिः, तयोरधः पुरस्तात् पिण्डिकौ, पिण्डिकयोरधस्तात् वैशाखौ, वैशाखयोरधस्तात् जवभागौ, जवभागयोरधस्तात् विशेषौ, विशेषयोरधस्तादुत्सङ्गौ, पर्वणयोधस्तात् सन्दानभागौ, सन्दानभागयोः अधः पलिपादौ, तयोरधः कूर्मौ, ततो दश नखाः, ततो दश नखविशिखाः दश नखाग्राणि, ततो राज्यः, ततः पश्चात्पादयोः दशनखाः, तेषामुभौ पुरोनखौ,पुरोनखद्वयस्य प्रत्येकं बहिःपार्श्वे द्वौ सनखौ, अन्तःपर्श्वे नखश्रावौ, तेषां चतुर्णां बहिःपार्श्वतः चत्वारः पार्श्वे नखाः, इत्येवं नखाः विंशतिः, पार्श्वनखयोरुपरि बहिःपार्श्वे अपराजयः, अन्तःपार्श्वे नखयोरुपरि तलप्रोहौ, तलप्रोहयोरुपरि विक्षे, विक्षयोरुपरि पलिहस्तौ, पलिहस्ताभ्यन्तरे निवाहू, पलिहस्तयोरधस्तात् प्राक्कर्णौ, निवाह्वोः पलिहस्तयोः नवहौ, पलिहस्तयोरुपरि अपस्कारौ, अपस्कारयोरुपरि पाद्यौ, पाद्ययोरधस्तात् गात्रग्रहौ ।

[464] कायः आसनम्, आसनात्परो वंशः, वंशपार्श्वे तल्पलौ, वंशादुपरि कुवंशः, कुवंशस्य मध्ये पश्चिमासनम्, पश्चिमासनात्परं त्र्यस्थि, तस्य उभयपार्श्वयोः उत्कृष्टौ, अस्थ्नः परः लाङ्गूलवंशः पश्चिमवंश इत्येके, अपरवंश इत्यपरे, लाङ्गूलवंशस्य अधस्तात् लाङ्गूलसन्धिः, लाङ्गूलसन्धेरधस्तात् पेचकः, पेचकाधस्तात् गुदः, पायुरित्येके, गुदादधास्तात् करीषस्रावः, कायस्य मध्ये कक्षाभागौ, कक्षाभागपार्श्वयोः करणौ, ततः पृष्टतः पादौ यत्र प्रतिबद्धाः पर्युकाः, पक्षयोरुपर्यवतारौ, पक्ष पश्चात्भागयोः कुक्षी, कुक्षिमध्ये निष्कोसौ, ततः सङ्कोसौ, तयोरुपरि मृदुकुक्षी, वंशस्य पश्चाद्भागाश्रितौ पक्षसन्धी, ततः पक्षयोरधस्तात् आयामकाण्डः, तयोरधः कक्षौ, आयामकाण्डयोः पश्चात् अपरसन्धिः, अपरसन्धेरधस्तात् अनुसारौ, तत्र आहृदयाज्जठरम्, जठरमध्ये कोशम्, कोशस्याग्रतो नाभिः, तत एव हृदयदनुसृतान्तरं स्तनाः, उत्कृष्टसन्धयोरधस्तात् कृष्टसन्धी ।

[465] अपरयोर्जघनम्, जघनस्य अधस्तात् पार्श्वयोरधस्तात् करीषप्रस्रावादधः कलाभागौ, कलाभागयोरधस्तात् बहिःपार्श्वे जघनस्य पश्चात् पिण्डिके, पिण्डिकयोरधस्तान्मण्डुक्यौ, मण्डूक्योरधस्तात् सन्दानभागौ, सन्दानभागयोरधस्तात् सत्कुटिके, सत्कुटिकासन्धि-पार्श्वयोश्चत्वारो ग्रन्थयः, सत्कुटिकयोरधस्तात् पार्ष्णी, पार्ष्ण्योरधस्तात् तलप्रोहौ तयोरभ्यन्तरपार्श्वे कचाः, बहिःपार्श्वे राजयः, तलप्रोहयोरधस्तात् तलकर्णौ, ततस्तलौ, समन्ततः तलसन्धी, सन्ध्योरुपर्यष्टिव्यौ, अष्टीव्यधस्तात् वक्त्रसक्थिनी, अनन्तरं वक्त्रसक्थ्नोरधस्तादपरान्तरे, सन्दानभागयोरधस्तात् कूर्मौ, कूर्मयोरधस्तात् दशनकर्म, दश नखकूर्माः, नखान्तराण्यष्टाविति ।

[466] मेढ्रस्य करीषप्रस्रावाधस्तादण्डकोषः, अण्डकोषस्य पार्श्वयोर्वङ्क्षणौ, वङ्क्षणपार्श्वयोर्मुष्कौ, अण्डकोषस्य उपरि कोषसन्धिः, मेहनस्तलः, तत्सन्धिनिर्गमात् प्रत्यूहः, प्रत्यूहस्याग्रे ककुदम्ककुदान्मेढ्राग्रम्, तस्य मध्ये श्रोत (स्रोत) इति ।

[467] लाङ्गूलस्य सर्वत्र ग्रन्थयः लाङ्गूलमध्ये वर्तकः, अभ्यन्तरे किली, तस्याः बहिः संवर्तकः, अधस्तात् किल्याः संवालः, तस्याधस्तात् वालपुष्करम्, वालपुष्कराधस्तात्पर्व इति ।

## ६.१२ गजावयवदेवताः

गजस्य विविधाङ्गेषु अनेकाः देवताः उपस्थितास्सन्तीति कथयति गजशास्त्रम् । [468] पुनः (व्यास) गजशास्त्रेऽपि एताः एव देवताः उक्ताः । अत्र काश्चन देवताः तस्य तस्याङ्गस्याधिपत्यं वहन्तीत्युक्ताः ।[469] शिवतत्त्वरत्नाकरेऽपि अयमेव विषयः क्वचिदुक्तः । गजशास्त्रस्य अत्र चावयवस्थितदेवानां विषयेऽत्र किञ्चिद्भिन्नता दृश्यते । उभयोरपि ग्रन्थयोः गजावयवदेवतानां तुलनमेवं ज्ञातुं शक्यते -

| क्र | देह भागः | गज शास्त्रे | शिवतत्त्व रत्नाकरे | क्र | देहभागः | गज-शास्त्रे | शिवतत्त्व रत्नाकरे |
|---|---|---|---|---|---|---|---|
| १ | शिरसि | ब्रह्मा | वीरभद्रः | १४ | विविधाङ्गेषु | वेदाः | - |
| २ | कण्ठे | इन्द्रः | - | १५ | बुद्धौ | शङ्कर | - |
| ३ | स्कन्धे | विष्णुः | - | १६ | ललाटे | - | स्कन्दः |
| ४ | नाभौ | अग्निः | अग्निः | १७ | शिरसः मध्यभागे | - | ब्रह्मा |
| ५ | दृष्टौ | सूर्यः | सूर्यचन्द्रौ | १८ | शुण्डे | - | विघ्नेश्वरः |
| ६ | पादेषु | मृत्युः | वेदाः | १९ | श्वासे | - | रुद्रः |
| ७ | वक्ष-प्रदेशेषु | विशाला-धरा | - | २० | आनने | - | भाग्यदेवता |
| ८ | हृदये | पर्जन्यः | - | २१ | दन्तौ | - | शौर्यदेवता |
| ९ | मेढ्रे | प्रजापतिः | प्रजापतिः | २२ | ओष्टयोः | - | यमः |
| १० | हस्ते | नागाः | विष्णुः | २३ | चिबुकयोः | - | नरसिंहः |
| ११ | पार्श्वयोः | अश्विनौ | - | २४ | उदरे | - | ब्रह्मा |
| १२ | श्रोत्रे | दिशः | - | २५ | नखान्ते | - | अष्टमीचन्द्रः |
| १३ | मनसि | चन्द्रः | - | २६ | अन्याङ्गेषु | - | दिग्गजाः |

कोष्टकः - ५८

## ६.१३ नवगृहीतगजोपचारः -

नवगृहीतानां गजानयनक्रमः हस्तिशिक्षायाः षष्ठपटलस्यादिभागः वर्तते । [470] बन्धकारणाद्दुःखितान् रज्जु-शृङ्खलाबद्धान् गजान् शिक्षितगजैः वशवरितिभिः करिणीभिः च तत्समये तेभ्यः उचिताहारपानैः, सान्त्ववचनैः, सुकोमलस्पर्शादिभिश्च

[468] पालकाप्यगजशास्त्रस्य द्वितीयप्रकरणस्यान्तिमभागः विषयममुपस्थापयति ।

[469] पालकाप्यगजशास्त्रस्य द्वितीयप्रकरणस्य श्लो.सं ६१-६४ ।

[470] लघुकश्चिदयमध्यायः यस्मिन् त्रोयोदशश्लोकाः एव सन्ति । तत्रापि केवलं षट्सु श्लोकासु नवगृहीतगजचर्चा कृता ।

प्रशमिताः यात्रायामानेतव्याः गजशालाम् । गजानामेषा यात्रा प्रातः सायंकाले निशायाः पूर्वस्मिन् भागे वा योग्या । काले काले सलिलसेचनम्, छायायां तेषां निःस्थानं, मध्ये मध्ये आहारप्रदानं सदा तेषां शक्ति-तुष्टिवर्धकम् ।

## उपसंहारः

आधुनिककालस्याभिवृद्धिरौद्योगीकरणञ्चानेकसमस्यानां कारणीभूतमस्ति । विद्यमानानामनेकसमस्यानां मध्ये अत्यन्तं महत्त्वभूतसमस्या नाम परिसरस्य । परिसरनाशस्येयं गतिः आगामिनिशतमाने भूमिः एवमेव भवितुमर्हति वेति प्रश्नमेव उद्भावयति । परिसरस्य समस्याः प्रधानतया सर्वत्रापि अस्मान् बाधन्तेऽद्य । मनुष्यः यो हि शिखरप्रायः जीवजन्तु- वर्गेष्विति स्वयं कथितः, स एव प्रायः विनाशस्य मारणशासनं रचयन्नस्तीति भासते । अद्य तु परिसरस्य हानिः अव्याहततया प्रचलति । वनानि दिनान्तरेण सहस्रशः भूप्रदेशेभ्यः विलुप्तानि भवतस्सन्ति । अभिवृद्धिरिति व्याजेन वनानां मारणं नित्यतया प्रचलदस्ति । बृहदुद्योगस्थानानि, भूखननं धातुप्राप्त्यर्थं, महामार्गाणां-रेल्मार्गाणां निर्माणार्थं, वासार्थं, कृषिविस्तारार्थमव्याहततया वनानामाकुञ्चनं चलत्यस्मिन् काले । एतेन शताधिकैः वर्षैः प्राणिसम्प्रदायेभ्यः प्राप्ताः अरण्यप्रदेशाः विनष्टाः इति कारणेन च प्राणिनः मनुष्याणां ग्रामाणामुपरि आक्रमणं कुर्वन्ति । यदि वनानि न सन्ति चेत् कुत्र वा वनचारिणः गच्छेयुराहारार्थं, जलादीनां बाधां निवारयितुं ? कथं वा ते स्वयं जीवनं कुर्युः? मनुष्यः यद्यपि विवेकीति कथितः किमन्यप्राणि-पक्षि-सस्य-वृक्षादीनां भावमवगच्छत्यस्मिन् विषये ?

*<u>वनवासिप्राणिनां स्थितिः</u>*

एषु प्राणिष्वन्यतमः गजः योहि स्तनिवर्गेषु अत्यन्ततया महान्, शक्तिशाली, महाभक्षकश्च । तेषां साम्प्रदायिकाहारप्राप्तिपथास्सन्ति यत्र तेषां नित्यचलनं चलति । विभिन्नर्तुषु विभिन्नाहाराणाम् आवश्यकता भवति तेषाम् । यदा ते वनेष्वटन्ति तदा ते स्वाहारं प्राप्य तत्परितः क्षेत्रं, तत्र विद्यमानानन्यानोषधीञ्च सुष्ठु संस्मरन्तः अग्रे गच्छन्ति । तथैव ते जलस्थानान्यपि सुष्ठु स्मरन्तः अग्रे गच्छन्ति । यदा जलाभावः, विशेषतया घर्मकाले ते जलमन्विषन्तः बहुदूरमपि क्रमन्ते । परं मनुष्याः गतदश-विंशतिवर्षेषु एवं वनानामसन्तुलनं साधितवानस्ति यत् गजाः पूर्वस्थानं स्मरन्तः यदा तत्स्थानं प्राप्नुवन्ति,

यदि वा तस्य दर्शनं न भवति तेषां विभ्रमः जायते । अतः तदन्विषन्तः ग्रामप्रवेशं, क्षेत्रप्रवेशं वा आक्रमन्ति । तदा तत्रत्याः ग्रामीणाः गजेनाक्रमणं कृतमिति आक्षिपन्ति ।

विनाहारजलावासादिकं कथं वा तेषां जीवनं भवेत्? तेषां स्थानानि वयमाक्रमितवन्तश्चेत् तेषां जीवनार्थं यदि वा ते प्रयतन्ते तदा तेषां दोषो वा कः अत्र । एतत्साकं गजदन्तः अत्यमूल्यं वर्तते । तत्प्राप्त्यर्थं गजानां हननमपि क्वचित् प्रचलति । जलानां प्रदूषणं कृत्वा मालिन्यं प्रसारितवन्तः वयम् । मनुष्येभ्यः अपि रोगबाधाः भवन्ति । गजानामपि विषदूषिताहारसेवनाद्वा, तेषामेव घर्षणेन वा, इदानीं विद्युत्बन्धनैरपि तेषां मृतिप्रमाणमधिकमपि जातं तेषामुत्पत्तिप्रमाणानुगुणम् । गजशिशोः जननार्थं करिणी २४ मासाः गर्भं धरते । तेषामावसथानामाकुञ्चनं भवद्वर्तते इति कारणेन अद्यतनकाले गजाः अत्यपायस्थित-प्राणिष्वन्यतमः (Endangered Species) इति परिगणितः अद्य ।

*<u>गजानामवश्यकता</u>* -

गजानामावासव्याप्तिरिदानीम् जगति एशिया, आफ्रिका चेति खण्डद्वयमात्रं । यद्येषा स्थितिः अनुवर्तते तर्हि प्रायः शतमानान्ते गजाः चित्रमात्रदर्शनयोग्याः भवेयुः । परमस्य विपरीतं द्रष्टुमासीदस्मिन् देशे यत्र तु आबहुकालादेव गजवनान्यनेकान्यासन् । अस्माकं पूर्वजैः गजानां कृते एव वनानि वर्धितान्यासन् । हस्तिनः देशस्य सम्पदिवापालयन् । वनेषु वसन्तः वनचारिणः प्राणिभिस्साकं, प्राणिनां जीवविषये अनेकानंशान् बहुज्ञातवन्तः । वनानां नाशादेतेऽपि जनाः विस्थापिताः । एतेन परम्परयाऽगता विद्या, प्राप्तं ज्ञानं सर्वमपि विनष्टम् । एवं वनवासिनां काचिद्वनसंस्कृतिः विनष्टा ।

परं शास्त्रनिष्ठाः गजानामुपयोगितानुसारेण मनुष्योपयोगाय उपयोक्तुं प्रयत्नं कृतवन्तः शास्त्रग्रथनेन । गजानामटनं, तेषां वने स्वभावाः, परिवारव्यवस्था, इष्टानिष्टाः, जीवनविधानं, सन्तानोत्पत्तिः सर्वेषामप्यध्ययनेन, वनवासिभिः ज्ञानस्वीकरणेन च सम्यग्ज्ञातवन्तः । मनुष्योपयोगितानुसारेण गजानांग्रहणम्, अवलोकनं, पालनं, पोषणं,

रोगादयः, तेषां कारणानि, लक्षणानि, विधाः, उपचाराः, निदानं, रोगोत्तरोपचाराः, प्रतिरोधकशक्तेः संवर्धनं, गजशालानिर्माणं, शिक्षणं, युद्धे नियोजनं, तेषां हननमित्यनेकान् विचारान् चर्चितवन्तः । न चैतावत् । काले काले तेभ्यः दातव्याः आहाराः, दिनर्तुभेदेन, तेष्वाचरणीयाः शल्यक्रियादयः, अस्थिखण्डनादिसन्दर्भेषु करणीयाः उपचाराः, गर्भस्यावक्रान्तिः, गर्भस्यसंवर्धनमित्याद्यनेके अंशाः सुचारु रूपेण सम्यग्वर्णिताः । तत्कालीनगजसम्पत्तिस्तु महत्यासीदिति तु ज्ञायतेऽनेन । तस्य सूक्ष्मदृष्ट्यावलोकनमपि कृतमिति दृश्यतेऽनेन ।

*गजानां समस्याः, तत्परिहारार्थमस्योपयोगः* -

गजाः वनाद्वनं भ्रमन्याहारजलमन्वेषयन्तः । वनानां नाशात्, गजानां सामान्यभ्रमणपथि ग्रामाणां निर्माणेन, औद्योगीकरणेन, कृषिक्षेत्रविस्तारात् गजानां गमनागमनमार्गः लघूकृतः । एवं तान् तेषां साम्प्रदायिकाहारप्राप्तिस्थानमपि नाशयित्वा गजपरिवारः आहत्य नाशं नीतः । अतः जलमाहारञ्चान्वेषयन्तः गजाः फलितं क्षेत्रं प्रत्यभिपतन्ति । क्रुद्धाः ग्रामीणाः तान् धावयन्ति क्षेत्रेभ्यः । गजपरिवाराः स्वपोतैः भायिताः, आस्फोटकैः वाद्यैश्च प्रधाविताः । नो चेत् तेषामागमनमेव निवारयितुं परिखां खनित्वा तेषां पातनेन, तेषां विषप्राशनेन गजानां मारणेन वा तान्निवारयितुं यतन्ते । क्वचिद्विद्युदाघातैश्च । अतः गजसन्ततेरवनमद्यतनात्यन्तप्रधानकर्तव्यम् ।

समस्या तूद्भूतास्ति । अस्य परिहारार्थं कोऽप्युपायः अवश्यकः एव । तर्हि पाश्चात्यदेशानां किमप्युदाहरणानुसारमेषां संवर्धनं शक्यं वेति द्रष्टव्यम् । परमद्यास्माकं समस्यानां कारणमेव पाश्चात्यचिन्तनमिति यदा ज्ञायते तदा कोऽप्यन्यः मार्गः अन्वेष्टव्यः एव । सः मार्गः प्राचीनो वाधुनिको वा भवतु समस्या परिहर्तव्या । तर्हि कोऽयमुपायः?

अत्र गजशास्त्रस्य परिगणनमवश्यकमिति मया चिन्तितम् । अस्मद्प्राचीनैः चिन्तिताः विचाराः सार्वकालिकास्सन्ति कदाचित् सार्वदेशिकाश्च । तेषामुपयोगिता त्वाधुनिककालेऽपि, आधुनिकचिन्तनैस्साकं कथमित्यस्माभिर्चिन्तनीयम् । पूर्वमाभारते

गजानामावसथमासीदिति कथनमेव अलीकमिति परिगणनं बहूनाम् । पूर्वं महाभारतादिषु कालेषु युद्धादिष्वेव लक्षोपलक्षगजानां मरणमभवदिति जानीमहे । तदापि गजाः अवसन् । सर्वेषामपि ग्रन्थानामध्ययनेन एतज्ज्ञायते एव । आदेशे वनानि-उपवनानि चानेकान्यासन् । आङ्ग्लानामागमनोत्तरमपि गजानाम् उपयोगितात्वासीदेव । इत्यत्र भारतस्य समृद्धिः कथमासीदिति ज्ञातं भवति ।

गजशास्त्रस्याध्ययनेनास्माकं पूर्वजानां चिन्तनं, अध्ययनविधानं सर्वमवगतं भवति । पाश्चात्यशिक्षणद्वारा संस्कृतेरस्माकमवगमनं संवर्धनं वाऽशक्यमिति भावः । अस्याध्ययनेन विनष्टा चिन्तनपद्धतिः, विनश्यमाना वनसंस्कृतिश्च रक्षिता भवेत् । अस्यज्ञानमुपयुज्य न केवलं भारतस्य गजज्ञानं वर्धितुं शक्यं परं आहत्य एषियाखण्डे विद्यमानानां गजानामपि संवर्धनं सुपालनं शक्यं । इदं प्रायोगिकविज्ञानमिति कारणेन सर्वत्राप्येतस्य ज्ञानविधानस्य सङ्कलनेन विशिष्टज्ञानस्य संवर्धनमपि शक्यं येन ज्ञानशाखायाः विस्तारोऽपि भविष्यति नूतनाविष्कारैः, प्रयोगप्राप्तिज्ञानसम्पद्भिश्च । एतेन वनेषु गजानामवसथसमस्याः परिहर्तुं प्रयत्नशीलाः भवितुम् अवकाशः दत्तः भवति ।

कालस्यापेक्षा वर्तते यद्गजानां संरक्षणमवश्यकम् । संरक्षणं तु सर्वेषां कर्तव्यम् । विविधवृत्तिप्रवृत्तिजनाः स्वस्वसामर्थ्यानुसारमावश्यकतानुसारञ्चास्मिन् कार्ये स्वान् योजयेयुः । गजशास्त्रानुसारं गजसंरक्षणं कथमिति चिन्तनं प्रथमं भवति । तत्तु गजाध्ययनस्य मूलमुद्देशं ब्रवीति । द्वितीये भागेऽस्य प्रबन्धस्य तौलनिकाध्ययनस्य विशेषाश्च ब्रवीति ।

*आधुनिकेभ्यः किम् ?*

आयुर्वेददृष्ट्या - आयुर्वेदस्तु जगते भारतस्यात्यमूल्यं योगदानमस्ति । सहस्रेभ्यः हायनेभ्यः पूर्वमेव दत्तोऽयम् अपारज्ञानराशिः । सर्वविधरोगाणां सम्भावन-परिहारक्रमश्च संसूचितस्तत्र । सर्वेष्वपि मनुष्येषु प्राणिषु विद्यमानानां दोषत्रयाणाम् (गुणत्रयं वा) आधारेण, तेषां विकारदिभ्यः एवः रोगाणां मूलम्, तेषामुपशम एव रोगस्य

निवारणक्रम इति बहुकालपूर्वमेव निर्दिष्टमस्मत्पूर्वजैः । अद्याप्यस्यचिन्तनसरणौ बहवः रोगाः परिह्रियमाणास्सन्ति । अद्यायुर्वेदस्य पद्धत्या एव स्वरोग-निवारणं कारयितुमिच्छन्ति बहवो जनाः । तत्रोक्ताः बहवः ओषधयः नित्यजीवने, अस्मान् परितः एव उपलभ्यमानाः । इतोऽपि विशेषो नाम एते सर्वेऽप्युचारक्रमाः नित्यजीवनस्य दैनन्दिनाहारक्रमेऽपि सुसम्बद्धः । न केवलं मनुष्याणां परं प्राणिनामपि पोषणमेतेनैव क्रमेण प्रचलतीत्येव सुमहान् तोषदायकः । इयं पद्धतिः बहुत्र वैद्यत्वेन न परन्तु परम्परयागता । क्वचिदियं पद्धतिः अभ्यस्ता न कदापि पाठिता । स्वज्ञानेनैव ज्ञातव्येयं पद्धतिः ।

सामान्यतया मनुष्येभ्यः औषधोपचारः आयुर्वेदरीत्येति श्रुतः एव । परं न केवलं मनुष्येभ्यः परं प्राणिनां कृतेऽप्यायुर्वेदस्योपचारः करणीयः इत्येव विशेषः । गजानामश्वानां, गवाञ्चायुर्वेदास्तु प्रसिद्धाः एव । अतः गजशास्त्रस्य प्राथमिकज्ञानप्राप्त्यनन्तरं गजायुर्वेदस्याध्ययनमपि शक्यमिति विचिन्त्यायं ग्रन्थः अध्येतव्यः । गजशास्त्रस्तु गजायुर्वेदस्याधारस्तम्भः इव । (अद्यापि केरलप्रदेशेष्वायुर्वेदस्याधारेण गजानामुपचारः दृश्यते क्वचित् ।) हस्त्यायुर्वेदग्रन्थे विद्यमानानामंशानाम् अध्ययनमवश्यकम् । न केवलं कैरलीय-गजानां परं देशस्य विविधेषु भागेषु उपचार्यमाणाः गजास्सर्वाः अपि गजाः आयुर्वेदस्याधारेणापि उपचारणीयाः ।

यदि वा शक्यते एतस्योपयोगं आफ्रिकाखण्डदेशीयगजानामपि प्रयोक्तव्यम् । आफ्रिका-एषिया गजानां मध्ये बहुविधसाम्यगुणास्सन्त्येव । शरीररचनायामपि अधिकं व्यत्यासाः न दृश्यन्ते । अतः ग्रहणार्थम्, अध्ययनार्थम्, प्रशिक्षणार्थं, यथा एष्याखण्डीयाः तथा तेषामुपर्यपि प्रयोगाः कर्तव्याः । तदर्थं सोपानवत्तिष्ठति गजशास्त्रसम्बन्धिनः बहवो ग्रन्थाः । अग्रे गच्छन्तः आफ्रिकाखण्डीयानां गजानामपि रोगोपचारः हस्त्यायुर्वेदविधाने एव करणीयः । तन्निमित्तम् अत्रत्यानां गजानां स्वभावाः,, गुणावगुणाश्च ज्ञातव्याः, पालनपद्धतिश्च अनुकरणीया । अतः गजशास्त्रस्याध्ययनं तु

अत्र प्रधानम् । न केवलमेकम् । परं यथाऽत्र तौलनिकरूपेण कृतं तथैव सर्वेषां गुणानुगुणं सम्यग् ज्ञात्वा एतेन विशिष्टगजरोगोपशमपद्धतिः जनिता भवति येन ज्ञानस्य नूतनाशाखा लोकायार्पिता भवति ।

एतत्कृते प्रथमं भारते विद्यमानानामाफ्रिकागजानामुपरि भारतीयगजानामुपरि च समानतया रोगोपचारः, प्राशनादयाश्च करणीयाः । अत्रोद्भूतानां फलानाम् (अनलैसिस्) कृत्वा आफ्रिकादेशेऽपि एवं कर्तुं शक्यते वा इति चिन्तयितुं अवकाशः लप्स्यते ।

आधुनिकाध्ययनानुसारेण सर्वेषां प्राणिनां शरीररचनं समानमेव । बहुत्र सादृश्यं वर्तते एव । अतः ज्ञानशाखायाः विस्तारणं कुर्वन्तः हस्त्यायुर्वेदस्याधारेणान्येषामपि प्राणिनां रोगोपचारं कर्तुं शक्यं वेति अन्वेषणीयम् । प्रायः आधुनिकज्ञानविकासः एतेनैवारभेत । अश्वानामायुर्वेदग्रन्थाः अपि बहुप्रसिद्धाः । गवायुर्वेदचिन्तनमपि ख्यातमेव । एतत्साकमन्येषां प्राणिनामपि रोगोपचारः हस्त्यायुर्वेदस्याधारेण क्रियते चेन्नूतनकालीनप्राणिरोगायुर्वेदग्रन्थग्रथनाय हेतुर्भवेत् । अतः सर्वत्र एषां ग्रन्थानामध्ययनं, तौलनिकमध्ययनञ्चोपयोगाय भविष्यति । एतस्य तौलनिकाध्ययनस्य इदमेव फलं यत् स्वीकृताः सर्वेग्रन्थाः बहून् विचारान् समानतया भजन्ते, तथैव केचन भिन्नतामपि भजन्ते ।

*पशुवैद्येभ्यः -*

आधुनिकपशुरोगोपचारः अद्य अलोपथिद्वारेण क्रियमाणः भवतीति ज्ञातः विषयः । परं भारतस्य केचनाधुनिकपशुवैद्याः अलोपथिना साकमस्माकमेव गैरेयजनानां निजौषधपद्धत्या गजानां वनचारिणां वा रोगोपचारः कुर्वन्तस्सन्तीति दृश्यते । उभयोरपि मेलनं शक्यमिति कैश्चित् चिन्तितम् । एतत्साकम् गजस्यापि रोगाणामध्ययनं सम्यक् कृत्वा विधद्वयेनापि तस्य परिहार्यता चिन्तनीया । प्राचीनाधुनिकयोः सम्मेलनार्थमपीदमध्ययनमुपकारि ।

अत्रोक्ताः ओषधयः आधुनिककालस्य मानानुसारेण अधीताः भवेयुः । एतेषु विद्यमानानाः रोगोपशमकारकाः अंशाः संशोधिताः उपयोगाय सर्वत्र प्रसारणीयाश्च । एतत्साकं गजानां वनेषु एतेषामोषधीनां संरोहणेन गजानां कृते उपयोगः भवति । एतेन गजस्वास्थ्यमपि संवर्धितम् । गजानामिष्टाहाराः वने रोहणीयाः येन तेषामाहारन्यूनता न भवेत् वनेषु । घासः, वेणुः, इत्यादीनां संवर्धनार्थं प्रयासः अवश्यकः । पालितगजावसथप्रदेशेष्वाहारपद्धत्या निवार्यमाणानां रोगाणां निवारणं शास्त्रोक्तानामाधारेणैव करणीयम् । वनगजानामप्याधुनिक-वैद्योपचारस्यापेक्षया शास्त्रोक्तानां विषयाणामाधारेणैवोपचारः कुर्यात् ।

*आधोरणेभ्यः -*

आधोराणकाः गजलोकस्य मनुष्यस्य च बन्धनिर्माता । गजपं विहाय अन्यः कोऽपि गजभावमवगम्य तस्य नियन्त्रणं कुर्यादपेक्षितं कर्म कारयेच्च । अतः एतेषामपि ज्ञानं संवर्धनीयं गजभावं ज्ञापयितुम् । एते ग्रन्थाः एषां प्राणिनामवगमनाय सहायकाः । अतः अस्मिन् शास्त्रविषये गजपाः अपि शिक्षणीयाः । तेषां भाषायामेव एते ग्रन्थाः लभ्येरन् । भारतीयगजानां प्रायः इदानीं प्रशिक्षणस्य अवसरः वर्तते । परन्तु भारते विद्यमानानाम् आफ्रिका खण्डीय-गजानामपि शिक्षणाय प्रयत्नः अवश्यकः । प्रथमं भारते विद्यमानानाम् आफ्रिकाखण्डीयाः गजाः शिक्षणीयाः । तत्पश्चादेव आफ्रिकादेशेषु विद्यमानानाम् ।

*सामाजिकदृष्ट्या -*

सामाजिकानामपि गजसंरक्षणे पात्रमस्ति । गजानां स्मरणन्त्वद्भुतमस्ति । ते सर्वदा यूथेष्वेव स्वपथाश्रिताः अटन्ति । पथभ्रष्ट-यूथभ्रष्टगजः दृष्टो नाम कश्चन यौवनावस्थायां विद्यमानः स्त्रीप्रसादाभिलषुकः गजः इत्येव । गजाः येषु मार्गेषु सञ्चरन्ति सयूथं सः गजपथः इति कथितः । अतः अस्मिन् गजपथं परितः वर्तमानाः ग्रामाः यदि गजैः बाधिताश्चेत् तेषां ग्रामीणानां स्थितिः कदाचिच्छोचनीयमित्याभाति ।

गजयूथस्य ग्रामप्रवेशः, ग्रामं परितः तेषां चलनमावासश्चेत्तस्य ग्रामस्य सर्वनाशः इत्येव भावः सर्वत्र प्रसृतः । तत्र कारणं नास्तीत्यपिन ।

गजाः सामान्यतया जलमन्विषन्तः, आहारमन्विषन्तः वाटन्तः भवन्ति । तत्र तत्र मार्गेषु यदि तेषां वैविध्यपूर्णमाहारमिष्टाहारो वा लब्धश्चेत्ते तत्रैव कानिचिद्दिनानि यापयन्ति क्षेत्राण्युध्वस्थीकुर्वन्तः । यदि वा जलसमृद्धिः मुदिताः जले निमज्जनं क्रीडादिकं, पानादिकं कुर्वन्तः समीपस्थानि क्षेत्राणि प्रविशन्ति । एतेषां बृहज्जीविनां दर्शनमात्रेणैव रोमाञ्चिताः, भीताः जनाः स्वक्षेत्रस्य, स्वग्रामस्य, स्वैर्रोहितानि धान्यानि-फलानि-वस्तूनि संरक्षितुं महान्तं प्रयत्नं कुर्वन्ति तान् भाययित्वा दूरं प्रेषयितुम् । एषु प्रयत्नेषु कदाचित् साफल्यम्, अन्येषु सन्दर्भेषु जीवहानिः, धान्यहानिः, क्षेत्रहानिश्चानुभवन्ति । जलं ते प्रमथ्य स्वक्रीडाभिः कतिचिद्दिनानि पर्यन्तमनुपयोगितां नयन्ति ।तदापि ग्रामस्थानांकृते कष्टमेव।

समस्यायाः निवारणार्थमत्र ग्रामीणानां पात्रं प्रमुखम् । तत्कृते किञ्चिदध्ययनं कृत्वा गजाः कुतः ग्रामं क्षेत्रं वा प्रविशन्तीति विचार्य तत्परिहारोपायाः चिन्तनीयाः । शास्त्रज्ञानेन जनानां मनसि गजानां विषये प्रीतिरुत्पाद्य निश्चितं कारणं ज्ञातव्यम् । स्वग्रामं परितः ग्रामस्थैरेव गजैरपेक्षितानां सस्यानां वृक्षाणां वारोपणं कृत्वा यथा ते ग्रामं क्षेत्रं वा नागच्छेयुः तथा व्यवस्थापनीया । गजैरनपेक्षितानां वृक्षाणां सस्यानाञ्चारोपणं स्वक्षेत्रे, स्वक्षेत्रं परितः आरोहन्ति चेत् तद्वैरुध्यकारणात् प्रायः ते तत्र नागच्छेयुः । एतेन तेषां पथि विद्यमानानां विरुद्धभोज्यं स्मरन्तः ते तन्मार्गस्य तानि क्षेत्राणि च न प्रविशन्ति ।

*<u>वैज्ञानिकदृष्ट्या -</u>*

संस्कृतस्य ज्ञानभाण्डारोऽयं न केवलं प्राचीनानां सम्पदिति चिन्तनीयः । अयं तु नित्योपयोगी ज्ञानवृक्षः यः विधविधफलानां दाता कल्पवृक्षः इव परिगणनीयः । अतः एषां ग्रन्थानामध्ययनेनाधुनिकसमस्यानां परिहारः अपि सूचनीयः । भारतीयज्ञानाधारेण, भारतीयचिन्तनस्य पद्धत्यनुसारेण च शास्त्राण्यध्येतव्यानि न केवलं पाश्चात्य

व्यावहारिकदृष्ट्या । एतेनास्माकं समस्यानां परिहारः अस्माकं देशव्यवस्थानुसारमेव भवितुमर्हति । तथैव केवलं पाश्चात्यानां वैज्ञानिकज्ञान-शाखानामध्ययनेनास्य देशस्य वैज्ञानिकदृष्टिः न दर्शिता भवति जनेभ्यः । तन्निमित्तं सर्वेषामपि वैज्ञानिकविचारस्य परिचयात् प्राक् भारतीयानां संस्कृतस्य योगदानं वावश्यं ज्ञापनीयम् - यथा गजशास्त्रस्य परिचयः । प्राणिशास्त्राध्ययनस्यादिभागे प्रदाय तदुत्तरमेवान्येषां प्राणिशास्त्रीय-विचाराः उपस्थापनीयाः ।

*अरण्यविभागस्य दायित्वम् -*

एषां दायित्वं गजसंरक्षणे मुख्यभूतं वर्तते । अरण्यरक्षकाः विविधैः मार्गैः गजयूथस्य गमनमार्गं जानन्तः यथा ते ग्रामान् न प्रविशेयुः तथा प्रयत्नं कुर्युः स्वाधिकारिभिः । तेषां गजानाम्, अन्यवन्यजीविनां स्वाभावादिकज्ञानं सम्यक् भवेत् । अत्रापि पुनः शास्त्रज्ञानमुपयोगाय भवन्ति । वनस्य जलस्थानानां पूरणं पौनःपुन्येन करणीयं घर्मकालेषु येन ते ग्रामान् न प्रविशेयुः । अरण्यसम्पद्वर्धनं, गजानामावश्यकाहारव्यवस्था यथा कल्पितुं शक्यते वृक्षारोपणैः तथा प्रयत्नः कारणीयः । एतत्कृते तेषु वनेषु दीर्घकालतः वसन्तः गिरिजनान् ते प्रबोधयेयुः । तेषामरण्यज्ञानमपि प्राप्य, शास्त्रज्ञानमपि सम्प्राप्य अनयोर्ज्ञानं तेभ्यः गिरिजनेभ्यः शिक्षयित्वा गजसंरक्षणं कर्तुं शक्यते । रुग्णानपि गजान् ते गिरिजनाः ज्ञात्वा तेषां रुग्णानां रोगनिवारणार्थमपि तत्रतत्रैवौषधसस्यानामारोहणमपि उपयोगाय भवेत् । तत्कृते पुनः शास्त्रज्ञानमवश्यकम् । एतैः ग्रामागमनैः ते वारणीयाः । गजहन्तॄनपि प्रबध्य तेभ्यः कठिणतमा शिक्षा दातव्या ।

*पाठ्यक्रमस्यायोजने संस्कृतच्छात्रेभ्यः -*

संस्कृतं नाम दैवीवाक् इत्यारभ्य संस्कृते विद्यमानानां सर्वेषामपि ज्ञानानां परिचयेन संस्कृतच्छात्राः संस्कृतं पठितुं ज्ञातुं च प्रोत्साहनीयाः । संस्कृतच्छात्राः यस्य कस्यापि वा शास्त्रस्य ज्ञानमवाप्तुं चोदनीयाः । तत्र न केवलं व्याकरण-वेदान्दादि प्रारम्परिकशास्त्रमपि तु . सुलभग्राह्याः दैनन्दिनजीवनेदृष्टाः गजशास्त्रादिविषयाः वा

अध्येतुं योजनीयाः । आधुनिक-कालस्य इदमेव पन्थाह्वानं यत् प्रधान/प्रमुख-शास्त्रनिष्ठाः संस्कृतज्ञाः आधुनिकज्ञानप्राप्तुकामाः, तथैवाधुनिकाः अपि प्राचीन-ज्ञानप्राप्तुकामाः । आधुनिकेभ्यः आधुनिककालेऽपि चिन्तनीयाः, उपयुक्ताः, पाठ्येन साकं पठितुं योग्याः शास्त्रसम्बन्धितपठनसामग्र्यः न दृश्यन्ते । गजशास्त्रादीनि क्षुद्रशास्त्राणि सन्तीत्यपि ज्ञानं बहूनां नास्ति । शाला-कालेजुच्छात्रेभ्यः साहित्यं विना अन्यस्य शास्त्रस्य/ शास्त्रग्रन्थस्य परिचयः वा नोपकल्प्यते ।

अतः आधुनिकज्ञानप्राप्तवद्भिः संस्कृतच्छात्रैः एतादृशाः नूतनाः विद्यामार्गाः गवेषणीयाः पाठ्ये तेषां योजनाय प्रयत्नाः करणीयाः संशोध्य । सामान्यजनेभ्यः एतादृशाणि नूतनक्षेत्राणि च दर्शनीयानि यानि नित्यजीवने उपयुक्तानि तथैवाग्रिम सन्ततेः जनाः अपि यथा एषां परिचयं प्राप्नुयुः तथा साहित्यस्यनिर्माणमपि करणीयम् ।

अन्ते परमातिमुख्यभूतं चिन्तनं नाम एते विचाराः शासननिर्मातृभिरपि चिन्तनीयाः । प्राणिरक्षणविषये नूतनानि शासनानि आनीयमानानि सन्ति । गजानां पालनविषयेऽपि तेषां दृष्टिरवश्यकी । अत्र बहुप्रमुखं नाम तेषामवसथक्षेत्रं वनम् । गजपथप्रदेशे केनापि वा गजानां हानिकारककार्याणि न करणीयानि कारणीयानि च। उपर्युदहृताः विषयाः यथा येभ्यस्तेभ्यः प्राप्नुयुः तथा शासनानि रचनीयानि । गजदन्ताय, अन्यप्राणिजन्यवस्तुनः चौर्ये निरतानां बन्धनार्थमपि विशेषशासनानि संरच्य गजप्रजावर्धने शास्त्रज्ञानर्जने विशेषप्रोत्साहाश्च प्रदेयाः ।

प्राणिदयासङ्घजनानां कृतेऽपि शास्त्रमिदमुपयुक्तं भवति । धार्मिककार्याणि गजैस्साकमाबहुकालात् प्रचलति यथा कर्णाटकस्य मैसूरुनगरस्य विजयदशमी गजपथसञ्चलनं, केरलस्य बहुषु क्षेत्रेषु यथा त्रिशूरु वडकनाथदेवालस्य, गुरुवायूरु श्रीकृष्णालयस्य सांस्कृतिककार्यक्रमाः ये शत-शतवर्षैः चाल्यमानास्सन्ति । गजानां शिक्षणार्थं, पालयितुं, संरक्षणार्थं यथा सांस्कृतिक-साम्प्रदायिककार्येषु न च्युतिः तथा नूतनविधानानि च चिन्तनीयानि ।

एवमस्य गजशास्त्राणां तौलनिकम् अध्ययनम् इत्यस्य प्रबन्धस्य मूलोद्देशः यद्यपि ग्रन्थानां तौलनिकमध्ययनं, गजशास्त्रस्य व्याप्तिः आधुनिककाले कथं भवितुमर्हतीति प्रथमं दर्शयति । गजानामाधुनिककालस्यानिवार्यता, तेषां संरक्षणं, तेषां रोगाः-परिहाराश्च, तेषां समस्याः, निवारणोपायाश्च पूर्णतयाध्येतव्याः यस्य कृते ग्रन्थाध्ययनमवश्यकम् ।

प्रथमं शास्त्रस्यावश्यकतामुक्त्वा तदुत्तरमत्राधीतानां ग्रन्थानां परिचर्चा युक्तेति चिन्तितं मया । गजशास्त्रमुद्दिश्यैवानेके ग्रन्थाः रचिताः अस्मद्पूर्वजैः येषां लघुपरिचयः प्रदत्तः प्रबन्धस्यादौ ।

मम संशोधनम् नाम, अत्र सर्वसुसंबद्धाः अनेके विचाराः एकत्रानीताः । यद्यपि तौलनिकमध्ययनम् चिन्तनं वा अध्यायशः न कृतो वर्तते, तथापि तेषु तेषु स्थानेषूक्ताः पारस्परिकसम्बन्धमेव वैविध्यं वदति । मातङ्गलीला नाम ग्रन्थः गजानां लीलां वा क्रीडां वा न वदति परं गजानां अनेकान् विचारान् पुर्णतया विवृणोति । पालकाप्यगजशास्त्रमिति ग्रन्थद्वयं यद्यपि प्राप्तं तयोर्विचारः यद्यपि समानतया, श्लोकसाम्यतया च वर्तते तथापि द्वितीया कृतिः व्याख्यासहिता इति विशिष्यते । अतः (व्यास) इति नामाङ्कितं तत् गजशास्त्रम् यस्य पूर्णरूपं व्याख्यासहितं गजशास्त्रमिति न तु व्यासलिखितगजशास्त्रम् इति ।

चिन्तनीयो हि यत् उभयोरपि गजशास्त्रयोः व्यासप्रोक्ते गजशास्त्रे इति, वैय्यासिक्ये इति वा केचन भागाः प्रदत्ताः । यस्यार्थः एताभ्यां साकं किमपि अन्यः गजशास्त्रं नाम ग्रन्थः वर्तते यस्य कर्ता व्यासः इति । तत्रापि पुनः (व्यास) गजशास्त्रे अनेकानां श्लोकानां पाठान्तरभेदाः सन्ति । ये श्लोकाः पालकाप्यगजशास्त्रे अनुपलब्धाः परमत्रोपलब्धाः । तथा शताधिकपाठान्तरभेदाः द्रष्टुं शक्यन्तेऽत्र । क्वचिन्नूतनतया श्लोकाः प्रविष्टाः, कुत्रचित् श्लोकभागः विलुप्तः, अन्यत्र तु पुनः अन्यशब्दस्य वागमनम् भवति ।

पुनः अध्यायभेदोऽपि (व्यास) गजशास्त्रे दृष्टः । पालकाप्यगजशास्त्रे दशाध्यायाः सन्ति । परं (व्यास) गजशास्त्रे नवदशाधायाः सन्ति । पालकाप्यगजशास्त्रे उक्ताः विषयाः (व्यास) गजशास्त्रे अध्यायभेदेन अग्रिमाध्यायेषु दृश्यन्ते । अत्र कालविषयस्य चर्चा न कृता कः प्रथमः इति । यतो हि (व्यास) पालकाप्यगजशास्त्रं व्याख्यासहितमस्तीति कारणेन प्रायः इदं नूतनं पालकाप्यगजशास्त्रस्यापेक्षया । तर्हि कथं तत्रान्ये श्लोकाः ? व्याख्याने यत् पालकाप्यगजशास्त्रे न विद्यन्ते तादृशाः अपि विषयाः योजितास्सन्तीति कारणेन पालकाप्यगजशास्त्रमेव प्राचीनमित्याभाति ।

पुनः गजशिक्षायाः कर्ता नारदः, यः इन्द्रं गजशास्त्रं बोधयति । अयं ग्रन्थस्य पूर्णभागः नोपलब्धम् । तत्रापि गजशास्त्रग्रन्थयोः मातङ्गलीलायामुक्ताः अनेके अंशाः प्राप्ताः ये समानतामपि भजन्ते । परं न सर्वविषयेषु इत्यपि ज्ञातव्यम् । पालकाप्य-गजशास्त्रमिति ग्रन्थद्वयोः विचारमेव प्राधान्येन स्वीकृत्य अन्ययोरुभयोर्ग्रन्थयोः तुलनेन साकमेते विचाराः अन्येषु संस्कृतगजग्रन्थेषु (यथा शिवतत्त्वरत्नाकरः, मानसोल्लासः, मृगपक्षिशास्त्रम्, कल्पनारत्नम्, गजग्रहणप्रकारः, हस्त्यायुर्वेदः इति), किं कथमुक्तमित्यपि चिन्तयत्ययं महाप्रबन्धः ।

यावच्छक्यं रामायणस्योदाहरणानि (केवलं शास्त्रात्मकं) तथैव कौटिलीयार्थशास्त्रतः अपि विचाराः (ये कृतावुपलब्धाः) अत्रादौ प्रदत्ताः तेषां प्रसिद्धिं मनसि निधाय योजिताः । चतुर्षु ग्रन्थेषु यद्विद्यते तस्य तौलनिकतया किं किं वर्तते इति तत्र तत्र ज्ञायते एव । प्रत्येकस्याध्यायभागस्य विचारः एतेनैव क्रमेण गच्छति । एतेन साकं अन्यसंस्कृतग्रन्थेषु एतैस्तोलने के के विषयाः समानतां भजन्ते इत्यपि चर्चितः इति प्रबन्धस्यास्य वैशिष्ट्यम् । अस्मिन् सन्दर्भे एतदप्युच्यते यत् अन्यग्रन्थेषु विद्यमानाः परमेतेषु चतुर्षु ग्रन्थेषु अविद्यमानाः विचाराः अत्र न स्पृष्टाः यतोह्येते प्रबन्धस्य परिमितौ नागच्छन्तीति कारणतः ।

एवं संस्कृतभाषायां विद्यमानानां प्रधानानां गजसम्बन्धितग्रन्थानां तौलनिकमध्ययनं कृतम् । इतोऽपि अन्यभाषास्वपि गजसम्बन्धिताः अनेके ग्रन्थाः

वर्तन्ते इति प्रथमाध्याये एव उक्तम् । एतेन प्रबन्धस्याधारेण इतोऽपि अनेके शोधप्रबन्धाः सज्जयितुं शक्यते इति फलश्रुतिरप्यस्य प्रबन्धस्य योगदानम् ।

प्रबन्धस्यास्य पूर्णज्ञानमस्माकं पूर्वजानां तीक्ष्णबुद्धिं, तेषां सूक्ष्मग्राहित्वं, तेषां प्रयोगशीलत्त्वमिति सर्वानपि विषयानेकत्रीकरोतीति विशेषतामावहतीति शम् ।

# अनुबन्धः

गजाः नित्यजीवसम्बन्धि रूपेण तिष्ठत्यस्माकं जीवने । अतः अस्य प्रबन्धस्यारम्भः प्रायः जनानां गजज्ञानविचारं स्पृशन्, संस्कृतस्य गजशास्त्रविषयः कियद्रूढमूलमस्तीति ज्ञातुं प्रयतते । तत्तु प्रश्नोत्तररूपेण । पृष्टाः प्रश्नाः एवमासन् -

***QUESTIONNAIRE ABOUT GAJASHASTRA***

1. Name -
2. Age -
3. Profession - Since -
4. Educational qualification -
5. Family background -
   Father - mother - rural / urban
6. Do you like elephants - why -
7. Have you seen any elephant (in activity), (if yes where)-
8. The most attractive feature of an elephant (as you think) -
9. Special uses of elephants (as you think) -
10. Importance of elephants -
11. How do you know about elephants - through
    Books practical knowledge by profession any other means
12. Are you interested in study of elephants
13. Which work would you suggest for a detailed study of elephants, why ?
14. Do you know how many elephants were killed in mahabharata -
15. Since how many years are elephants tamed in india (as you think)
16. What were the techniques used -
17. How about the language, features of mahouts then -
18. Do you know about gajashastra
19. (if yes how & what are the contents - if no why - )
20. Do you know who is the author of gajashastra -

21. When do you think elephants are enraged -
22. Any special thing you know about elephants -

SIGNATURE - DATE -

एतानेव प्रश्नान् प्रष्टुमपि कश्चिदुद्देशः वर्तते । आदौ सप्त प्रश्नाः व्यक्तिपरिचय-दृष्ट्या । तदुत्तरस्य षट्प्रश्नाः गजस्य परिचयः कियान् वर्तते इति ज्ञातुम्। एतस्मात् समनन्तरं सप्त प्रश्नाः यदि वा तस्य/तस्याः ज्ञानं, तर्हि तत् ज्ञातुम् । अन्तिमचरणे मम गवेषणविषयः स्पृष्टः ।

अत्र गजज्ञानम् एषां स्यात्तेषां सन्दर्शनद्वारेण प्राचीनभारतीयगजानां शास्त्रस्य ज्ञानं कथमस्तीति दर्शयितुम् । गजविषये अभिरुचिं दधानः सामान्यः कश्चन, आयुर्वेदवैद्यः, प्राणिशास्त्राध्यापकः, इत्येतेभ्यः त्रिभ्यः जनेभ्यः इयं प्रश्नावलिः प्रदत्ता । संस्कृतविद्वान् अस्मिन् सन्दर्शने न योजितः । तत्र कारणमपि विद्यते । प्रायः सर्वेऽपि संस्कृतज्ञाः सम्यग् जानन्ति यत् गजशास्त्रमिति किञ्चनशास्त्रं वर्तते इति । सङ्कल्पेषु प्रसिद्धे महासङ्कल्पे भारतीयानां चतुष्षष्टिकलासु अन्यतमं गजशास्त्रमिति प्रायः सर्वेऽपि संस्कृतज्ञाः जानन्त्येवेति कारणेन । आधोरणानां सामान्यतया नैरक्षर्यमेव भवति, कुतो वा तेषां संस्कृतभाषाप्रवेशः इति धिया केवलं जनत्रयं चितं मया । सर्वत्रापि सामान्याभिप्रायः सर्वेऽपि गजं जानन्ति किञ्चिदिव, केचन शास्त्र-(आयुर्वेद) विचारमपि जानन्ति परं गजं शास्त्रत्वेन, शास्त्रप्रणेतुः परिचयः वा कियान् वर्तते इति अधोदत्तानां पत्राणां द्वारेण ज्ञातुं शक्यते ।

अस्मिन् भागे दत्तः कश्चन सन्दर्शनविचारः, यत्र त्रयाणां सन्दर्शनं कृत्वा तेषामभिप्रायाः स्वीकृताः सामान्यानां गजज्ञानपरिचयं ज्ञातुम् ।

## ***QUESTIONNAIRE ABOUT GAJASHASTRA***

1. Name - Dr. RAMYA BHAT
2. Age -
3. Profession - DOCTOR Since - 10 YEARS
4. Educational Qualification - BAMS, M.S(AY)
5. Family Background -
6. Father - Mother - **Rural** / Urban
7. Do You Like Elephants - Why -
8. Have You Seen Any Elephant (In Activity), (If Yes Where)- YES
9. The Most Attractive Feature Of An Elephant (As You Think) -
10. Special Uses Of Elephants (As You Think) -
11. Importance Of Elephants -
12. How Do You Know About Elephants - Through

    Books Practical Knowledge By Profession Any Other means

    Sushrutha Samhithe Sutra Sthana, Yuktaseniyaadhyaya, Charakasamhite, Siddhisthana
13. Are You Interested In Study Of Elephants ?
14. Which Work Would You Suggest For A Detailed Study Of Elephants, Why ?
15. Do You Know How Many Elephants Were Killed In Mahabharata -
16. Since How Many Years Are Elephants Tamed In India (As You Think)
17. What Were The Techniques Used -
18. How About The Language, Features Of Mahouts Then -

19. Do You Know About Gajashastra

20. (If Yes How & What Are The Contents -   If No Why - )

    Palakapya is the pravarthaka of gajayurveda. Has written two books hastyayurveda & gajashastra

21. Do You Know Who Is The Author Of Gajashastra - PALAKAPYA

22. When Do You Think Elephants Are Enraged -

24. Any Special Thing You Know About Elephants -

While explaining doota lakshana, expression of gaja towards difficult situations.

SIGNATURE -                                                DATE - 23.3.17

## ***QUESTIONNAIRE ABOUT GAJASHASTRA***

1. Name - RAJESH PADMAR
2. Age - 34 YEARS
3. Profession - LECTURER Since - 2006
4. Educational Qualification - M.Sc (ZOO), (B.Ed)
5. Family Background - Father - KUNHIKRISHNA MANIYANI<br>Mother - MUTHAKKA **Rural** / Urban
6. Do You Like Elephants - YES Why - A KEYSTONE SPECIES
7. Have You Seen Any Elephant (In Activity), (If Yes Where)- YES, KERALA FORESTS
8. The Most Attractive Feature Of An Elephant (As You Think) - SIZE
9. Special Uses Of Elephants (As You Think) -ECOLOGICAL PRESENCE
10. Importance Of Elephants - ECOLOGICAL SIGNIFICANCE
11. How Do You Know About Elephants - Through
12. Books Practical Knowledge By Profession Any Other means
13. Are You Interested In Study Of Elephants - YES
14. Which Work Would You Suggest For A Detailed Study Of Elephants, Why ?

    GAJASHASTRA

15. Do You Know How Many Elephants Were Killed In Mahabharata

    NOT EXACTLY

16. Since How Many Years Are Elephants Tamed In India (As You Think)

VEDIC PERIOD

17. What Were The Techniques Used - Pitfall system, then train

18. How About The Language, Features Of Mahouts Then - SIGNS,GESTURES

19. Do You Know About Gajashastra ? NO

20. (If Yes How & What Are The Contents - If No Why - ) NOT STUDIED

21. Do You Know Who Is The Author Of Gajashastra - NO

22. When Do You Think Elephants Are Enraged -

    When its dominance/emotions are disturbed

23. Any Special Thing You Know About Elephants -

24. Ecologically, culturally elephants play a vital role. It is a national heritage animal.

SIGNATURE - DATE - 5.7.2017

## ***QUESTIONNAIRE ABOUT GAJASHASTRA***

1. Name - S.ACHYUTHA RAO
2. Age - 48 YEARS Profession -BUSINESS Since 3 YEARS
3. Educational Qualification - B.Com, CA (INTER)
4. Family Background - Father - B.SUBBARAO
   Mother - SUSHEELA BAI Rural - 22 YRS / Urban -26 YRS
5. Do You Like Elephants - Yes why - majestic gait, they are pious unless they are tempted
6. Have You Seen Any Elephant (In Activity), (If Yes Where)- Yes, in the natural habitats of kabini backwaters, mudumalai, himavad gopalaswamy ranges; (when on a personal trip/forest visit)
7. The Most Attractive Feature Of An Elephant (As You Think) - Majestic gait & silence; playfulness
8. Special Uses Of Elephants (As You Think) - No need; foraging; controls the forests' overgrowth, useful for hardworks, religious purposes.
9. Importance Of Elephants - To reach remote locations in present days.
10. How Do You Know About Elephants - Through

    Books Practical Knowledge Internet
11. Are You Interested In Study Of Elephants - Yes
12. Which Work Would You Suggest For A Detailed Study Of Elephants, Why ? Since a hobby, no recommendations
13. Do You Know How Many Elephants Were Killed In Mahabharata -

    Approximately 10,000
14. Since How Many Years Are Elephants Tamed In India (As You Think) Since 5,000 years

15. What Were The Techniques Used - Capturing, taming and caring & caressing; perhaps not as today they were cruelly treated.

16. How About The Language, Features Of Mahouts Then - The languages of their own & different signs. Now more of hindi & urdu.

17. Do You Know About Gajashastra - Yes, in an article of a newspaper; perhaps in arthashastra.

18. (If Yes How & What Are The Contents - If No Why - ) -

19. Do You Know Who Is The Author Of Gajashastra - May be Kautilya

20. When Do You Think Elephants Are Enraged - Males when in musth; when they don't get a mate; to defend their young ones - mock attacks; when they are tortured beyond their limits.

21. Any Special Thing You Know About Elephants - Elephants have an affinity towards white cars; we should allow them to pass the road, then to move further; elephants' death in west bengal on railway tracks is to be prevented which occurs due to their overconfidence.

SIGNATURE - DATE - 16.3.2017

# - ग्रन्थसूची -

*संस्कृतम् -*


१. पालकाप्यः, *हस्त्यायुर्वेदः*, (सं) शिवदत्तशर्मा, आनन्दाश्रम मुद्रणालयः, पुण्यपत्तनम्, १८९४ .

२. सोमेश्वरः, *मानसोल्लासः*, प्रथम सम्पुटम्, , (सं) गजाननश्रीगोण्डेकर्.के., केन्द्रीयग्रन्थालयः, वडोदर, १९२५

३. सोमेश्वरः, मानसोल्लासः, (सं) प्रो.मल्लेपुरं जि. वेङ्कटेशः, दरेसा प्रकाशनम्, बेङ्गलूरु, २०१५

४. नीलकण्ठः, *मातङ्गलीला*, (सं) महामहोपाध्यायः श्री. टि.गणपतिशास्त्री, तिरुवन्तपुरं संस्कृत सीरिस्, १९१०

५. केलदी बसवराजः, *शिवतत्वरत्नाकरः*, (सं) डा॥ जि. मरुळसिद्दय्यः, प्राच्यसंशोधनसंस्था, मैसूरु नगरम्, १९६९

६. केलदी बसवराजः, *शिवतत्वरत्नाकरः*, केळदी वस्तुसङ्ग्रहालयः, कन्नड विश्वविद्यालयः, हम्पी, १९९९ ।

७. वराहमिहिरः, बृहत्संहिता, (सं) प्रो. रामचन्द्र पाण्डेयः, चौखम्बा विद्याभवन, वाराणासी, २०१४

८. अमरसिंहः, *अमरकोशः*, (सं) प्रो.ए.ए.रामनाथन्, अड्यार् ग्रन्थालयः संशोधनकेन्द्रम्, चेन्नै, १९७८ ।

९. कौटिल्यः, *अर्थशास्त्रम्*, (सं) डा.हेच्.पि.मल्लेदेवरु, प्राच्यविद्यासंशोधनालयः, मैसूरुविश्वविद्यानिलयः, मैसूरु, १९८६

१०. पालकाप्यः, *गजशास्त्रम्*, तञ्जावूरु सर्फोजी सरस्वती महल् ग्रन्थालयः, तञ्जावूरु ।

११. पालकाप्यः, गजशास्त्रम्, (अनन्तकृष्ण भट्टारकेन ग्रथित व्याख्यसहितम्) (सं) डा.सिद्धार्थ यश्वन्त वाकणकर्, वैद्यः प्रो.वि.बि.महीष्कर्, भारतीयकलाप्रकाशन्, देहली, २००५

१२. नारदमुनिः, *गजशिक्षा* (उपापत्याचार्यविरचितव्यक्तिनामकटिप्पणीसहिता), (सं) प्रो. एस्.शङ्करनारायणन्, श्री.वेङ्कटेश्वर विश्वविद्यालयः, प्राच्यसंशोधनालयः, तिरुपतिः, १९७५

१३. *हलायुधकोशः*, (सं) जयशङ्कर जोषी, हिन्दी समितिः, लखनऊ, १९६७

१४. भारविः, *किरातार्जुनीयम्*, (मल्लिनाथव्याख्यासहितम्), चौखम्बा सुरभारती प्रकाशनम्, वाराणासी, १९५७

१५. भासः, भासनाटकचक्रं, (सं) सि.आर्.देवधर्, मोतीलाल् बनार्सीदास् प्रकाशनम्, देहली, १९९९

१६. शिवमारः, *कल्पनारत्नम्*, (सं) विद्वान् हेच्.वि.नागराज राव्, पूर्णप्रज्ञासंशोधनमन्दिरम्, बेङ्गलूरु, २००९

कन्नडभाषायाः

೧. ಶ್ರೀಮದ್ವಾಲ್ಮೀಕಿ ರಾಮಾಯಣಮ್, ರಾಮಾಯಣ ಪ್ರಕಾಶನ ಸಮಿತಿ, ಬೆಂಗಳೂರು, ೧೯೬೮

೨. ಅಮರಸಿಂಹನ ಅಮರಕೋಶ, (ಸಂ) ಲೂಯಿ ರೈಸ್, ಪ್ರಸಾರಾಂಗ, ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾಲಯ, ಮೈಸೂರು, ೧೯೭೦

೩. ಡಾ.ವೆಂಕಟಾಚಲಶಾಸ್ತ್ರಿ, ಗಜಶಾಸ್ತ್ರ ಶಬ್ದಕೋಶ, ಶ್ರೀ ಸಿದ್ಧಲಿಂಗೇಶ್ವರ ಪ್ರಕಾಶನ, ಗುಲಬರ್ಗಾ, ೧೯೯೪

೪. ಪ್ರಜ್ಞಾ ಚೌಟಾ, ಗಜಸಂಹಿತೆ, ಆನೆ ಮನೆ ಫೌಂಡೆಷನ್, ಬೆಂಗಳೂರು, ೨೦೧೦

आङ्ग्लाकराः

1. C.R.Devadhar, *Works of Kalidasa*, Motilal Banarsidass Publishers (Pvt) Ltd, Delhi, 1966, 1985

2. Gopal Raghunath Nandargikar, *Raghuvamsham of Kalidasa,* Motilal Banarsidass Publishers (Pvt) Ltd, Delhi, 1982

3. P.V.Kane*, Harshacharita of Banabhatta,* Motilal Banarsidass Publishers (Pvt) Ltd, Delhi, 1986

4. Franklin Edgerton, *The Elephant Lore of the Hindus*, Motilal Banarsidass Publishers (Pvt) Ltd, 1985

5. Dr.Shivashekhar Mishra, *Fine Arts and Technical Sciences in Ancient India,* Krishnadas Academy, Varanasi, 1982

6. Hamsadeva, *Mrigapakshishastra*, 1927 (Ed) Nalini Sadhale & Y.L.Nene, Munsilal Manoharlal publishers, NewDelhi, (2008)

7. S.K.Elhingham & David Hard, *The Illustrated Encyclopaedia of Elephants*, Salamander books Ltd., London, 1991.

8. Jeheskel soshani, *Elephants The Majestic Creatures of the Wild*, R.D.Press, 1992

9. Ramesh Bedi, *Elephants The Lord of the Jungle*, National Book Trust, 1969

10. Shudraka, *Mricchakatika,* (Ed) M.R.Kale, Motilal Banarsidass, Delhi, 1988

11. *The Meghaduta of Kalidasa, M.R.Kale,* Motilal Banarsidass Publishers (Pvt) Ltd, 1974, 2015